॥ ॐ श्रीः ॐ ॥

श्रीश्रीनिवासायनमः

श्रीश्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य ऋग्भाष्यस्य

श्रीजयतीर्थमुनिकृतायाः टीकायाः

श्रीसत्यनाथतीर्थरचितः व्याख्यानात्मकः

रूपावतारापरनामा

ऋग्भाष्यटीकाप्रकाशः

प्रथमाष्टके प्रथमोध्यायः

श्रीमद्धनुमद्भीमध्यांतर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवायनमः

श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥

लक्ष्मीपतिं वेदवेद्यमनन्तगुणबृंहितम् ।
सूर्यमण्डलगं देवं नारायणमुपास्महे ॥ १ ॥

नमामि ज्ञानसिद्ध्यर्थं पूर्णप्रज्ञं जगद्गुरुम् ।
जयतीर्थमुनिं सर्वशास्त्रज्ञं वरदं गुरुम् ॥ २ ॥

कीटेन कारयामास यथा कृष्णस्तथा मया ।
कृपामात्रेण साम्राज्यं तं सत्यनिधिमाश्रये ॥ ३ ॥

जयतीर्थश्रीचरणः मङ्गलमनुष्ठाय शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति ॥ **नारायणेति**[1]। [१-१] प्रत्यूहाश्च ध्वान्तानि च प्रत्यूहध्वान्तानि। तेषां शान्तिकृत्। सूर्यमण्डलान्तर्गतस्य हरेः उभयनिवारकत्वं सुप्रसिद्धमेवेति भावः। कमला च कमलानि च कमलाकमलानि तानि आनन्दयतीति कमलाकमलानन्दमृतत्। **अन्तः स्वान्तम्** [१-२] ॥ स्वान्तस्य अन्तः मनोमध्य इति यावत्। "अव्ययं विभक्ति....."। [२।१।६][2] इति विभक्त्यर्थेऽव्ययीभावः ॥ १ ॥

ऋचां पदानीति। [१-२] **संवादितामात्रम्** [१-२] समानार्थतामात्रम्। ऋक्पदानां भाष्यपदव्याख्येयतामात्रम् इति यावत्। **कुर्मः**। प्रकटीकुर्म इत्यर्थः। **इह खल्विति**। [१-३.] संसारलक्षणस्य अकूपारस्य समुद्रस्य पारं जिगमिषताम् इत्यर्थः। **अप्रतिपत्तिविप्रतिपत्तिभ्यामिति**। [१-४] पदार्थस्य उपक्रमादिलिङ्गानां च अप्रतिपत्तिविप्रतिपत्तिभ्याम् इत्यर्थः। एतेन—वाक्यर्थाप्रतिपत्तौ विद्यमानायामेव वाक्यस्य बोधकत्वात् अप्रतिपत्त्या न तत्कारणतामश्नुवत इतिअयुक्तमिति—परास्तम्। **प्रारिप्सितस्येति**। [१-५] लौकिकानां पुरुषाणां अविघ्नेन परिसमाप्तये प्रचयाय च ये नारायणप्रणामस्तवने कर्तव्यत्वेन प्रसिद्धे ते शिष्यशिक्षार्थम् कुर्वन् स्वव्याख्यानप्रयोजनं दर्शयतीत्यर्थः। प्रारिप्सितस्य अविघ्नेन समाप्तये प्रचयायचेत्येतत्प्रयोजनसङ्ग्रहात्। शिष्यैरपि नारायणप्रणामस्तवने कार्ये इति शिष्यशिक्षा कृतेति ज्ञापनार्थम्। **अनवधारितस्वरूपस्येति**।

---

१ अत्र पुस्तके सर्वत्र कुंभकोणमुद्रितऋग्भाष्यटीकापुस्तकानुसारेण पत्रपंक्तिसंख्या दत्ता.

२ इदं पाणिनिसूत्रस्य अध्यायपादसूत्रसंख्याचिह्नम्.

[१-६]। अनवधारितस्वरूपस्य प्रणामस्तवनायोगात् स्वरूपावधारणस्य लक्षणेन विना असंभवात् अस्माभिः प्रणामस्तवनानुष्ठानेन शिक्षिता अपि शिष्याः प्रणामस्तवने न करिष्यन्तीत्यालोच्य शिष्याणां तत्र प्रवृत्तये तान् प्रति लक्षणमाहेत्यर्थः। एतेन-स्वरूपनिर्धारणेन विना प्रणामस्तवनायोगश्चेत् तर्हि स्वेनैव लक्षणं ज्ञातव्यम्। वचनं तु व्यर्थम्। वचनस्य परार्थत्वात्-इति निरस्तम्। **अर्ण इत्युदकनामेति।** [१-७] उदके नुक् च [उ० ६३६] इति सूत्रेण उदके अभिधेये अर्त्तेरसुन्प्रत्ययस्य नुगागमस्य च विधानादिति भावः। **तत इति।** [१-७] अर्णस्शब्दात् "तद्धिताः" [४।१।७६] इति बहुवचनज्ञापितो मत्वर्थे डप्रत्ययः ततश्च-अकारान्तर्मण इति पदं समुद्रवाचीति भावः। **"कडाराः कर्मधारये" [२।२।६८] इतीति।** [१-८-९] अनेन सूत्रेण विशेषणपूर्वनिपातनियमस्य कडारादिषु त्याजितत्वात् ऐच्छिकः अमितशब्दस्य परनिपात इति भावः। एतेन-अस्यसूत्रस्य पूर्वनिपातविकल्पाभिधायकत्वात् अनेन परनिपात इत्ययुक्तम्-इति परास्तम्। यद्यपि कडारादिषु अमितशब्दस्य पाठो नास्ति। तथापि तेष्वस्य उपसंख्यानं कर्तव्यमिति भावेन इदं सूत्रं उदाहृतमिति निबोध्यम्। **तैरमितेति।** [१-१०] तैरुपमानैः इयदिति अवच्छिन्नतया ज्ञातुमशक्या द्युतिः यस्य स तथोक्त इति व्याख्येयमित्यर्थः। **ऋक्प्रतिपाद्यतया नतमिति॥** [१-१२] निर्दोषवेदप्रतिपाद्यत्वार्थकनारायणपदप्रयोगादिति भावः। उत्तरमाह। **सकलेति। भगवत्प्रतिपत्तिहेतुत्वात्** [२-६] इत्यस्यअनुवृत्तेन अतितुष्टिकरमित्यनेनान्वयः। अशेषगुणाधारत्वस्य ओंकारप्रवृत्तिनिमित्तत्वेऽपि परमेश्वरस्य तद्वाच्यत्वं कुतः? अन्यस्याऽपि

१ "उदके नुट् च" इति। २ "नुडागमस्य" इति छलारीये. सिद्धान्तकौमुद्यांच

किं न स्यात्? अविशेषात् इति शङ्कते। **कुत इत्यत आह इति।** [२-८] भूधातोः सत्ताप्राप्त्यर्थकत्वेन कथं भूधातुनिष्पन्नस्य भूशब्दस्य पूर्णत्वं प्रवृत्तिनिमित्तं इत्यत आह। **भूबहाविति।** [२-११] **भवतेरौणादिक इति** [२-१२] धातूनामनेकार्थत्वात् भूत्यर्थकात् भवतेः औणादिको डुप्रत्ययइत्यर्थः। **वरशब्दस्येति।** [२-१३] अन्त्यस्याकारस्य लोप इत्यर्थः। **निरुक्तत्वादिति।** [२-१३] पृषोदरादीनि यथोपदिष्टम् [६।३।१०९] इति सूत्रेण पृषोदरादिशब्दानां प्रामाणिकप्रयोगानुसारेण साधुत्वस्य प्रतिपादितत्वादित्यर्थः। एवमन्यत्रापि द्रष्टव्यम्। सूत्रस्योक्तार्थत्वे वार्तिकसंमतिमाह। **यथोक्तमितीति। वर्णागमः** [२-१३]॥ अधिकस्य वर्णस्य आगमः। **वर्णविपर्ययः** पूर्ववर्णस्योत्तरत्वम् उत्तरस्यपूर्वत्वम् तथाच **वर्णविकारनाशाविति द्वौ।** [२-१३] **धातोः।** धात्वर्थातिशयेन **योगः** अर्थविशेषवृत्तिः। **तत्** प्रामाणिकप्रयोगान्तर्गतत्वेन प्रसिद्धं **पञ्चविधं** कार्यं सूत्रकृता 'पृषोदरादीनि यथोपदिष्टम्' [१।३।१०९] इत्यनेन पृषोदरादिषु **निरुक्तम्** निरूपितमिति अभिज्ञैरुच्यत इत्यर्थः। एतेन-वर्णनाशस्यैव निरुक्तत्वात् निरुक्तत्वादन्तलोपइत्ययुक्तमिति-परास्तम्। **स्वरितिपाठ इति।** [२-१४] इतःपरं टीकायां श्रूयमाणं **शब्दस्वभावादव्ययत्वमिति** [२-१५] वाक्यं प्रक्षिप्तम् न टीकावाक्यम्। सुवःस्वरिति शब्दयोरव्ययत्वे मानाभावात्। न च स्वरादिनिपातमव्ययम् [१।१।३७] इत्यभिधानमेव अव्ययत्वे मानम् इति वाच्यम्। तत्र स्वर्गवाचकस्य अव्ययत्वविधानात्। बहुव्रीहिप्रातिपदिकस्यास्य तद्भिन्नत्वात्। अव्ययत्वाभिधानप्रयोजनाभावाच्च। तदिति रूपासिद्धि-

माह "त्यजियजितनिभ्य इति। [२-१६] अत्र त्यजियजितनिभ्यो डित्इति [उणा १२९] ॥ तनोतेरदिप्रत्यय इत्येव पाठः। ततश्चडित्वात् टिलोपेदकारस्य चर्त्वे **तदुइति** रूपं सिध्यति। क्वचित्पुस्तके त्यजियजितनिभ्योडिदिति तनोतेर्डित्प्रत्यय इति पाठो दृश्यते। स तु लेखकदोषात् प्रक्षिप्तः। सूत्रस्यादिप्रत्ययविधायकत्वेन डित्प्रत्ययविधायकत्वाभावादिति द्रष्टव्यम्।

पूङ्प्राणिप्रसव इतीति। [२-१७] पूङ इत्येतस्मात् तृच्प्रत्यये तस्येडागमे गुणे अवादेशे **सवितृ**शब्दसिद्धिः। **वृङ [ञ] एण्य इति** [२-१७-१८] ॥ वृङ्संभक्तौ इत्येतस्मात् कर्मणि एण्यप्रत्यये गुणे रपरत्वे च **वरेण्य**मिति रूपासिद्धिः। क्वचित् वृञ एण्यः [उणादि ३७८] इति पाठो दृश्यते। स प्रामादिकः। टीकाकृता वरणीयो भजनीय इति वृङर्थत्वव्याख्यानात्॥ "वृङ एण्य" इत्येव सूत्रपाठदर्शनाच्च। एवं च **वृङएण्य इति वृणोतेः कर्मण्येण्य** इति टीकापाठ इति द्रष्टव्यम्। यद्यपि वृणोतेरेण्यप्रत्यये प्रत्ययस्याद्युदात्तत्वे "अनुदात्तंपदमेकवर्जम्" [६-१-१५८] इति शेषनिघाते मध्योदात्तत्वं वरेण्यपदस्य प्राप्नोति। तथापि "वृषादीवां च" [६।१।२०३] इति सूत्रेण वृषादीनामाद्युदात्तत्वविधानात् वरेण्यशब्दस्य वृषादित्वात् आद्युदात्तत्वमेवेति द्रष्टव्यम्।

धातुसमुदायादसुनिति। [२-१८-१९] यद्यपि प्रत्ययः एकस्मादेव विहितः तथापि उणादयो बहुलम् [३-३-१]॥ इति सूत्रकृता उक्तत्वात् धातुसमुदायादपि प्रत्ययो भवतीति द्रष्टव्यम्।

१ त्यजितनियजिथ्योडित् (सि. कौ. पा.)

अत एव वृत्तिकृता " यतोविहितास्ततोऽन्यतोऽपि भवन्ती " त्युक्तम् **अदिभूभ्यामिति।** [२-२०] यद्यप्याधुनिकैर्वृत्तिकारैः अदिभुवे डुतच् [उणादि ६७९] इति पाठमङ्गीकृत्य सूत्रं व्याख्यातम् तथापि चिरंतनैः वृत्तिकारैः अदिभूभ्यां डुतच् [उणादि ६७९] इति पाठस्याङ्गीकृतत्वात् तथैवोदाहृतम् । " सरूपाणामेकशेष एकविभक्तौ " [२।२।६४] इति प्रातिपदिकसमुदायात् प्रत्ययं वदतः पाणिनेः धातुसमुदायादपि प्रत्ययस्याभिमतत्वेन " अदिभूभ्यां डुतच् " । इति पाठस्यैव युक्तत्वाच्च । **असुनप्रत्ययसंनियोगेनेति।** [२-२०] उणादयो बहुलम् [३-३-१] इत्युक्ते ह्रस्वत्वटिलोपलाभाय प्रत्ययसंनियोगाश्रयणं कृतम् । नहि औणादिकप्रत्ययाभावे " उणादयोबहुलमि" त्यनेन कार्यसंपादनमास्ति । येन प्रत्ययसंनियोगाश्रयणं व्यर्थं स्यादिति भावः । एतेन — अलाक्षणिकस्य कार्यस्याश्रयणे असुनप्रत्ययस्य अनपेक्षणात् असुनप्रत्ययसंनियोगेनेत्यभिधानं व्यर्थमिति परास्तम् । ननु ध्यायतेः शबविकरणस्य परस्मैपदिनो मस् प्रत्यये ध्यायेमेति भाव्यम् । कथं धीमहीति रूपम् ? इत्यत आह **ध्यायतेरिति।** [२-२१] ध्यै धातोःछान्दसमात्मनेपदम् । ततो महिङ्,संप्रसारणम्,"संप्रसारणाच्च" [६।१।१०८] इति एकारस्य पूर्वरूपत्वम् । हलः [६।४।२] इति सूत्रेण इकारस्य दीर्घः । बहुलं छन्दसि [२।४।७३] इति शपो लुक् । ततश्च **धीमहीति** रूपं भवति । **बहु वचनार्थ इति।** [२–२७] धीमहीति बहुवचनेन ज्ञापितोऽर्थइत्यर्थः । **न इतीति** [२–२२] अहं च अन्ये चेतिस्थिते " त्यदादीनि सर्वैर्नित्यम् " [१।१।७४] इति अस्मदः शेषविधानात् न इत्यस्याशेषार्थकत्वमित्यभिप्रेत्य अशेषेत्युक्तामिति भावः ॥

ननु णिजन्तात् चुदेः शपूप्रत्यये गुणे अयादेशे च अनन्तरं यासुटितस्य "अतोयेयः" [२।२।८०] इति इयादेशे च सति चोदयेत् इति भवेदिति अत आह । **चुद प्रेरण इतीति।** [२-४२] णिजन्तात् चुदेः "लिङर्थे लेट्" [३।४।७] इति लेटि गुणे "लेटोऽडाटौ" [३।४।९४] इत्याडागमेअयादेशे "इतश्चलोपः परस्मैपदेषु" [३।४।९७] इति लेडादेशतिप इकारलोपे **चोदयात्** इति रूपं सिध्यतीति भावः । एकवाक्यता-सिद्धये तदित्यस्यावृत्या योजनमाह । **एवं योजनीयमिति।** [२।२२।२३] ननु भाष्ये संपूर्णत्वात् पुरुषो नामेति वक्तव्यम् । कथं "पुमान्नामेति" उक्तम् ? इत्यत आह । पुमान् पुरुषो नामेति पुमान् शब्देन पुरुषशब्दार्थे लक्षयित्वा भाष्यकृता पुरुषनामवत्वं विष्णोरुक्तमिति भावः ।

पृपालन इति। [२-२६] अस्मात्कुषन् प्रत्ययः कित्वाद्-गुणाभावः । 'उदोष्ठ्यपूर्वस्येति' [७।१।१०२] ऋकारस्योत्वं तस्य रपरत्वं चेति द्रष्टव्यम् । **सर्व शब्दार्थ** इति । [३–२] समुद्र घोषादि-सर्वशब्दार्थ इत्यर्थः । **तेषामिति।** [३–२] समुद्रघोषादिशब्दानां भगवत्तात्पर्यकत्वेन ॥ तावाएता इति वेदप्रतिपाद्यत्वादित्यर्थः । सर्ववेदार्थ इत्येवता पूर्णत्वात् सर्वशास्त्रार्थः सर्वशब्दार्थ इत्येतद्द्वय असंगतमित्यत आह **इत्येतद् द्वयमिति।** [३–२] ननु इत्येतमर्थं तावाएता इति उपनिषदाहेति व्याख्यानमनुपपन्नम् । विशेषेणऋगर्थतामित्यनेन तावाएताऋच इत्यस्यान्वितत्वादित्यत आह । **तावाएता इति।** [३-३] तावाएता इत्यस्यावृत्त्या तावाएता इति परा उपनिषदित्याह तथा तावाएता इत्युपनिषत् विशेषेण ऋगर्थतामाहेति मूलं योज्यम् ।

आपाततः कर्मादिप्रतिपत्तिपरस्येति । [३-१०] झटिति कर्मादिस्वरूपप्रतिपादकस्येत्यर्थः । **ऋचांत्विति** । [३-११] ऋचां भगवत्परत्वावधारणं सुकरमितियत्तदेव विशेषतः भगवत्परत्वमितिशब्देनोच्यत इत्यर्थः । **अग्निनामवतः प्रथमप्रतिपादन इति** । [३-१४] अग्निनाम्ना प्रथमप्रतिपादने को हेतुरित्यर्थः । एतेन–अग्निनामवतः प्रथमप्रतिपाद्यत्वे हेतोरुत्तरत्रानभिधानात् अवतारिकेयमनुपपन्ना–इति परास्तम् । **विसंवाद इति** [३-२१] परिहारार्थं विसंवादोऽनादरणीय इति भावः ।

अग्निमीळे ॥ भाष्येअग्निशब्दोऽयमिति[३-२३-२४] नन्विदमनुपपन्नम् । एकस्यैव अग्निशब्दस्य अग्रशब्दनिप्रत्ययाभ्यां तथा अग्रशब्दनयतिधातुडिप्रत्ययैस्तथा अदिनिप्रत्ययाभ्यां तथा अङ्गशब्दनयतिधातुडिप्रत्ययैः तथा अगशब्दनयतिडिप्रत्ययैः उत्पत्तेरभिधानात् । न चैतद्युक्तम् । कैश्चिद्वयवैर्जातस्य अन्यैरवयवैरुत्पादायोगात् जातस्य जनेरयोगाच्चेति चेत् । उच्यते । न वयमो वयं धात्वादिभिः शब्दा जायन्त इति पदानां नित्यत्वाङ्गीकारात् । उक्तं च महाभाष्ये—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥ इति

ननु कथं तर्हि धात्वादीनामग्न्यादिशब्दावयवत्वं कथं च पङ्कजादिशब्दानां यौगिकत्वं अवयवशून्यानामवयवार्थाङ्गीकारायोगात् । इति चेत् । न वयमो वयं धात्वाद्यवयवानां च तन्तुपटवत् जन्यजनकभावेन अवयवावयविभाव इति येनोक्तदोषः स्यात् । किं नाम धातुप्रत्ययादिस्थाने अयमखण्डः शब्दः प्रयोक्तव्य

इति भगवत्कल्पितत्वम् । तत्र धात्वादिस्थानिसमुदायस्य पारिभाषिकमवयवत्वम् । पारिभाषिकावयवार्थान्बोधयतः अखण्डस्याऽऽदेशस्य अवयवित्वमपि पारिभाषिकमेव । न चैवं सत्यनुपत्तिरस्ति । तत्तद्धातुतत्तत्प्रत्ययसमुदायस्थाने तथा तत्तच्छब्दतद्धितादिप्रत्ययस्थाने तत्तदर्थप्रतिपादनाय एकस्यैव शब्दस्य पाणिन्यादिभिः प्रयोगनियमस्य कर्तुं शक्यत्वात् । उक्तं च महाभाष्ये " मृजिरस्माविशेषेणोपदिष्टः प्रकृतिपाठे सर्वत्र मृजिबुद्धिप्रसङ्गे अक्ङितिमार्जिः साधुर्भवति " इति । अत एव पङ्के जायत इति पारिभाषिकावयवार्थप्रतिपादकत्वात् पङ्कजशब्दस्य यौगिकत्वं लोके सिद्धं सिद्धम् । एवं राजपुरुष इति समासपदानामपि सावयवत्वमूह्यम् । एवमेवानेकधा पदविच्छेदस्थले समाधानमूह्यम् । अतएव अग्निशब्दे अदेरवयवतया अदर्शनं न दोषाय । पारिभाषिकावयवत्वस्योक्तत्वेन तदेकदेशत्वरूपमुख्यावयवत्वानङ्गीकारात् । पङ्कजादिशब्देष्वपि अवयवाः तदेकदेशतया दृश्यन्त इति भ्रम एव । अवयवत्वेनाङ्गीकृतानां पङ्कजशब्दजनिडप्रत्ययानामन्यत्वात् । पङ्कजादिशब्दावयवतया दृश्यमानानां पङ्कजादिशब्दानामन्यत्वात् ।

अग्रशब्दादिति । [३।२५] ॥ सप्तम्यन्तादग्रशब्दात् " तद्धिताः " [४।१।७६] इति बहुवचनज्ञापितो निप्रत्ययः । रशब्दलोपः । " सुपोधातुप्रातिपदिकयोः " [२।४।७१] इति उपपद सुलोपः । ततश्च **अग्नि** इति रूपम् । **पूर्ववादिति** । [३।२६] ॥ सप्तमीसमर्थात् भवार्थे निप्रत्ययः रशब्दलोपः सप्तमीलोपश्चेति भावः । **नयतेः कर्तरि डिप्रत्यय इति** [४।१] ॥ यद्यपि " अचइः " [उणादि ५७८] इति सूत्रेण इकारप्रत्ययः प्राप्नोति । तथापि तं बाधित्वा बाहुलिको डिप्रत्ययो भवतीति द्रष्टव्यम् । ननु अदेर्भावे क्तिन्प्रत्यये

" अदोजग्धिर्ल्यप्तिकिति " [२।४।३६] इति जग्ध्यादेशे आदेशइकारस्य इत्संज्ञायां लोपे प्रत्ययतकारस्य " झषस्तथोऽर्धोधः " [८।२।४०] इति धत्वे जग्धिमिति भवितव्यम्। अत्तिमिति कथं निर्देश इत्यत आह **धातुनिर्देशोऽयमिति** [४।१] ॥ **कर्तरि निप्रत्यय इति ।** [४।२] " वीज्याज्वरिभ्यो निः " [उणा. ४९७] इति सूत्रेण वीज्याज्वरिभ्यो विधीयमानो निप्रत्ययः " उणादयो बहुलम् " [३।३।१] इत्युक्तेः अदेरपि भवतीत्यर्थः । **पूर्ववन्निरुक्तिरिति ।** [४-४] ॥ अगशब्दोपपदात् नयतेर्डिप्रत्ययः उपपदाकारलोपश्च ।

ननु अङ्गागनेतृतामिति षष्ठीसमासोऽनुपपन्नः ॥ ' कर्तरिच ' [२।२।१६] ॥ इति सूत्रेण कर्त्रर्थकतृच्या षष्ठीसमासनिषेधात् इत्यत आह । **नेतृशब्द इति** । [४-४] " न लोकाव्ययनिष्ठाखलर्थतृनाम् " [२।३।३९] इति षष्ठीनिषेधात् " कर्मणि द्वितीया " [२।३।२] इति सूत्रेण अङ्गागशब्दे द्वितीया भवति । श्रितादिषु गमिगाम्यादीनामुपसंख्यानात् । 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' [२।९।२४] इति सूत्रेण द्वितीयासमासो भवतीति भावः । **ईडस्तुताविति** [४-५] ॥ अस्माल्लिट् कर्तरि शप् । अदिप्रभृतिभ्यः शपः [२।४।७२] इति शपोलुक् लटः ' तिपतस्झि·····[३।४।७८] इति सूत्रेण इडादेशः । इटः " टितआत्मनेपदानां टेरे " [३।४।९७] इति एत्वम् । तथाच **ईळु** इति रूपम् । ऋक्षु डकारस्य ळकारादेशः प्रायेण दृष्ट इति अत्रापि डकारस्य ळकार इति भावः । **पुरः पूर्वमेवेति** [४-५] " पूर्वाधरावराणामसि पुरधवश्चैषाम् " [५।३।३९] इति **पूर्वशब्दादसि प्रत्ययः पूर्वशब्दस्य पुरादेशश्चेति भावः। अशेषस्येति शेषोक्तिरिति** [४-५] अतःपरं टीकायां श्रूयमाणं

"चतुर्थ्यर्थे बहुलं छन्दसि" [२।३।६२] इति चतुर्थ्यर्थे षष्ठीति [४-६] इति वाक्यं प्रक्षिप्तम् न टीकावाक्यम्। "सर्वे विधयः छन्दसि विकल्प्यन्त" इति वचनात्। हितशब्दयोगेऽपि "हितयोगेचे" ति वार्तिकेण न चतुर्थीति वाक्यमुच्छिन्नम्। अवश्यं चैतदेवं विज्ञेयम्। अशेषस्य संप्रदानादित्वाभावेन चतुर्थ्यर्थे बहुलं छन्दसीति सूत्रोदाहरणायोगात्। संप्रदानादिरूपार्थे षष्ठीदर्शन एवास्य सूत्रस्योदाहर्तव्यत्वात् अशेषस्येत्यत्र चतुर्थ्यर्थाभावात् चतुर्थ्यर्थे षष्ठीति वचनायोगाच्च। उदात्तस्वरार्थ इति। [४-६] अग्निशब्दनिष्ठोदात्तस्वरार्थ इत्यर्थः। जातावेकवचनमिति। [४-७] समुदाये एकवचनमित्यर्थः। ऋत्विङ्नियामकत्वं कथं स्तुतावुपयुक्तमित्यत आह। कर्माङ्गत्वादिति [४-८]॥ ऋचां कर्माङ्गत्वात् ऋत्विग्भिः कर्मणि ऋच उदाहर्तव्याः। ततश्च ऋचां ऋत्विग्वाक्यतायां स्थितायां अग्निमीळ इति वाक्येन स्तुतिकर्तारो ऋत्विज इति सिद्धं भवति। ततश्च ऋत्विजां नियामकस्य तेषां ज्ञानप्रदस्य स्तुतिरुपपन्ना भवति। स्तावकेन स्वनियामकस्य तेषां ज्ञानप्रदस्य तेन रूपेण स्तोतव्यत्वादिति भावः। भाष्यस्थानि "द्योतनात् विजयादि" त्यादीनि षट्पदानि प्रतीकत्वेनोपादाय व्याख्याति। द्योतनादिति। [४-९] अत्र इतिशब्दान्तं भाष्यस्य प्रतीकत्वेनोपादानम्। द्योतनादेः कर्तृत्वादिति व्याख्यानम्। तथाच द्योतनकर्तृत्वात् देवमित्यादि ज्ञेयम्। स्तुत्येति भाष्यस्थपदं प्रतीकत्वेनोपादाय व्याख्याति। तथा स्तुत्येति [४-९-१०] दीव्यतेरिति। [४-१०]

इगुपधज्ञाप्रीकिरः कः [३।१।१३५] इति कं (क प्रत्ययं) बाधित्वा पचादिपाठात्पचाद्यचिति भावः । **स्तुत्यर्थादिति** [४-१०] "अकर्तरि च कारके संज्ञायाम्" [३।३।१९] इति कर्मणि घाञिति भावः । रत्नशब्दं निर्वक्ति । **रमतेर्भावे न प्रत्यय इति** । [४-१८] रमतेर्नप्रत्ययःतकारश्चान्तादेश इति भावः । क्वचित्पुस्तके **रमेर्भावे क्तन** इति पाठो दृश्यते तस्मिन् पाठे ' अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ' [६।४।३७] इति सूत्रेण मकारलोपे रूपम् । **आतोमान्निति** [४-१८] चकारेण विचोऽनुवर्तनादिति भावः ॥१॥

अग्निःपूर्वेभिः ॥ नू शब्द इति [४-२१] ॥ नवशब्दादेशो नूशब्दः अद्यशब्दपर्याय इत्यर्थः । **ततस्तन इति** [४-२१] शब्दप्रकृतेर्नवशब्दात् तनप्रत्ययः ' नवस्य नू त्नत्तनस्राश्च प्रत्ययावक्तव्याः ' [वा. ५।४।२५ सू] इति वार्तिकेण भवतीत्यर्थः । नवशब्दात् तनप्रत्यये नवस्य नू इत्यादेशे **नूतनामिति** भवतीति भावः । अत्र "**नूशब्दोऽद्यपर्यायः । ततस्तन**" इत्येव टीकावाक्यपाठः । ननु पुस्तकेषु परिदृश्यमानोऽपि **ततःसायं चिर मिति [त्यादिना] तनः** [४-२१] इति पाठः । अस्य सूत्रस्य ट्युल्विधायकत्वेन तनप्रत्ययविधायकत्वाभावात् । न च ट्युल्प्रत्ययस्य जायमानमनाऽऽदेशं तुडागमं च विवक्षित्वा तथानिर्देश इति वाच्यम् । अव्ययेषु नूशब्दस्य पाठाभावेन अव्ययप्रकृतिकस्य ट्युप्रत्ययस्यायोगात् । नच ' ऋचितनुघमक्षुतङ्कुत्रोरुष्याणाम् ' [६।३।१३३] इतिकृतदीर्घकस्य नुशब्दस्य निर्देश इति वाच्यम् । पदकाले ह्रस्वतया श्रूयमाणस्य संहितायां दीर्घत्वदर्शनेन तदुपादानार्थमेवास्य सूत्रस्य प्रवृत्तत्वेन सर्वदा दीर्घतया श्रूयमाणस्य अनेन सूत्रेण दीर्घत्वाभिधानायोगात् । ननु ' लृटः

सद्वा' [३ । ३ । १४]॥ इति शत्रादेशे भाष्ये एष्यामिः इति भवितव्यम् । कथमेष्यैरिति प्रयोग इत्यत आह । **लृटः सद्वेत्यत्रेति** [४-२२] **व्याख्यायत इति** [४-२२]॥ प्रामाणिकैरिति शेषः । इण्धातोर्लृटि तस्याकारादेशे 'स्यतासी लृलुटोः' [३।१। ३३] इति स्यप्रत्यये धातोः 'सार्वधातुकार्धधातुकयोः' [७। ३ । ८४]॥ इति गुणे आदेशप्रत्यययोः [८।३ । ५१] इति षत्वे **एष्य शब्दः** अकारान्तः सिद्ध्यतीति भावः । **ऋष [ज्ञाने] इत्यस्मात् कि प्रत्यय इति** [४-२३] अर्थानुवादोऽयं 'इगुपधात्कित्' [उणादि ५५९] इति सूत्रेण इन् प्रत्ययो भवति स कित् चेति भावः । ऋषेरिन्प्रत्यये कित्वाद्गुणाभावे **ऋषिरिति** रूपसिद्धिरिति ज्ञेया । **नकारस्य रुरिति** [४-२४]॥ देवानिति नकारस्य रुत्वे 'आतोऽटि नित्यम्' [८।३।३] इति आकारस्य सानुनासिकाकारादेशे 'भोभगोअघोअपूर्वस्य योऽशि' [८।३।१७]॥ इति रोर्यत्वे 'लोपः शाकल्यस्य' [८ । ३ । १९] इति यलोपे च **देवाँ** इति रूपसिद्धिः । **आङित्युपसर्गस्यचेति** । [४--२४--२५] 'व्यवहिताश्च' [१।४।८२] इति सूत्रेण व्यवहितस्य आ इत्युपसर्गस्य व्यवहितेन वक्षतीत्याख्यातेन संबन्ध इत्यर्थः । **वहेर्लेडिति** [४-२५] वहेर्लेटि तस्य तिबादेशे 'लेटोऽडाटौ' [३।४।९४] इत्यडागमे 'सिब्बहुलं लेटि.' [३।१।३४] इति सिपि 'हो ढः' [८।२।३१] हकारस्य ढत्वे 'षढोः कःसि' [८।२।४१] इति ढकारस्य कत्वे 'आदेशप्रत्यययोः' [८।३।५१] इति सिपः षत्वे च **वक्षतीति** रूपम् ॥ २ ॥

अग्निना रयिम् ॥ अश्नवदिति [५-१] अश्नोतेर्लेट् तस्य तिप् 'इतश्च लोपः परस्मैपदेषु' [३।४।९७] इति इकारलोपः 'लेटोऽडाटौ' [३।४।९४] इत्याडागमः 'स्वादिभ्यः श्नुः' [३।१।७३] इति श्नुः गुणावादेशौ । ततश्चाश्नवदिति रूपम् । ननु यशःशब्दात् 'स्वमोर्नपुंसकात्' [७।१।२३] इति अमो लुका भाव्यम् इत्यत आह । **यशः शब्दादिति** [५-४] अध्यात्मपक्षे अन्वयं दर्शयति **वीरवत्तमं यश इति ।** [५-६] यशःशब्दस्य ज्ञानं सुखं चेति व्याख्यानम् ॥ ३ ॥

अग्ने यम् ॥ यज्ञमितिपृथग्वचनादिति [५-७] यज्ञमितिविशेष्यवाचकशब्दसङ्गावात् अध्वरमित्यस्य अध्वानि रतमित्यर्थो बोद्धव्य इति भावः । **ऋमन्ताडु** [उणादि १११] **इति डुइति** [५-७-८] नच दण्डोवण्डोरण्डेत्यादौ डकारश्रवणात् अत्रापि तच्छ्रवणप्रसंग इति वाच्यम् । तत्र बाहुलकस्यैव लोपाभावस्याङ्गीकारात् । अत्र लोपस्य न्यायप्राप्तत्वात् ततश्च अध्वन् शब्दे उपपदे रमेरौणादिको डप्रत्ययः । प्रत्ययस्य च डित्वात् धातोष्टिलोपः अध्वन्शब्दनकारस्य 'नलोपः प्रातिपदिकान्तस्य' [८-२-७] इति लोपः सति चैवं **अध्वरं** इति रूपम् । ननु यज्ञस्य कर्मत्वाभावात् अस्तेरकर्मकत्वाच्च परेश्च (परि इत्युपसर्गस्य) कर्मप्रवचनीयसंज्ञाभावाच्च द्वितीयानुपपत्तेत्यत आह । **ततो ऽन्यत्रापीति** [५-९] ॥

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

इति वार्तिकेण कर्मण्यपि द्वितीया भवतीति भावः । **एवशब्दतात्पर्यमिति** [५-१०] इच्छब्दव्याख्यानरूपभाष्यस्थैवशब्दतात्पर्यमित्यर्थः ॥ ४ ॥

अग्निर्होता ॥ नन्वाखिलप्रेरकत्वस्य विवक्षितत्वात् अखिलं यच्छतीति वक्तव्यम् । यमयतीतिणिजन्तप्रयोगोऽनुपपन्न इत्यत आह । **यमयतीति स्वार्थेणिजिति** । [५-१२] यमेर्णिचि शपि तिपि गुणे अयादेशे **यमयतीति** रूपमिति भावः । **लुङ्लेङ्वेति** [५-१५] गमेः लुङि तिबादेशे इकारलोपे च्लिप्रत्यये " पुषादिद्युताद्यृलृदितः परस्मैपदेषु " [३-१-५५] इति च्लेरङादेशे छान्दसत्वादडभावे **गमत्** इति रूपम् । अथवा 'गमेर्लेटि' लेटोऽडाटौ [३।४।९४] इत्यडागमे **गमत्** इतिरूपमिति भावः ॥ ५-१ ॥

यदङ्गा॥ पूर्वपदस्येति ॥ [५-१८] अङ्गशब्दान्त्याकारस्य इकारो रसशब्दान्तलोपश्चेति भावः । **निपातनादिति** [५-१९] दाशुष इति साधुरिति शेषः । एतेन-अन्वयाभावात् निपातनादिति पञ्चमी-प्रयोगोऽनुपपन्न इतिपरास्तम् । 'सनर्थे लृट्' इति कृत्रः सनर्थेलृटि तस्य 'स्यतासी लृलुटोः'[३-१-३३] इति स्यप्रत्यये 'ऋद्धनोस्ये' [७।२।७०] इति इडागमे धातोश्चगुणे **करिष्यसि** इति रूपम् ॥ १ ॥

उपत्वा ॥ भाष्ये नमसमिति पदभ्रमं निवारयन् अकारान्त-शब्दार्थमाह । **नमनंनमइति** [६-३] अत्र नमननमःशब्दयोः लेखकदोषात् पौर्वापर्यम् । **नमो नमनम्** इत्येव टीकावाक्यपाठः । व्याख्येयपदमुपादाय व्याख्यानस्य कर्तव्यत्वात् । नमेरसुन्प्रत्यये नम इति वास्तवं रूपम् औणादिके अकारप्रत्यये नम इत्यकारान्तं भाष्ये रूपं सिद्धं भवति इति ज्ञेयम् । ननु इणो मस्प्रत्यये शपितस्य 'अदि-प्रभृतिभ्यः शपः' [२-४-७२] इति लुकि मसः सकारस्य विसर्गे **उपेम** इति रूपं भवेत् । कथं **उपेमसीति** इकार इत्यत आह **इदं**

तोमसीतिइदिति [७।१।४६] [६-३] "इदंतोमसि" छन्दसि विषये मसि मस्शब्दे इत् इकारो भवति सच अन्तः अन्तावयवआगमः। स्तुतित्वसिद्ध्यर्थमिति [६-४] ईश्वरमुच्चगुणं इत्यपि शेषो वक्तव्यो भवतीत्येव टीकावाक्यपाठः नतु ईश्वरत्वादुच्चगुणमित्यपि शेषोवक्तव्योभवतीति टीकावाक्यपाठः। शेषोक्तिसमये भाष्य ईश्वरत्वादिति पञ्चम्यन्तपदाभावात् ॥ २ ॥

राजन्तम् ॥ औणादिको ञ इति [६-७] राजन्तमित्यस्य शत्रन्तत्वे दीप्यमानत्वार्थकत्वप्राप्त्या दीदिवमित्यनेन पौनरुक्त्यं स्यादिति ञप्रत्ययोव्याख्यातः। ततश्चौणादिकानामव्युत्पन्नत्वादवयवार्थानामननुगत्यभावेन राजन्त शब्द ईशत्वार्थको भवतीति भावः। दीव्यतेरिति [६-९] दीव्यतेर्यङि 'सन्यङोः' [६।१।९] इति द्वित्वे इकारप्रत्यये 'यङोऽचि च [८।२।४१] इति यङो लुकि अभ्यासस्य 'दीर्घोऽकितः' [७।४।८३] दीर्घत्वे दीदिवि इति रूपामिति भावः। शानाजिति [६-९] वृद्धेर्लटूतस्य शानजादेशः शप् 'आनेमुक्' [७।२।८२] इति मुक्। गुणः ततश्च वर्धमानमिति रूपमिति द्रष्टव्यम्। इगुपधलक्षणःक इति [६-१०] 'इगुपधज्ञाप्रीतिकिरः कः' [३।१।१३५] इति सूत्रेण क प्रत्ययः। ततश्चाकारान्तो वृद्धशब्द इति भावः। धकारान्तो वृध्शब्द इत्यभिप्रेत्याह। क्विबिति [६-१०] ॥ ३ ॥

सनेःपितेव ॥ सूनोरिति भाव्यम् सूनव इति चतुर्थीप्रयोगः कथमित्यत आह। छन्दसीति [६-१३] वक्तव्यत्येतःपर-

मिति वचनात् [दिति] पष्ठ्यर्थे चतुर्थीति ग्राह्यम् ' एतेन— वक्तव्येत्येतदनन्वितमिति— परास्तम् । ननु स्वस्तात्यिस्य अव्ययत्वात् स्वस्तय इति कथमयं प्रयोग इत्यत आह । **विभक्तीति.** [६-१५] ॥ ४ ॥ २ ॥

उत्पत्यनन्तरमेवेति [६-१९] सत्तयेति शेषः । एतेन- परमात्मनः अतीतानागतदर्शित्वादुत्पत्त्यनन्तरमेव दर्शनमित्य- युक्तम्—इति परास्तम् । उत्पत्तेः पूर्वंएष्यत्वेन दर्शनसद्भावेऽपि वर्तमान- तया दर्शनाभावात् । **तात्स्त्रिय** इति [९-५] ॥ अत्र **तात्स्त्रियो मन्वादिस्त्रिय** इति प्रक्षिप्तम् **तत्स्त्रीमनुस्त्रीति** उच्छिन्नं सूर्य- सोमधर्ममनुस्त्रीणां चतुर्णामेव समत्वेन दक्षादिस्त्रीणां सूर्याद्यवरत्वेन तत्स्त्रीशब्देन ग्रहणायोगात् । **आदिपदगृहीतानां प्रसूत्यादि- स्त्रीणां तदवरत्वम्** [९-७] ॥ इति वाक्यं टीकावाक्यमिति मन्यमानस्य तद्विरोधाच्च । नहि टीकाकारः स्वयमेव तत्स्त्रीशब्देन प्रसूत्यादिसंग्रहं कृत्वा प्रसूत्यादीनां सूर्यादिसाम्यशङ्कापरिहाराय आदि पदगृहीतानां प्रसूत्यादिस्त्रीणां तदवरत्वमिति वदतीति संभवतीति । एवं तर्हि 'धर्मादि' [ऋग्भाष्ये] इत्यादिपदस्य कोऽर्थ इति चेत् । उच्यते । यमाद्यवतारभूतविदुरादयः आदिपदार्थाः । ततश्चैवं विग्रहः । धर्म आदिर्येषां धर्मादयः । तस्य स्त्री तत्स्त्री । सूर्यश्च सोमश्च धर्मादयश्च तत्स्त्री च **सूर्यसोमधर्मादितात्स्त्रियः** इति । ननु ये भिन्नपदेनोपात्ताः तेषां तारतम्यं ज्ञातुं शक्यते कस्यचित् पूर्वग्रहणंकृत्वाऽपरस्य पश्चाद्ग्र- हणस्य उत्तमाधमभावनिबन्धनत्वात् । ये द्वन्द्वनिर्दिष्टाः तेषां तारतम्यं कथं ज्ञेयं समूहालम्बनज्ञानेनेव द्वन्द्वप्रातिपादिकेनापि युगपदेव सर्वार्थ- विषयीकरणात् इत्यत आह **अत्र प्रायो द्वन्द्वगृहीतानामिति ।**

[९-६] 'प्रधानमरुतो वारिपतिरग्निश्च मारुत' इत्यत्र मरुच्छब्देन विवक्षिता इत्यत आह प्रधानमरुत्स्विति [९-६] प्रधानमरुत्सु विद्यमानो यः प्रवहवायुः स एक एव सूर्यादिभ्यः पूर्वं विज्ञेयः । तदन्ये अत्र विवक्षिता इति भावः । इतः परं टीकायां श्रूयमाणं **सूर्यसोमधर्मादि तत्स्त्रिय इत्यत्र सूर्यसोमधर्माणां मनुपत्न्याश्च साम्यं आदिपदगृहीतानां प्रसूत्यादिस्त्रीणां तदवरत्वं** [९-७] ॥ इति वाक्यद्वयं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेवं विज्ञेयम् । आदिपदेन प्रसूत्यादिस्त्रीणामगृहीतत्वात् संकरप्रसक्त्यभावेन विवेककथनवैय्यर्थ्यात् । ननु प्रधानमरुद्भ्यः वारिपतिरुत्तमः स कथं तदनन्तरं पठित इत्यत आह **वारिपतिरिति** [९-८] ॥ उपलक्षणमेतत् अग्निरपि प्रधानमरुद्भ्यः पूर्वंग्राह्य इति द्रष्टव्यम् । ततश्चायं क्रमः । आदौ सूर्यसोमधर्ममनुपत्न्यः ततो वारिपतिः ततोऽग्निः ततः प्रवह व्यतिरिक्ताः प्रधान मरुतः तदनन्तरं मारुता इति ॥

"न किरिन्द्र इति" [१२-१४] ॥ 'न किरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्नि'त्यस्यायमर्थः । हे इन्द्र त्वदुत्तरः त्वदुत्तमः न किः । नैवास्ति । हे वृत्रहन् त्वत्तः ज्यायान् प्रशस्तः नास्ति इति । **माकिर्नेशदिति** [१२-१४] ॥ 'माकिर्नेशन्माकीं रिषन् माकीं संशारि केवटे । अथारिष्टाभिरागही'ति । अस्यार्थः । हे पूषन् भवान् भक्तहृदयात् **मा किः** नैव **नेशत्** अगच्छत् । नेशगताविति धातुव्याख्यानात् । भक्तहृदयं परित्यज्य नैवान्यत्र गन्तेति यावत् । तथा भक्तान् **माकीं** नैव, **रिषत्** हिंसितवान् । तथा स्वयं केनापि शत्रुणा **केवटे** कूपे, कूपनामसु पाठात् । उपलक्षणमेतत् । कुत्रापि स्थाने **माकीं** नैव **संशारि** मारितः । सर्वथा अवध्य इति

यावत् । अथ तस्मात् त्वं **अरिष्टाभिः** अरिष्टं सूतिकागृहमिति वचनात् सूतिकागृहं यासां ताभिः सह स्त्रीभिः सह इति यावत् । **आगहि** अगच्छेति । **स्मसिस्थातरिति** [१२-१४] ॥ त्वावतः पुरूवसो वयमिन्द्र प्रणेतः । स्मसि स्थातर्हरीणामिति [ऋग्वेदे] अस्यार्थः हे **पुरूवसो** पुरु उत्कृष्टं धनं यस्य तस्य संबोधनम्, हे **प्रणेतः** जगत्प्रवर्तक **हरीणाम्**अश्वानां **स्थातः** स्थापक इन्द्र वयं **त्वावतः** त्वद्वन्तः त्वत्स्वामिकाः **स्मसि** स्मः ॥

चिन्तनादिक्रियाणां च मुक्तावुच्छेदतः सदा ।
किं मया कार्यमादीनां भेदाभेद उदाहृतः ॥ [बृहदारण्यक भाष्यं]

इति प्रमाणानुसारेणाह । **चिन्तनादिभिरिति** [१२-२१] ॥ अत्र चिन्तनादिशब्देन तज्जन्यनीचत्वादयो धर्मा गृह्यन्ते । प्रमाणे चिन्तनादिशब्देन तत्कार्यनीचत्वादीनां ग्रहणात् रूढलक्षणेयमिति ज्ञेयम् । एतेन–चिन्तनादिधर्माणां मनोधर्मत्वात् आत्मना तेषां भेदाभेदकथनं अयुक्तम् इति परास्तम् ।

मनुष्यगन्धर्वपितृगणकार्मिकतात्त्विकाः । देवाः शक्र [ऋग्भाष्ये] इत्यत्र देवा इति पदं एकपदोपात्तमनुष्यादीन्विहाय कार्मिकतात्त्विकयोरेव कथं विशेष्यम् इत्यत आह । **देवा इत्येतदिति** [१२-२४] 'यः पश्यति स्वयं वाक्यम्' [ऋग्भाष्य] इत्यादिनोक्तमर्थं विस्मृत्य स्थितस्य शङ्कानिरासकत्वेन 'एवं स्थित' इति मूलमवतारयति । **तात्किमग्न्यादि देवता इति** [१३-२५] ॥ एतेन–मधुच्छन्दादीनां ततोप्यधमानां ऋषित्वस्य पूर्वमुक्तत्वेन शङ्कानुदय इति परास्तम् ॥

[इति ऋषिच्छन्दोदेवतास्वरार्थादिनिर्णयः]

वायवायाहि ॥ आद्यस्तृच इति [१४-१] ॥ ऋचां समाहारस्तृचः । सुपो धातुप्रातिपदिकयोः [२।४७। इति सुपो लुकि कृते सुङ्निमित्तकस्य तिसृइत्यादेशस्याप्यगमे[1] इति स्थितं भवति । 'ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि' ६।१।३४] इति वार्तिकेन त्रेःसंप्रसारणं उत्तरपदादिऋका लोपश्च भवति । अस्य वार्तिकस्य ऋच्शब्दे परतः त्रिशब्दस्य संप्रस भवति उत्तरपदादेर्लोपो भवतीत्यर्थाभिधायकत्वात् । तथा 'ऋक्पूर पथामानक्षे' [५।४।७४] इति समासान्ते अप् प्रत्यये 'संप्रसारणाच्च' [६।१।१०८] ॥ इति त्रिशब्देकारस्य पूर्वरूपत्वे[3] च तृच इत्यकारान्तः शब्दः सिद्धो भवति । वायव्य इति [१ वायुशब्दात् वायुर्देवतास्येत्यस्मिन्नर्थे 'वाय्वृतुपित्रुषसोयत्' [४।३। इति यत्प्रत्यये 'ओर्गुणः' [६।४।१४६] 'इति गुणे 'वान्तो यि [६।१।७९] इति अवादेशे वायव्य इति रूपं सिद्धं वशब्दो बलवाचीति [१४-२] 'नपुंसके बले वः स्य इत्यभिधानात् वशब्दो बलवाची । वबयोरभेदात् वशब्दोऽपि चीति भावः । अयतेरिणोवेति [१४-२] ॥ अयतेर्बाहुलिके कृते 'अत उपधायाः' [७।२।११६] इति उपधाया वृद्धौ इति रूपम् । तथा इणः 'छन्दीणः' [उणादि २] इति उणि वृद्धावयादेशे आयुरिति रूपं सिद्ध्यतीति भावः । "वात्यायु" भाष्यं योजयति । वाति गच्छतीति [१४-३] ॥ कथमीश्वर रित्यत आह । लोकस्येति । [१४-३] अत्र टीकायां "

कप्रत्यय, इत्यन्तरं इणः छन्दसीति इणः उ

१ अगमे = अभावे । २ त् + ऋ + इ । ३ इकारस्य ऋकाररूपत्वे.

[१४-३] ॥ इति वाक्यं प्रक्षिप्तं न टीकावाक्यम् । **आयुःशब्दात् ददाति इत्यस्मिन्नर्थे तद्धितो डुप्रत्यय** इत्युच्छिन्नम् । ततश्चैवं टीकावाक्यपाठः । वातेः कप्रत्ययः आयुःशब्दात् ददातीत्यस्मिन्नर्थे तद्धितोडुप्रत्यय इति ॥ अवश्यं चैतदेवं विज्ञेयम् । वात्यायुरिति भाष्ये वायुशब्दनिष्पत्यर्थं, आयुःप्रदत्त्वार्थकायुःशब्दान्तर्गतत्वेनायुःशब्दस्योपात्तत्त्वेन टीकायामपि लोकस्य प्राणधारणहेतुत्वादित्यनेन आयुःशब्दप्रवृत्तिनिमित्तस्योक्तत्वेन इण्धातुं गृहीत्वा रूपासिद्धिकथनायोगात् । छन्दसीण [उणादि. २] ॥ इति सूत्रपाठं विहाय इणश्छन्दसि इति अन्यथा पाठाच्च । **वातेर्गत्यर्थत्वेति** [१४-४] भाष्यकारीयं ज्ञानात् इति वातेर्व्याख्यानं उपपन्नमिति शेषः । **कृवापाजीति ।** [उणादि १] [१४-४] अनेन वातेरुण् 'आतो युक् चिण् कृतोः' [७।३।३३] ॥ इति युगागमः । एवं च **वायु**रिति रूपं सिद्धं भवतीत्युक्तं भवति ।

वृणोतेरिति [१४-५] ॥ वृणोतेर्डायुप्रत्ययः डित्वाट्टिलोपः ततश्च **वायु**रिति रूपम् । **वातेरधिकरण** इति [१४-६] ॥ वातेरुण्प्रत्यये 'आतो युक् चिण् कृतोः' [७।३।३३] इति युगागमे च सति **वायु**रिति रूपं सिद्धमिति भावः । " वयबन्धन इति " [५-३] ॥ भाष्यस्यानन्वितत्वात् भाष्यमनूद्य शेषमाह **वयबन्धन इत्यस्मादिति** [१४-६] वयबन्धन इत्यस्मादिति भाष्यानुवादः । **धातोः कर्तर्युणि कृते बन्धकत्वाच्च वायुर्भवतीति** [१४-६-७] शेषोक्तिः । **उपसर्गेकारस्येति** [१४-७] तृतीयोतिशये [महाव्याकरणे] इति वचनात् इकारस्याकार इत्यर्थः । **वेत्य-**

स्मिन्निति ... [ऋग्भा. ५-४] ॥ भाष्याभिप्रेतरूपसिद्धिमाह । विपूर्वादिति [१४-८] विपूर्वादिणः । ' छन्दसीणः ' [उणादि २] इति उण् इत्यर्थः । वय श्रेष्ठत्व [५-४] इति भाष्यस्यापूर्णत्वात् भाष्यमनूद्य शेषमाह । वयःश्रेष्ठत्व इतीति [१४-८] ॥ ' वयःश्रेष्ठत्व' [१४-८] ॥ इति भाष्यानुवादः । धातोरुणि कृते श्रेष्ठत्वात् [अपि] वायुरिति [१४-८] ॥ शेषोक्तिः । अपि [१४-८] ॥ शब्दस्तु भाष्यस्थ एव, अन्वयप्रदर्शनाय शेषेण सहोक्त इति द्रष्टव्यम् । श्रेष्ठत्ववाचित्वात् अक्रियावाचिनो वयतेः कथं धातुत्वमित्यत आह । श्रेष्ठत्वं नामेति [१४-९] ॥ धातुव्याख्याने लक्षणायाः काप्यदृष्टत्वात् कथमत्र लक्षणेत्यत आह ॥ गडिवदनैकदेश इतीति । [१४-९] ॥ वदकदेश इत्यस्य यथा क्रियालक्षणत्वं तथाऽत्रापीति भावः ॥ ये धर्माः अन्यत्र निषिद्धाः अन्यत्र तज्ज्ञानमनर्थहेतुरिति ये उक्ताः त एवान्यत्र न प्रतिपत्तव्याः । उक्तप्रकारेण अनिषिद्धास्तु यथायोगं अन्यत्र प्रतिपत्तव्या इति मूलार्थं मनसि निधाय भगवद्धर्माणां अन्यविज्ञाननिषेधकवाक्यं स्फोरयितुं भाष्यस्थपदमनूद्य स्फोरकमाह । अनिषिद्धा इति ॥ अनिषिद्धा इति [५-७] ॥ भाष्यानुवादः । ये भगवतो लक्षणभूता न भवन्ति [१४-९] इति तु " हरेर्गुणाः सुरा प्रोक्ताः ते मे स्युरिति चिन्तनम् । सुरापानमितिप्रोक्तम् ..... ' इति वचनस्य स्फोरकमिति विवेकः । ये लक्ष्मीपतित्वादयः नान्यत्र प्रतिपत्तुं योग्यास्तेऽन्यत्र न सन्त्येव बलत्वादयनाच्चैवेत्यादिना उक्तास्तु अन्यत्रापि तारतम्येन सन्तीति भावः । ननु भाष्ये दृष्टि तत्त्वात् इति वक्तव्यम् । कथं ततदृष्टित्वात् [५-७] इत्युक्तिरित्यत आह । दर्शित इत्यस्य तात्पर्य मिति [१४-१२] ॥ प्रयोज-

कत्वादिति। [१४-१७] ॥ वेदो हि प्राणिनां फलप्राप्तये प्रवृत्तः। अतः यादृशार्थविज्ञाने अधिकारिणां फलं भवति स एव वेदार्थ इत्यर्थः। **गुणाधिक्यविरोधिन इति** [१७-१८] ॥ गुणाधिक्यविरोधिनः वेदार्थता नास्ति। तद्विज्ञानेन फलाभावादित्यर्थः। नहि स्वार्थ-ज्ञानद्वारा प्राणिनां फलप्राप्तये प्रवृत्तो वेदः फलसाधनमर्थं न [ ] प्रतिपादयति इति भावः। वेदमात्रे अयमस्यार्थ इति विशेषः कथं प्रतिपत्तव्य इति पृच्छति। **फलवत्त्वेपीति।** [१४-१९] ॥ वेदस्य प्राणिनां फलार्थं प्रवृत्तत्वेऽपि अयमेवार्थः कुतः. अर्थान्तर-प्रतिपादनेऽपि फलवत्त्वसंभवात् नियामकाभावादिति भावः। **यत्र यस्यार्थस्यानुकूला इति।** [१४-२०] ॥ इतःपरं टीकायां श्रूयमाणं **उपक्रमादयः खल्वर्थस्य निश्चायकाः तत्र च फलं सर्वाधिकम्** [१४-२०] ॥ इति वाक्यद्वयं प्राक्षिप्तम्। न टीका-वाक्यम्। अवश्यं चैतदेवं विज्ञेयम्। वाक्यार्थनिर्णायकमात्रस्य पृष्टत्वेन तदुत्तरस्य 'उपक्रमादयो यत्र तात्पर्यार्थः स एव हि' [५-९] ॥ इति भाष्येणैव जातत्वेन **उपक्रमादयः खल्वर्थस्य निश्चायकाःतत्र च फलं सर्वाधिकम्** [१४-२०] इत्युक्तिप्रयोजनाभावात्। ननु तान्पाहीति विभक्तिव्यत्ययः कुत इति शङ्कानिवारणाय 'गुणाधिक्यं येन भवेद्वेदस्यार्थः स एवहि। प्रयोजकत्वान्नान्यस्य फलाभावस्तदर्थता.' [ऋग्भाष्ये ५-८] इत्यनेन येन फलं भवेत् स एव वेदार्थ इत्युक्तौ अस्तु फलं 'तेषां पाहि' [ऋ. अ. १, व २, मं. १,] इत्यस्य तान्पाहीति व्याख्यानं कुतः अन्यदेव व्याख्यानं किं न स्यात् इति शङ्का प्राप्नोति। तन्निवारणाय मूलकृता 'उपक्रमादयो यत्र तात्पर्यार्थः स एव हि' [भा. ५-९] इत्युक्तम्। न च तान् पाहीति

व्याख्यानं कर्तव्यमित्यत्रोपक्रमादयो नियामकाः सन्ति । तत्र च भाष्य-मयुक्तमिति शङ्कानिवारणाय टीकाकृता 'उपक्रमादयः खल्वर्थस्य निश्चायकाः तत्र च फलं सर्वाधिकम्' [१४-२०] इति फलमेव तान् पाहीति व्याख्यानस्य ग्राह्यत्वे नियामकमुक्तमिति प्रतिपादितमित्युक्तमिति चेन्न । उपक्रमाद्यन्तर्गतस्य फलस्य फलप्रतिपादकवाक्यरूपत्वेनात्रोक्त-फलरूपत्वाभावात्। **भावेऽनुपसर्गस्य** [३।३।७५]इति। [१४-२१] सूत्रस्यायमर्थः। अनुपसर्गस्य ह्वयतेः भावे अप्प्रत्ययः संप्रसारणं चेति । ततश्च व्हेञ् इत्यतः अप् प्रत्यये (य) ह्वयतेः संप्रसारणे 'संप्रसारणाच्च' [६।१।१०८]॥ इति पूर्वरूपे हु अप् इति स्थितं भवति । ततो गुणे अवादेशे **ह्वयमिति** रूपम् । **श्रुशृणुपृकृवृभ्यश्छन्दसीति** [६।४।१०२] [१४-२०] श्रुशृणुपृकृवृ इत्येतेभ्यः छन्दसिविषये हेर्धिरादेशो भवतीति सूत्रार्थः॥ १ ॥

वायउक्थेभिः॥ स्तुतिकर्मास्विति [१४-२६] ॥ स्तुत्यर्थकेषु गृणाति जरते ह्वयते इति पाठादित्यर्थः । ॥ २ ॥

वायो तव ॥ उरुशब्दात् 'वोतोगुणवचनात्' [४।१।४४] इति ङीपि उर्वीतिभाव्यं तदभावपक्षे उरुरिति भाव्यं एवमपि यत् ऊरू इति दीर्घस्य ची इति चकारस्य यदाधिक्यं तेन लब्धमर्थमाह । **अतिम-हतीति** [१५-१] ॥ **आतोनुपसर्गे क इति** [३।२।३] [१५-२] ॥ पायान इत्यस्मादनेन सूत्रेण कप्रत्यये 'आतो लोप इटि च' [६।४।६४]॥ इत्याकारलोपे **सोमपइत्यकारान्तं** रूपं भवति । दाशृ-धातोर्लिटि तस्य क्वस्वादेशे द्विर्वचने वसोः संप्रसारणम्' [६।४।१३१] इति संप्रसारणे ददाशुष इति भवितव्यम् । दाशुष इति कथं साधुरित्यत आह । **निपातनादिति** [१५-२] ॥

'दाश्वान्साह्वान्मीढ्वांश्च' [६।१।१२] इति सूत्रेण दाश्वानिति निपातनात्साधुरित्यर्थः । **जिगातीति** [१५-२-३] ॥ स्तुत्यर्थकात् गाधातोर्लटि शपि तस्य श्लौ 'श्लौ' (६।१।१०) इति द्विर्वचने 'सृजामित्' [७।४।७६] इत्यधिकृत्य उक्तेन 'बहुलं छन्दसि' [७।४।७८] इति सूत्रेण अभ्यासस्येत्वे **जिगाति** इति रूपं भवति । **उरुं अञ्चतीति** [१५-४-५] ॥ उरुशब्दे उपपदे अञ्च् धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' [६।२।५९]॥ इति सूत्रेण क्विन् प्रत्यये नकारलोपे 'उगितश्च' [६।३।४५] इति ङीपि [भसंज्ञायां 'अचः' [६।४।१३८] इति सूत्रेण अकारलोपे 'चौ' [६।३।१३८] इति सूत्रेण उकारस्य दीर्घत्वे **उरूचीति** रूपमिति भावः" । **द्वितीयस्तृच इति** । [१५-६] **तृचः** । तिसृणां ऋचां समाहारः । **ऐन्द्रवायवः** । इन्द्रवायुदेवताकः । इन्द्रवायुशब्दात् अस्य देवतेत्यर्थे अण् आदिवृद्धा **वैन्द्रवायव** इति रूपम् ॥ ३ ॥

इन्द्रवायू ॥ औणादिको रप्रत्यय इति [१५-७] 'ऋज्रेन्द्राग्रवज्रविप्रकुत्रचुव्रक्षुरक्षुरभद्रोग्रभेरीभेलशुक्रशुक्रगौरवभ्रेरामालाः' [उणादि १९६] इति सूत्रेण ऋज्रेन्द्रादिशब्दानां रन्प्रत्ययान्तानां निपातनात् औणादिको रन्प्रत्यय इति भावः । **पूर्ववदिति** [१५-८] इदं शब्दोपदात् दृशेर्ड इत्यर्थः । दृशेः दुधातुना इदंशब्दोपपदत्वेन साम्यमिति भावः । **रप्रत्यय इति** [१५-९] रन्प्रत्यय इत्यर्थः । **रातेः क इति** [१५-१०] ॥ इदंशब्दोपपदात् रातेः क आकारलोपः इदं शब्दस्येन्दादेशश्च । ततश्चेन्द्र इति रूपामिति भावः।

मनोवृत्तय इति [१५-११] मनोवृत्त्यभिमानिदेवता इत्यर्थः । ननु ऋचि कथं **प्रयोभिः** इति प्रयोग इत्यत आह । ईयसुन इति [१५-१२] यद्यपि प्रियशब्दादीयसुन् प्रत्यये 'प्रियस्थिर.....' [६-४-१५७] इति सूत्रेण प्रियशब्दस्य प्रे इत्यादेशे गुणे च प्रेयोभिरिति भाव्यम् तथापि ईयसुन इकारस्य अकारादेशे प्रशब्दाकारस्यापि लोपे **प्रयोभिरिति** छान्दसं रूपमिति भावः । ननु गमेर्लोटि तस्य थस् आदेशे तस्य 'तस्थस्थमिपां तांतन्ताम :' [३।४।१०१] इति सूत्रेण तमादेशे शपि 'इषुगमियमां छ :' [७।३।७७] इति मकारस्य छत्वे गच्छतामिति भाव्यं कथं गतमिति प्रयोग इत्यत आह । **छान्दस** इति [१५-१२] उपलक्षणमेतत् । शपो लुक् चेत्यपि द्रष्टव्यम् । **ननु परमेश्वर इति** । (१५-१३) द्विवचनस्य वस्त्वन्तरसहिते प्रयोगनियमात् कथं केवले परमेश्वरे द्विवचनप्रयोग इत्यत आह । **द्विरूपत्वादितीति** (१५-१४) भिन्नवस्तुसाहित्यं विनापि भगवतो द्विरूपत्वात् द्वयोःरूपमिव रूपं यस्यासौ द्विरूपः । तस्य भावः द्विरूपत्वं तस्मात् घटपटयोरिव द्वित्वसंख्याव-च्छिन्नत्वात् द्विवचनमिति भावः । एतेन रूपद्वयवत्ेऽपि न द्विवचन-मुपपन्नं भवति । द्विवचनवाच्यसंख्याया अलाभात् । अन्यथा बहुधर्म-वत्त्वात् घटोऽपि बहुवचनविषयः स्यादिति निरस्तम् । द्वित्वसंख्याया भगवत्युक्तत्वात् । **नन्वेकस्यैव हरेरिति** [१५-१४] केवलस्य हरेः घटपटयोरिव कथं द्वित्वम् । येन सह यस्य द्वित्वं तयोर्भेद इति नियमात् स्वस्य च स्वस्माद्भेदाभावादिति भावः । **काठके तं दुर्दर्शमित्यादिनेति** (१५-१८) अत्र काठके तं दुर्दर्शमित्यादिना परमेश्वरस्याने-

कान् धर्मानुक्त्वा [१५-१८] इत्यतः परं टीकायां श्रूयमाणं ' एकमेवाद्वितीयम् ' [१५-१८] इति वाक्यं प्रक्षिप्तम् । ' नेह नानास्ति किंचन ' इति वाक्यमुच्छिन्नम् । अवश्यं चैतदेवं विज्ञेयम् । काठके एकमेवाद्वितीयमिति वाक्याश्रवणात् । नेह नानास्ति किंचनेति वाक्यस्य श्रवणात् ॥ ततश्चैवं टीकावाक्यपाठः । काठके तं दुर्दर्शमित्यादिना परमेश्वरस्यानेकान् धर्मान् उक्त्वा नेह नानास्ति किंचनेत्येवं पुनः पृथक्त्वस्य निषेधात् ॥ ४ ॥

वायविन्द्रश्च चेतथः ॥ वाजमन्नमिति [१५-२०] वाजशब्दे उपपदे नयतेः ' सत्सूद्विष····' [३।२।६१] इत्यादिना क्विपि वाजिनीरिति भवति । ततो वसतेरुकारप्रत्यये **वाजिनीवसुरिति** उकारान्तरूपं भवतीति भावः । ननु विपूर्वकात् ज्ञा धातोः लटि तस्य थसादेशे कृते ' क्र्यादिभ्यश्ना ' [३।१।८१] इति श्नप्रत्यये ईहल्यघोः [६।४।११३] इति इकारे ' ज्ञाजनोर्जा ' [७।३।७९] इति जादेशे विजानीथ इते भवितव्यम् । **विजानत** [भा. ५-५-१६] इति रूपं कथमित्यत आह । **द्विविकरणतेति** [१५-२२] ॥ श्नाविकरणत्वं शब्विकरणत्वं चेत्यर्थः । विपूर्वकात् ज्ञाधातोः श्नाप्रत्यये छान्दसतौदादिकशप्रत्यये 'श्नाभ्यस्तयोरातः' [६।४।११२] इत्याकारलोपे ' ज्ञाजनोर्जा ' [।७३।७९] इति ज्ञाधातोर्जा इत्यादेशे थसस्थकारस्य तकारे **विजानत** इति रूपं भवतीति भावः । विजानत.. [५-१६] इति भाष्यस्थं पदं [illegible]मित्यभिप्रेत्याह । **यद्देति** [१५-२४] **चेतथ** इति [१५।२४], अत्र तकारस्य थकारः छान्दस इति भावः ॥ ५ ॥ ३ ॥

वायविन्द्रश्च सुन्वतः । नपूर्वादिति [१६-५] ॥ निषेधार्थकनशब्दपूर्वकत्वेन नञ्पूर्वकत्वाभावात् 'नलोपो नञः' [६।३।७३] इति नलोपाभाव इति भावः । **रीङ् क्षय इति** [१६-५] नपूर्वात् रीङो ङः तथा नपूर्वात् रिषेर्ड इति भावः । **तृतीयस्तृच इति ॥** [१६-८] तृतीयस्तिसृणां ऋचां समुदायः । मैत्रावरुणः [१६-८] मित्रावरुणदेवताकः । मित्रश्च वरुणश्चेति विग्रहे 'देवता द्वन्द्वे च' [६।३।२९] इति सूत्रेण पूर्वपदस्याऽऽनङादेशे मित्रावरुणाविति स्थिते । 'सास्य देवता' [४-२-२४] इत्यणि कृते **मैत्रावरुण** इति रूपम् ॥ ६ ॥

मित्रं हुवे ॥ ननु त्रैङ् पालन इत्यस्यात्मानेपदित्वात् त्रायत इति भवितव्यम् । कथं त्रातीति भाष्ये प्रयोग इत्यत आह । **प्रकृत्यन्तरस्येति** [१६-८९] ॥ त्रा रक्षण इत्यस्येदं रूपमिति भावः । **मा त्रा इत्येताभ्यामिति** [१६-९] ॥ माङ् माने त्रैङ् पालने इत्येताभ्यां कप्रत्ययः 'आदेच उपदेशेऽशिति' [६।१।४५] इति ऐकारस्य आत्वं ततो 'आतो लोप इटि च' [६।४।६४] इत्याकारलोपः । माङः आकारस्य इकारः । ततश्च **मित्र** इति रूपं सिद्धम् । **मितशब्दोपपदादिति** [१६-१०] मितशब्दोपपदात् करोत्यर्थकात् रातेः कप्रत्यय उपपदान्त्यलोपश्चेत्यर्थः । कस्येत्संज्ञायामकारमात्रमवशिष्टं भवतीत्यभिप्रायेणाकार इत्युक्तमिति बोध्यम् । **त्रमन्ता ड्ड** [उणादि १११] **इतीति** [१६-११] अत्र डकारस्येत्संज्ञा न्यायप्राप्ता रण्डावण्डेत्यादिरूपसिद्धिस्तु औणादिकप्रत्ययानां बाहुलिकत्वात् डकारस्येत्संज्ञाभावे भवतीति ज्ञेयम् ।

वृणोतेरुनादिति [१६-१२] गुणे कृते णत्वे च वरुणमिति रूपमिति भावः। **वरशब्दोपपदादिति** [१६-१३]॥ वर उत् नी इति स्थिते डप्रत्ययः वरशब्दान्तस्य उत्शब्दान्तस्य च लोप इति भावः। **ह्वयतेरिति** [१६-१५] ह्वयतेरात्मनेपदस्य इडादेशे 'बहुलं छन्दसी'ति [६।१।३४] संप्रसारणे 'संप्रसारणाच्च' [६।१।१०८] इति पूर्वरूपे शपो लुकि'टित आत्मनेपदानां टेरे' [३।४।९७] इति इति इटो एत्वे उवङादेशे च **हुवे** इति रूपं सिद्धं भवतीति भावः। **यथार्थत्वमिति** [१६-१८] बुद्धया विवेकेनेति शेषः॥ ७॥

ऋतेन॥ तस्मात् ऋतावृध इति [१६-२०] यस्मात् नित्यवृद्धः तस्मात् ऋतावृधशब्दार्थ इत्यर्थः। इतः टीकायां श्रूयमाणं **ऋतमनुगतं सर्वकाल** [१६-२०] **इति च प्रक्षिप्तम्**। न टीकावाक्यम्। तस्मात् **ऋतावृधः ऋतशब्दो नित्यपर्यायः** इति टीकावाक्यपाठः। अवश्यं चैतदेवं विज्ञेयम् ऋतं अनुगतं सर्वकाल इति योगाश्रयणे सर्वकालवर्तिनो वस्तुविशेषस्य ऋतशब्दाल्लाभेऽपि सर्वकालस्यालाभात्। प्रकृते च ऋतशब्दार्थतया सर्वकालस्य वक्तव्यत्वात्। **ऋतशब्दो नित्यपर्याय इति**। [१६-२०] कालवाचकनित्यशब्दपर्याय इत्यर्थः। **यथार्थत्वादिति**। [१६-२१] यद्यपि याथार्थ्यं प्रमाणत्रितयानुगतं तथाप्यसाधारण्येन व्यपदेशा भवन्तीति न्यायेन ऋतशब्देन वेद उच्यत इति भावः। ननु ऋतुमित्यत्र 'अधीगर्थदयेशां कर्मणि' [२।३।५२] इति वचनात् षष्ठ्या भाव्यमित्यत आह। **छन्दस्त्वादिति**। [१७-२]॥ ८॥

कवीनः॥ अत्र दक्षमितीति [१७-९] भाष्यस्थं दक्षमिति पदं दक्षं प्रति अपसं कर्तारं दक्षं दधात इति पूर्वोत्तरयोः संयोज्यमि-

त्यर्थः । [९।४।२] **द्वादशर्चं सूक्तमिति** [१७-१०] द्वादशानां ऋचां समाहारः द्वादशर्चम् । **आश्विन** इति [१७-१०] अश्विदेवताक इत्यर्थः । अश्विन्शब्दात् अस्य देवतेत्यर्थे अणिकृते **आश्विन** इति रूपम् । एवं उत्तरत्रापि द्रष्टव्यम् [॥९॥४॥२॥]

अश्विनायज्वरीः॥ शुभाधिपाविति भाष्यस्थपदस्य व्याख्येयं पदद्वयमिति भावेन पदद्वयं संहितारूपेणानुवदति । **शुभस्पती** इति । [१७-११] शुभःपती इति स्थिते षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु, [८।३।५३] इति सूत्रेण भकारान्तशुभ्शब्दोत्तर षष्ठीविसर्गस्य सकारादेशे **शुभस्पतीति** संहितासिद्धिः । शुभधातोः क्विपि शुभ् इति शब्दस्य भकारान्तत्वमिति बोध्यम् । इतःपरं टीकायां श्रूयमाणं **पारस्करादि (रप्रभृति) त्वात्सुडिति** [१७-१२] वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । शुभस्पतीतिरूपस्यान्यथासिद्धत्वेन सुडभिधानप्रयोजनाभावात् । अस्य सूत्रस्य संज्ञायां ससुट्कशब्दनिपातविधायकत्वेनानेनात्र सुडभिधानायोगाच्च । अत एव क्वचित्कोशे इदं वाक्यं न दृश्यते । **यजतेरिति** [१७-१३] यजेर्बाहुलिकः ड्वरच् । टकारस्य लोपः। टित्त्वात् ङीबिति भावः । **चनस्यतामिति** [१७-१३] अनेकार्थत्वाद्धातूनां योगार्थाया श्चायतेः (चायृधातोः) बाहुलिकत्वात् असुन् प्रत्यये तस्य नुडागमे 'लोपो व्योर्वलि'[६।१।७६] इति यकारलोपे धातोर्ह्रस्वत्वे च सति चनस इति रूपम् । ततः स्वार्थे क्यचि ' सनाद्यन्ता धातवः ' [३।१।३२] इति धातुसंज्ञायां ततो लोट् मध्यमपुरुषद्विवचने **चनस्यतामिति** रूपमिति बोध्यम् । एतेन 'चायतेरन्ने ह्रस्वश्च' [उणादि ६४९] इति सूत्रेणान्नेवाच्ये असुन् प्रत्यये नुडागमह्रस्वत्वानां विधानात् चनस्शब्दोऽन्नवाची । ततश्च संयोजयत-

मिति व्याख्यानमनुपपन्नमिति–परास्तम् । **ऊर्णूञ्**इत्यादिति । [१७-१५] आशूपपदाद्भृत्यर्थकात् वाधातोः इनिप्रत्ययः स च कित्वेन विवक्षितः । उपपदादेः ह्रस्वः अन्त्यलोपश्चेति भावः । **अशूव्याप्ना-वित्यत इति** [१७-१६-१७] अस्माद्धातोर्विनिप्रत्ययो भवतीति भावः **'तद्धिताः' इतीनिति** । तद्धिताः [१७-१७] इति बहुवचनज्ञापित इनिरित्यर्थः ॥ १ ॥

अश्विना पुरुदंससा ॥ नरौ पूर्ववदिति [१७-१९] नरौ अचलौ । अविनाशिनाविति पूर्ववद्व्याख्येयमित्यर्थः ॥ २ ॥

दस्रा ॥ ततो र इति [१७-२१] दस् इत्येतस्मात् 'स्फायितंचिवंचि शकि क्षिपि क्षुदि सृपि तृषि दृपि वन्युन्दिश्रिति वृत्र्यजिनीपदिमदि मुदि रिवदि छिदि भिदि मन्दि चन्दि दहि दसि दम्भि वसि वाशि शीङ् हसि सिधि शुभिभ्योरक्' [उणादि १७८] इति रक्प्रत्यय इत्यर्थः । **युवयोरिति** [१७-२२] युष्मच्छब्दात् युवयोरिदमित्यर्थे आकुप्रत्ययः युष्मच्छब्दस्य युवादेश इति भावः । **उपपदस्य[च]द इति** [१७-२६] उपपदान्तस्य द इति । **भावे अनिरिति** । [१८-१] 'वृतेश्च' । [उ. २७-१] इति सूत्रेणानिप्रत्यय इति भावः । **रूद्रमरुद्वृत्तिययोस्ताविति** । [१८-१२] 'अनुर्ल-क्षणे' [१।४।८४] इति सूत्रेण अनोः कर्मप्रवचनीयसंज्ञाविधानात् 'कर्मप्रवचनीययुक्ते द्वितीया' [२।३।८] इति द्वितीयेति भावः ॥३॥

इन्द्रायाहि चित्रभानो ॥ एकोऽर्थ इति । [१८-५] इतःपरं टीकायां श्रूयमाणं **चित्रमालेख्यमद्भुतमित्यभिधा-नात्** [१८-५] इति वाक्यं प्राक्षिप्तम् । न टीकावाक्यम् [प्रतिज्ञा-

तस्य चित्रभद्रशब्दयोः पर्यायत्वस्य [illegible]त्वात् । **भानुशब्दार्थमिति** । [१८-९] भानुशब्दस्य अर्थो यस्य रश्मय इति पदस्य तद्रश्मय इति पदमनूद्य ज्ञानमिति व्याख्यातमित्यर्थः । एतेन व्याख्यानाय व्याख्यातव्यपदस्यैवानुवाद्यत्वेनार्थस्यानुवाद्यत्वायोग इति परास्तम् । **युष्मद इति** । [१८-१३] युष्मदः क्यचि 'प्रत्ययोत्तरपदयोश्च [७।२।९७] इति त्वादेशे 'युष्मदस्मदोरनादेशे' [७।२।८६] इति अविभक्तावपि व्यत्ययेनाऽऽत्वे 'क्याच्छन्दसि' [३।१।१७०] इति डकारप्रत्यये जसि च **त्वायव** इति रूपं भवति इति भावः । **अनेनेति** [१८-१८] सोमेष्वभिमानिसद्भावव्युत्पादनेनेत्यर्थः । ॥४॥

इन्द्रायाहि ॥ इषितोऽधीष्ट इति । [१८-१९] इष्धातोः क्तप्रत्यये 'तीषसह....' [७।२।४८] इति इडागमे **इषित** इति रूपम् । वेदृत्वादिडभावे अधीत्युपसर्गयोगे **अधीष्ट** इति टीकायां प्रयुक्तं रूपमिति द्रष्टव्यम् । **विप्रजूत इति** । [१८-२०] जुगतावित्यस्मात् अन्तर्णीतण्यर्थात् क्तप्रत्यये धातोर्दीर्घेच **जूत** इति रूपम् । **वाघत इति** [१८-२०] वच परिभाषण इत्यस्मात् लटि तस्य शत्रादेशे चकारस्य छान्दसे घकारे आदेश्च छान्दसे दीर्घे जसि च **वाघत** इति रूपम् । **अनर्थान्तरमिति** । [१८-२३] न विद्यते अर्थान्तरं यस्य तदनर्थान्तरम् । पर्याय इति यावत् ॥५॥

इन्द्रायाहि तूतूजानः ॥ तुज गत्यर्थ इति । [१८-२५] अस्मात् यङि तस्मिन् द्विर्वचनं अभ्यासलोपः । दीर्घोऽकितः [७।४।९४] इति अभ्यासस्य दीर्घः यङो लुक् ततश्चानश्

इति भावः। **हरिनामकैरिति**। [१९-२] अश्वविशेषाणां हरिरिति संज्ञा। यद्यपि 'हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु। सिंहाश्वकपिभेकादिशुकलोकान्तरेषु च' इति विश्वकोशोक्तेर्हरिशब्दः अश्वमात्रवाची। तथापि इह हरिशब्देन नाश्वमात्रं विवक्षितं किंतु येषामश्वानां हरिरिति विशेषसंज्ञा त एवात्र विवक्षिता इति भावेन हरिनामकैरित्युक्तम्। अन्यथा हरिभिरश्वैरित्यवक्ष्यत्। **अन्तर्णीतण्यर्थ इति** [१९-२] वृतेरन्तर्णीतण्यर्थात असुन् डिच्चेति भावः। **वातेर्वेति**। [१९-३] वातेरसुन् डिच्चेति भावः। **हरिनामकाश्ववानितीति**। [१९-३] पूर्वं हरिवा इत्येतत् हरिशब्दपूर्वकस्य वृते रूपमित्यङ्गीकृत्य व्याख्यातम्। इदानीं तु हरिवा इत्येतत् हरिशब्दात् मतुपि **हरिवा** इति रूपं भवतीत्यभिप्रेत्य व्याख्यातामिति भेदः। **अथवा हरिणेति**। [१९-४] हरिशब्दोपपदात् वृतेरसुन् प्रत्ययो डिच्चेति भावः। **चनो मन इति**। [१९-५] मनु अवबोधन इत्यस्मात् असुन् प्रत्यये व्यत्ययेन मकारस्यचकारे **चन** इति रूपमिति भाव :। **दाधिष्व धत्स्वेति**।[१९-५) धात्वोर्कोटि थासि तस्य 'थास : से' [३।४।८०] इति सेभावे 'स वाभ्यां वामौ'। [३।४।९१] इति एकारस्य वकारे शप : 'जुहोत्यादिभ्यः श्लुः' [२।४।७५] इति श्लुशब्दाभिधेयलोपे 'श्लौ' [६।१।१०] इति द्विर्वचने अभ्यासस्य जस्त्वे, 'छन्दस्युभयथा' [३।४।११७] इति आर्धधातुकत्वात् इडागमे 'आतो लोप इटि च' [६।४।६४] इति धात्वाकारलोपे षत्वे च **दाधिष्व** इति छन्दसि रूपम्। धात्वोर्लोटि थासि शपः श्लुर्द्विर्वचनं अभ्यासस्य जस्त्वं 'श्नाभ्यस्तयोरात' [६।४।११२] इति धात्वाकारलोपः। एकाचो बशो भष् झषन्तस्य

स्ध्वोः [८।२।३७] इति दकारस्य धकारे 'खरिच' [८।४।५५] इति चर्त्वे धत्स्व इति भाषायां रूपमिति ज्ञेयम् ॥६॥५॥

ओमासः॥ ओंशब्दसमानार्थ इति। [१९-८] ततश्चओशब्दोपपदात् मानिर्माण इत्यस्मात् कर्मणि कप्रत्ययः आकारलोप इति भावः। अवतिरूपत्वादिति। [१९-१० अवतेः क्विपि ज्वरत्वर...[६।४।२०] इति उपधायाः वकारस्य च ऊठि द्वयोरूठोः सवर्णदीर्घे ऊकारस्य बाहुलिके ओकारादेशे ओ इति रूपमिति भावः। उपसर्जनस्येति। [१९-११] शौण्डादेराकृतिगणत्वात् 'सप्तमी शौण्डैः' [२।१।४०] इति समासे माङ्त्येतस्य सप्तम्यन्तस्योपसर्जनत्वात् यद्यपि पूर्वनिपातः प्राप्नोति तथापि छान्दसः परनिपात इति भावः। वः किच्चेति। [१९-१२] 'अशू[illegible]णेखटिविशिभ्यः कन्', [उणा. १५७] इति विहित कन्प्रत्ययस्यानुवाद इति भावः। आगत आगच्छतेति। [१९-१९] गमेर्लोटि तस्य थादेशे तस्य 'तस्थस्थामिपां त तन्तामः' [३।४।१०१] इति तादेशे बहुलं छन्दसि [२।४।७६] इति शपो लुकि 'इषुगमियमां छः' [७।३।७७] इति छत्वाभावे 'अनुदात्तोपदेश....' [६।४।३७] इति मकारलोपे आगतेति रूपम् ॥७॥

विश्वदवासः। एवशब्देनेति। [१९-२०] उस्रास्तुरश्मयश्चैवे [६-२१ भा] त्येवशब्देन उस्रशब्दस्य रश्मिवाचित्वं अभिधानसिद्धेमिति न निर्वचनापेक्षेति भावः ॥८॥

विश्वे देवासो आश्रिधः॥ दुहः क्लेशार्थ इति। [१९-२५] अनेकार्थत्वाद्धातूनां दुहःक्लेशार्थः। न विद्यते दुर्गिति

दुहेः क्विपि 'वां दुहमुहष्णुब्रूष्णिहाम्' [८।२।३३] इति हस्यधत्वे चर्त्वे भष् भावे च धृगिति रूपम्। जुषंत जुषतेति [१९-२६] जुषी प्रीतिसेवनयोः इत्यस्मात् लोटि तस्य व्यत्ययेन परस्मैपदे तस्य थादेशे तस्य तस्थस्थ मिपइति तादेशे प्राप्तेऽपितं बाधित्वा छान्दसे अन्तादेशे जुषन्त इति छन्दसि रूपम्। तादेशे सति जुषत इति भाषायां रूपमिति द्रष्टव्यम्। वहतोरिति। [१९-२६]–'वहि श्रिश्रुयुग्लाहात्वरिभ्योनित्' (र्)। [उणादि ५००] इति निप्रत्यय इत्यर्थः ॥ ९ ॥

पावकानः ॥ सरसः ससार इति। [२०-२]। अत्र सरस इति भाष्यपदानुवादः। तस्य ससार इति व्याख्यानमिति द्रष्टव्यम्। रसाकारलोप इति। [२०-३]। सरसशब्दान्तस्याकारस्य लोप इत्यर्थः। तद्धत्वात् तत्प्रियत्वत इति। वायुः सरस्वानिति शब्दित इति शेषः। तत्प्रियेति। [२०-६]॥ वायुप्रियेत्यर्थः। तएवेति। [२०-७]॥ गुणा एव धनमित्यर्थः। अस्मिन् निर्वचने सरःशब्दान्तलोपो द्रष्टव्यः। ननुहरावितिः। [२०-७]। हरौ कथं स्त्रीलिङ्गप्रयोगः। न च स्त्रीत्वात् स्त्रीलिङ्गप्रयोग इति वक्तुं शक्यम्। अग्न्यादिषु पुल्लिङ्गशब्दप्रयोगानुपपत्तिप्रसंगादित्यर्थः। पृच्छति। एवं चेदिति। [२०-८] नन्वयमर्थः भाष्यान्नलभ्यत इत्यत आह। अस्य तात्पर्यमितीति। [२०-१]। स एव वाजिनी इति। [२०-११]। एकारस्य इकारः। ऐकारस्य ईकारः छन्दस इति भावः ॥ अविभक्तिक इति।

टीपः—१. वाजेन इत्यत्र जकारोत्तरस्य एकारस्य। २. वाजेन इति नकारोत्तरस्य अकारस्य।

[२०-११] ॥ वाजिनी सूर्य उच्यत इति [७-६] भाष्ये वाजिनीत्य-विभक्तिको निर्देश इत्यर्थः । ननु वाजिनामीश इति व्याख्यानादेकमेव व्याख्या युक्तं वाजिनामश्वानामन्नवतां वेति ऋक्पदस्य व्याख्यान-मयुक्तमित्यत आह । पूर्ववदुभयेति । यथा पूर्वमन्नेन इति पदेन वाजिनीति ऋक्पदं अन्नप्रवर्तकत्वेन अन्नस्वामित्वार्थकत्वेनेति द्वेधा विवृतं तथा वाजिनामीश इत्यनेनापि ऋक्पदं अश्वस्वामित्वेन अन्नवत्स्वामित्वेन चेति द्वेधा व्याख्यातमित्यर्थः । **वष्टि॒ति** रूपं साधयति । **विकरणलोप इति** । [२०-१८] ॥ वहेर्लोट् तस्य तिप् । ' एरुः ' [३।४।८६] इति उत्वं शपो लुक् । हकारस्य षत्वं छान्दसम् 'ष्टुना ष्टुः' [८।४।४१] । इति ष्टुत्वं चेति भावः । ॥ १० ॥

चोदयत्री ॥ ननु सुमतनामिति न कर्मणि षष्ठी । किंतु शेषे षष्ठी ' न लोकाव्ययनिष्ठा खलर्थतृनाम् ' [२।३।६९] ॥ इति कर्मणि षष्ठ्याः निषेधादिति भ्रमं परिहरति । **द्वितीयार्थे इति** । [२०-२२] सुमतीनामिति कर्मण्येव षष्ठी । नत्रा निर्दिष्टस्यानित्यत्वेन न लोकाव्ययेति निषेधस्याप्रवृत्तेरिति भावः ॥ १ ॥

महो अर्णः ॥ विराजतीति । [२१-२] राजतेरात्मने-पदित्वेपि जिजन्तस्य धात्वन्तरत्वात् परस्मैपदमुपपन्नमिति द्रष्टव्यम् ॥ १२ ॥ ६ ॥ ३ ॥ १ ॥

उक्तस्यापवादमिति । [२१-६] सूक्तस्य मूलवेदक्रमा-नुसारित्वमिति नियमस्यापवादमाहेत्यर्थः । **मूलेवेदानन्तत्वावि-ज्ञप्त्या इति** । [भा. ७-१२] वेदानामनन्तत्वेन कारणेन तेन मन्दानां ज्ञानासंभ(वे)वात् । मन्दानामपि यज्ञतदङ्गकलापविज्ञप्त्यै बादरायणः

आवोपौ चक्र इत्यर्थः । इदं तु वक्ष्यमाणेति । [२१-९] आवापोद्वापयोर्वेदानां तत्वप्रतीत्यर्थं " अनन्तत्वात्तु वेदानां प्रायः कर्मानुसारतः । संक्षेपं कृतवान् दवः शिष्याश्च तदनुज्ञया, इति वक्ष्यमाणविवरणानुसारेण प्रतिपत्तव्यमित्यर्थः । ननु ऋचः स ऋच उद्धृत्येति प्रमाणेन मूलवेदादुपवेदानामुपवेदेभ्यः अवान्तरवेदानामुद्धारः कथं उक्त इत्यत आह । ऋङ्निगदेति । [२१-१०] अस्मिन्प्रमाणे ऋङ्निगदसामशब्दैः मूलवेदोद्धृतोपवेदात्मकऋङ्निगदसामान्युच्यन्त इत्यर्थः । ततः किमित्यत आह । तत इति । [२१-११] ऋगादिशब्दैरुद्धृतवेदग्रहणात् मूलवेदादुपवेदाः उपवेदादवान्तरवेदा उद्धृता इत्येवं पुराणवचनादवगम्यत इत्यर्थः । अनेन ऋचः सऋच उद्धृत्येति मूलस्य मूलवेदादुद्धृताया ऋचः ऋक्संज्ञकोपवेदादिति यावत् ऋग्वेदमवान्तरवेदं कृतवान् तथा मूलवेदादुद्धृतनिगदसंज्ञकोपवेदात् यजूंषि कृतवानित्यादि योजनोक्ता भवति । पूर्वोत्तरार्धयोरसंबन्धा(द्धा)र्थत्वेनेति । [२१-१४] मानःस्तेनेभ्य इति पूर्वार्धस्य ये अभिदुहस्पदे अभितो द्रोहास्पदे अन्धेतमसि स्थातुं योग्याः निरामिणः रामरुध्दाः तत एव तस्य रिपवः अन्येषु भोग्येष्वेव जागृधुः । आकाङ्क्षां कृतवन्तस्तेभ्यःस्तेनेभ्यः नः अस्मान् मा इत्यर्थः । आदेवानामित्युत्तरार्धस्य तु हे बृहस्पते ये देवानां व्रयः वरत्वे सति नियामकं ब्रह्मादि व्योहते वहन्ति ये च साम्नः विष्णोः परं न विदुरित्यर्थः । इदं तु वायुं प्रति विद्याभिमानिदेवतावचनम् । एवं च पूर्वोत्तरार्धयोरेकवाक्यत्वाभावः स्पष्टः । उद्धृत्योपवेदादिकरणस्य वेदानन्त्यज्ञापनं फलत्वेनोक्तमिति मन्यमानः शङ्कते । वेदानन्तविज्ञप्त्या इति । [२१-२०] अनन्तत्वादिति [२१-२१] अस्माभिरुपवेदादेः अज्ञानां कर्मा-

दिज्ञानसिद्धिरेव प्रयोजनमुक्तं न तु वेदानन्त्यज्ञापनं फलत्वेनोक्तमिति भावः। **यत्र वाक्यद्वयस्येति।** [२१-२३] छन्दोनिबन्धशून्योपनिपद्वाक्यद्वयस्यार्थ इत्यर्थः। छन्दोनिबद्धेष्वेवंविधवाक्येषु पौनरुक्त्यपरिहाराय वाक्यमेवोच्छिन्नं ज्ञेयमिति भावः। ननु वर्गस्वरूपं कुतो नोक्तमित्यत आह। **अनेनेति।** [२१-२५] सूक्तानुवाकयोः स्वरूपमुक्त्वा वर्गस्वरूपस्य निरूपणेन सांकेतिको वर्गशब्दः न तु तच्छब्दप्रवृत्तौ निमित्तमस्तीति सूचितमिति भावः इति सूक्तानुवाकवर्गाणांस्वरूपनिरूपणम्।

स्वरूपकृत्नुम् ॥ संपदादित्वात्क्विबिति। [२१-२६] इतःपरं टीकायां श्रूयमाणं **गां दोग्धीति गोधुक् तस्मै गोदुहे। तदर्थं दोहायेति शेषः।** इत्येतावत्प्रक्षिप्तम्। न टीकावाक्यम्। अवश्यं चैतदेवं विज्ञेयम्। गोदुह इत्यस्य भावार्थकक्विबन्तत्वेन अनुपदमेव व्याख्यातत्वात्। नहि गोदुह इत्यस्य दोहनापरत्वमुक्त्वा दोहनकर्तृपरत्वाभिधानं संगतं येनेदं वाक्यं प्रक्षिप्तं न स्यात्। न चेदं व्याख्यानान्तरामिति वाच्यम्। तज्ज्ञापकस्याथवेत्यादिशब्दस्याभावात्। दोहाय सुदुघामिव विष्णुं जुहूमसीत्येवं भाष्यकृता व्याख्यातत्वेन उद्धाष्योक्तिप्रयोजनाभावात्। बहुकोशेष्वस्य वाक्यस्यादर्शनाच्च **'दुहः कब् घश्च** [३।२।७०] **इति ॥** [२२-१] दुहः कप् प्रत्ययो भवति घश्चान्तादेश इति भावः। ततः टापि **सुदुघेति** आकरान्तं रूपमिति ज्ञेयम्। **जुहूमसीति।** [२२-३] ह्वयतेर्लटि तस्य मसादेशे तस्य 'इदंतो मसि' [७।१।४६] इति मसिरिकारान्तो भवति ततः शप् तस्य व्यत्ययेन श्लुः वकारस्य सं प्रसारणं

एकारस्य पूर्वरूपम् । 'ओ' [६।१।१०] इति द्विर्वचनम् । 'कुहोश्चुः' [७।४।६२] इति चुत्वं 'अभ्यासे चर्च' [८।४।५४] इति जश्त्वं 'हलः' [६।४।२] इति उकारस्य दीर्घः । एवं च जुहूमसीति रूपं सिद्धमिति ज्ञेयम् । इतःपरं टीकायां श्रूयमाणं दार्ष्टान्तिके ऊतय इति प्रयोजनस्य श्रुतत्वात दृष्टान्तेऽपि दोहायेत्युक्तं दृष्टान्ते गोदुहइत्यनुक्तत्वात् दार्ष्टान्तिकेऽपि तात्स्थ्यादिति शेषोऽभिहितः ।" इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेवं विज्ञेयम् । दोहायेति भाष्यस्य श्रुतिशेषकथनरूपत्वे गोदुह इति श्रौतपदवैय्यर्थ्यप्रसंगात् । गोदोहाय सुदुघोमिव विष्णुं जुहूमसि[illegible] पूर्णत्वात् । दृष्टान्ते गोदुह इत्यस्य दोहनकर्तृपरत्वाभावाच्च । कर्तृपरत्वे वैय्यर्थ्यप्राप्त्या कर्तृपरत्वाभिधानायोगाच्च । बहूकोशेष्वदर्शनाच्च । ततश्चेयंऋग्योजना । यजमानस्य ऊतये द्यवि द्यवि अहर्नामसु पाठात् दिवसे दिवसे गोदुहे गोर्दोहाय सुदुघां कामधेनुमिव सुरूपकृत्नुं विष्णुं जुहूमसि स्वाहयाम इति ॥ १ ॥

उपनः ॥ उपागहीति । [२२-७] विकरणलोपे मलोपेच उपागहीति रूपम् ॥ २ ॥

अथाते ॥ अन्तमानां सुमतीनामिति श्रौतपदद्वयस्य आवृत्तिं प्रथमान्तत्वं द्वितीयान्तत्वंचाभिप्रेत्य भाष्यकृता सुमतीरिति द्वितीयान्तत्वमुक्त्वा मतय इति प्रथमान्तत्वमभिप्रेत्य व्याचष्टे । यस्मात् त्वमिति [२२-८] विभक्तिविपरिणामेन प्रथमान्तस्य अन्तमानामित्यस्य व्याख्यानं अन्ते मिताःप्रमिता–उत्तमोत्तमा इति यावादीति [२२-२९] विभक्तिव्यत्ययेन सुमतीनामित्येतत्

प्रथमान्तमित्यभिप्रेत्य सुमतयः इत्युक्तम् । अन्तमानां सुमतीनामिति पद द्वयमनूद्य विभक्तिविपरिणामं दर्शयति **अन्तमाः सुमतीरिति** [२२-९] **विद्याम लभेमेति** [२२-१०] अत्र ननु लाभार्थक विदेः शव्विकरणात्वात् शप्रत्यये 'शमुचादीनाम्, [७।१।५९] इति नुमि च सति विन्देमेति भवितव्यं विद्यामेति क्वचि कथं परस्मैपदप्रयोग इत्यत आह । **व्यत्ययादिति** । [२२-१०] शव्विकरणस्य व्यत्ययेन लुकि विद्यामेति रूपं भवति । तथा व्यत्ययेनात्मनेपदिनो धातोः परस्मैपदे लभेमेति रूपमिति भावः । **मास्य इति** । [२२-१०] 'अस्यतिवक्तिख्यातिभ्योऽङ्' [३।१।५२] इति श्लेरङादेशे 'न माङ्योगे' [६।४।७४] इति अडागमप्रतिषेधात् ख्यदिति लुङ् मध्यमपुरुषैकवचने रूपम् । ननु [३।३।१७] माङिलुङिति सर्वलकारापवादेन लुङो विधानात् कथं मा पश्येति भाष्ये प्रयोग इत्यत आह । **माऽयामिति** । [२२-१०] भाष्ये प्रयुक्तोऽय माशब्दः न माङ् । एवं च लोट् प्रयोगो नानुपन्न इति भावः ॥ ३ ॥

परेहि ॥ विपाः व्याप्ता चिद्यस्येति [२२-१४] विष् असस् इति स्थिते 'अत्वसन्तस्य चाधातोः' [६।४।१४] इति दीर्घे सुलोपेच्च विपा इति स्त्रीलिङ्गप्रथमैकवचने रूपमिति ज्ञेयम् । ननु विपश्चिच्छब्दस्याखण्डत्वेन पदद्वयसमाहाररूपत्वाभावात् पदद्वयं कल्पयित्वा व्याख्यानमनुपपन्नमित्यत आह । **अवग्रहेति** ॥ [२२-१४] अवग्रहदर्शनात् पदद्वयकल्पनं युक्तमिति भावः । **मरणार्थत्वप्रतीतेरिति** ॥ [२२–१६] यस्मिन् व्याख्याने अमङ्गलरूपमरणं भवति तद्व्याख्यानं न कर्तव्यमित्यर्थः ॥ ४ ॥

उतऋत्वन्तु ॥ अभिधानं वक्ष्यत इति । [२२-१८] निदोदवीय इति तु विरुद्धार्थद्वयाभिधौ । दूरसामीप्यवचनावुभावपि महोदधौ [ऋग्भाष्ये] इत्याभिधानं द्वितीयाध्याये वक्ष्यत इत्यर्थः । **योगायोगादिति ।** [२२-१८] निरो निषेधार्थकत्वात् आरतेत्यनेन संबन्धे आगमनरूपार्थलाभादिति अर्थः । नि (रो) रः अर्थान्तरमुक्त्वा आरतेत्यनेन संबन्धः क्रियतामित्यत आह । **अधिकार्थेति ।** [२२-१८-१९] ॥ ५ ॥ ॥ ७ ॥

उतनः ॥ ततोम(क्)प्रत्यय इति । [२२-२१] 'इषियुधीन्धि (न्धीधि) दमिश्याधूसूभ्यो मक्' [उणादि. १५०] इति सूत्रेण मक्प्रत्यय इत्यर्थः । **वोचेयुरिति ।** [२२-२२] वचेर्झेर्लिङ् तस्य 'झेर्जुस्' [३।४।१०८] छान्दसोऽङ्' 'वच उम्' [७।४।२०] इति उम् यासुट् तस्य इयादेशः गुणः ततश्च **वोचेयुरिति** रूपं सिद्धम् । ॥ ६ ॥

यमाशुम् ॥ ननु सखायं मन्दयदिति विग्रहे द्वितीयाश्रितेतिति सूत्रेण समासो वक्तव्यः । श्रितादिषु गमिरम्यादीनामुपसंख्यानात् । ततश्चोपसर्जनत्वात् सखिशब्दस्य पूर्वनिपातेन भाव्यमित्यत आह । **मयूरव्यंसकादीति ।** [२२-२६]. उपसर्जनपूर्वनिपातशून्यानां मयूरव्यंसकादीनां दर्शनात् **मन्दयत्सखमि** त्युपपन्नमिति भावः । **स्वीकुर्विति** [२३-३] इतः परं टीकायां श्रूयमाणं 'सोमस्य द्रवरूपत्वादाशुत्वमि' ति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । आशुं क्षिप्रवेगवन्तं द्रवत्वादित्यनेन 'र्वाक्येन गतार्थत्वात् बहुकोशेष्वदर्शनाच्च ॥ ७ ॥

---

१ टीप.— काशिका पाठः ।

अस्य पीत्वा ॥ तमोऽसह्य इति । [२३-८] आहिताग्न्यादेराकृतिगणत्वेन गडुकण्ठ इत्यादीनामनिष्ठान्तानामपि संग्रहात् निष्ठाप्रत्ययशून्यस्याप्यसह्यपदस्य च 'वा हिताग्न्यादिषु' [२।२।६७] इतिसूत्रेण पूर्वनिपातविकल्पाभिधानात् असह्यपदस्य पूर्वनिपाताभावो न दोषायेति भावः । **यदावृणोादिति ।** [२३-९] सर्वजीवान् तमः आवृणोादिति यत् तत् तदेवावरकत्वमेव वृत्रस्य तमसः वृत्रत्वं वृत्रशब्दवाच्यत्वे निमित्तमित्यर्थः ॥ ८ ॥

तंत्वा ॥ सातय इति । [२३-१२] क्तिन्नन्तस्य षण् संभक्ताविति्यस्य 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' [३।३।९७] । इति सूत्रेण निपातनान्निष्पन्नः सातिशब्दः लाभार्थकोऽपि भवति धातूनामनेकार्थत्वादिति भावः । ॥ ९ ॥

यो रायः ॥ अवनिरिवावनिराश्रय इति । [२३-१४] इतः परं टीकायां श्रूयमाणं " अवतेरैश्वर्यकर्मणः प्राप्तिकर्मणो वा कर्तर्यनिप्रत्ययः " इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेवं विज्ञेयम् । अस्य वाक्यस्य पूर्वोत्तरवाक्याभ्यामन्वयाभावात् अवनिरिवावनिराश्रय इति गौणार्थाङ्गीकारविरोधाच्च । आश्रयत्वं प्रतिज्ञाय कर्तरि अवनिशब्दसाधनस्य विरुद्धत्वात् ॥ १० ॥ ८ ॥ ४ ॥

आत्वेता ॥ ननु स्तोमशब्दोपपदात् वाहतेः कर्मण्यपि स्तोमवाहशब्द अकारान्तः तस्माज्जसि 'आज्जसेरसुक्' [७।१।५०] । इत्यसुगागमे प्रथमयोः पूर्वसवर्णदीर्घे स्तोमवाहासा इति भातितव्यम् कथं स्तोमवाहस इति रूपमित्यत आह । **छान्दसो ह्रस्व इति** [२३-१८] ॥ १ ॥

पुरूतमम् ॥ अनुवृत्त्या संबन्ध इति । [२३-२१] इतःपरं टीकायां श्रूयमाणं 'अत्र पुरुतममिति तमप्छान्दस'

इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् अवश्यं चैतदेवं विज्ञेयम् । पुरूणां पुरुरित्युक्त्या अतिशयस्यलाभेऽपि पुरूणां देवानां मध्ये यः पुरुः वायुः तदपेक्षयाप्यतिशयवानित्यर्थबोधनाय तमपोविवक्षितत्वात् । अत एव भाष्यकृता सुपूर्णानां पूर्णतममित्युक्तम् । अन्यथा सुपूर्णानां पूर्णमित्यवक्ष्यत् । टीकाकारोऽपि ऋचीव भाष्येऽपि तमप् छान्दस इत्यवक्ष्यत् । ननु पुरुतममित्यत्र तमपोऽनुदात्तत्वेनभाव्यम् । 'अनुदात्तौ सुप्पितौ' [३।१।४] इति स्मरणात् इत्यत आह । **ठयत्ययेनेति** [२३-२१] **यद्वेति** [२३-२१] । तमुधातोः 'घञर्थे कविधानम् [वार्तिकं. सू. ३।३।५८] इति कर्मणि क प्रत्यये तमशब्दो निष्पन्नः । स च प्रत्ययस्वरेणान्तोदात्तः । पॄपालनपूरणयोरित्यस्मात् 'पॄभिदिव्यधिगृधिधृषिभ्यः' [उणादि. २३] इति सूत्रेण कुप्रत्यये 'उदोष्ठ्यपूर्वस्य । [७।१।१०२] इति उत्वे रपरत्वे च निष्पन्नेन प्रत्ययस्वरेणान्तोदात्तेन पुरुशब्देन तृतीयातत्पुरुषे 'तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' [६-२-२] इत्यनेन पूर्वपदप्रकृतिस्वरत्वं प्राप्नोति । तं बाधित्वा 'परादिश्छन्दसि बहुलम्' [६।२।१९९] । इति परादेस्तकारस्थाकारस्योदात्तत्वं भवतीति भावः । अस्मिन्व्याख्याने पुरूणामित्यस्यान्वयमाह । **पुरूणां वार्याणामितीति** [२३-२२] ॥ २ ॥

सघ ॥ भुवत् । अभवदिति [२३-२३-२४] प्रक्षिप्तम् । उत्तरत्र श्रूयमाणं भवेदिति पदं भुवदित्यतः परं द्रष्टव्यम् । ततश्चैवं टीकावाक्यपाठः । 'भुवत् । भवेत् । विकरणव्यत्ययात् । कालव्यत्ययात्' इति भुवदिति ऋक्पदेन भवेदिति भाष्यपदस्य संवादमात्रस्य प्रदर्शनीयत्वेन अभवदित्युक्तिप्रयोजनाभावात् । भुवदिति श्रौतपदस्य साधुत्वं दर्शयता विकरणव्यत्ययात् कालव्यत्ययादिति युगपदेव वक्तव्ये

न भवेदित्यनेन व्यवधानकरणायोगात् । किंतु भुवदित्यस्योपपादकम् ॥ ३ ॥

यस्य संस्थे ॥ घञर्थेकविधानमिति [२४–३] । भावे क (प्रत्यय) विधानमित्यर्थः । **वृण्वते । वृणत इति ।** [२४-४] अयंधातुः स्वादिषु क्रयादिषु च पठ्यत इति द्विविकरणः ततश्च वृङित्येतस्मात् श्नुप्रत्यये आत्मनेपदलडादेशझप्रत्ययस्य 'आत्मनेपदेष्वनत' इति अदादेशे टेरेत्वे 'हुश्नुवोःसार्वधातुके' [६।४।८७] इति यणादेशे **वृण्वत** इति ऋग्गतं रूपं साधु। एवं वृधातोः श्नाप्रत्यये झस्य अदित्यादेशे 'श्नाभ्यस्तयोरातः [६।४।११२] इति आकारलोपे आत्मनेपदे टेरेत्वे **वृणत** इति भाष्यस्थं रूपं साधु ॥ ४ ॥

सुतपावने ॥ श्रुतौ दध्याशिर इत्यत्र जसः सुडित्यादेश इत्याभिप्रेत्याह । **दध्याशिरः दध्याशिराः** इति [२४–८] अन्येत्विति । [२४-९] यद्यप्यस्मिन्मते आशिरशब्दः अहोरात्रान्तरितदधिवाचकः । तथापि पृथग्दधिशब्दश्रवणात् अहोरात्रान्तरितत्वमात्रवाचीति ज्ञेयम् । **वीगत्यादाविति ॥** [२४-१०] अस्मात् स्त्रियां क्तिनि वीति शब्दोनिष्पन्न इति भावः । सुतपावृ इति सुतशब्दे उपपदे पाधातोर्वनिपि सुतपावन्शब्दो निष्पन्नः । तस्माच्चतुर्थ्येकवचने 'अल्लोपोनः' [६।४।१३४] इत्यकारलोपे **सुतपान्वे** इति सिद्धं भवति । **यन्तीति** इणोरूपम् । **यान्तीति** [२४-११] याते रूपम् । ननु इन्द्रं यान्तीति वक्तव्यम् । कथमिन्द्रायेति चतुर्थीत्यत आह । **गत्यर्थेति ।** [२४।११] दधिशब्दं साधयति । 'आदृगमहन....' [३।२।१७१] इति [२४-१२] धातः किप्रत्यये लिङ्वद्भावात् द्विर्वचने अभ्यासस्य

इत्वे 'आतो लोपइटिच' [६।४।६४] इति धात्वाकारलोपे दधीति रूपसिद्धिरिति भावः। ॥ ५ ॥ ९ ॥

त्वं सुतस्य ॥ अहनीति। [२४।१४] 'सद्यः परुत्परार्यैषमः' [५।३।२२] इति सूत्रेण समानशब्दात् अहन्यर्थे द्यस्प्रत्ययः समानशब्दस्य सादेशश्च निपात्यत इति सद्यसूशब्दः समाने अहनीत्यर्थक इति भावः॥ ६ ॥

आत्वा ॥ वनतेरसुनीति। [२४-१८] वनतेरसुनि णत्वे च गिर्वण इति रूपम्। यद्वेति ॥ [२४-१८] वृङ् इत्येतस्मात् अनस् प्रत्यये टिलोपे णत्वे च गिर्वण इति रूपमिति भावः ॥ ७ ॥

त्वां स्तोमाः ॥ त्वामित्यस्यपुतरुक्तेरिति [२४-२२] शब्दाधिक्यादर्थाधिक्यमिति भावः ॥ ८ ॥

आक्षितोतिः ॥ यस्मिन्विश्वानि पौंस्येत्यनेनापीति ॥ [२५।६]। 'त्वां स्तोमा' इति पूर्वस्यां ऋचि अवीवृधन्नित्यस्य वृद्ध्यर्थकत्वाङ्गीकारे भाष्यकृता अक्षितोतिरिति पूर्वभाष्येण एतद्गताक्षितोतिरितिपदेन पूर्वं विरोध उक्तः। अनेन तु भाष्येण यस्मिन्विश्वानि पौंस्येत्यपि भागेन विरोधउच्यत इति भावः ॥ ९ ॥

मानो मर्ताः ॥ मर्ता इति मृङ् प्राणत्याग इत्यस्मात् 'हसिमृगिणवाऽमिदमिलूपूधुर्विभ्यस्तन्' [उणादि ३७३] इति तन्प्रत्यये गुणे मर्ता इति रूपमिति ज्ञेयम्। तनूनां शरीरेभ्य इति [२५।८] 'क्रुध द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः॥' [१।४।३७] इति संप्रदानसंज्ञाविधानात् भाषायां चतुर्थीप्रयोगः कर्तव्य इत्यभिप्रायेण शरीरेभ्य इति प्रतिपदं दत्तामिति बोध्यम्। यद्यपि 'क्रुधद्रुहोरुपसृष्टयोः कर्म' [१।४।३८] इति सोपसर्गद्रुहादियोगे संप्रदानसंज्ञा-

पवादेन कर्मसंज्ञा विधीयत इति शरीराणीति भवितव्यम् तथापि नेह 'अभि'इत्यस्य द्रुहधातुना योगोविवक्षितः। असमीचीनद्रोहस्यानिवारणप्रसंगात्। अत एव भाष्ये 'मामर्तानस्तनूनां तु द्रोग्धार स्युः कथंचने'ति द्रोहसामान्याभाव उक्तः। अन्यथा विशेषेण द्रोग्धारो मा स्युरित्यवक्ष्यत्। किं तु कथंचनेत्यस्याभीत्यर्थकस्याभीत्यव्ययस्य मा स्युरित्यनेन संबन्धः। ततश्च द्रुहेरुपसृष्टत्वाभावात्कर्मसंज्ञानास्तीति भावेन चतुर्थीप्रयोगःकृतः। **वरमीशान इति।** [२५-१०] वरामिति अत्र प्रक्षिप्तम्। ऋचि भाष्ये च वरमित्यस्याश्रवणात् शेषाभिधानप्रयोजनाभावाच्चेति द्रष्टव्यम् ॥ १०॥१०॥५ ॥

युञ्जन्ति ॥ अरुषमरुणमिति। [२५-१४] अर्तेश्च [उणा. ३४७] इति सूत्रेणार्तेरुनत्प्रत्यये गुणे णत्वे च अरुणामिति भवति। पृषोदरादित्वात् णकारस्य षत्वे अरुषमिति भवतीति भावः। **वृधवृद्धावित्यस्येति** [२५-१५] वृधेःनकूप्रत्ययः धातोश्च ब्रध इत्यादेश इति भावः। **युञ्जन्ति नियुञ्जत इति।** [२५-१५] श्रुतिभाष्ययोः सूर्यनियोजनफलस्य कर्तृगामित्वाभावात् आत्मनेपदप्रयोगाभावः। टीकायां नीत्युपसर्गस्याजन्तत्वात् 'स्वराद्यन्तोपसृष्टाश्चे [सर्गादि] तिवक्तव्यामि' [वार्ति १।३।६ सू.] ति वार्तिकेणात्मनेपदमिति द्रष्टव्यम् ॥ १ ॥

युंजन्त्यस्य ॥ वासुदेवस्य पौंस्यानीति ॥ [२५-२०] पूर्वमस्मत्कृतख्याख्याने वासुदेवस्य पौंस्यानीति पदस्थाने देवा इतिपदमूह्यम्। ततश्च देवतापरत्वेन व्याख्यानं भवतीति भावः। ब्रह्मादीनामिति। [२५-२२] व्यासप्रणीतनिरुक्तान्तर्गतमरुच्छब्दः सर्वदेवता-

---

टीप्:—१ मरुच्छब्द इति। अनुक्रमणिकोक्तमारुतीशब्दप्रकृतिभूतमरुच्छब्दः इत्यर्थः। (च्छलारीये ५६ प) मरुतौ पवनामरौ इत्यमरः

परः प्रतिपत्तव्य इत्यर्थः । व्यासप्रणीतनिरुक्ते मरुच्छब्दोऽस्तीति टीकाकारैः संप्रदायतो विज्ञातमिति द्रष्टव्यम् । **अकारस्योकार इति** [२५-२५] अंणशब्दादिभूतस्य अकारस्य उकारः तत 'आद्गुणः' [६।१।८७] इति गुण इति भावः । **तस्यार्थ** इति [२५-२५] अकारस्योकाररूपो यो व्यत्ययस्तदर्थः । **इदं सर्वत्रेति [सर्वत्रेदमिति]।** [२६-४] तावु भाविति पदद्वयं काम्यावित्यादिभिः संबध्यत इत्यर्थः ॥ २ ॥

केतुम् ॥ वशकान्तावित्यस्येदमिति । [२६-६] अस्मात् लट् तस्य शत्रादेशः शप् । तस्य लुक् । 'ग्रहिज्या वयि.... ' [६।१।१६] इति सूत्रेण संप्रसारणं शकारस्य षत्वम् । ततश्चोषदिति रुपम् ॥ ३ ॥

आदह ॥ स्वाधामन्विति 'कर्मप्रवचनीययुक्ते द्वितीया' [२।३।८] इति द्वितीयेति भावः । **एरिर इति** [२६-१०] आङ् पूर्वकात् इर गतावित्यस्मात् लिट् तस्य झः तस्येरेच् अभ्यासेकारस्य धात्वाकारेण सवर्णदीर्घः । 'आद्गुणः' [६।१।७७] इति आङा सह गुणः ततश्चेरिर इति ॥ ४ ॥

वीळुचित् ॥ आरुजत्नुभिरिति [२६-११] आङ्पूर्वकात् रुजेः त्नुप्रत्ययः । तस्याडागमः छान्दसः । **ततश्चारुजत्नुभिरिति** वैदिकरूपं ज्ञेयम् । भाष्ये तु रुजेर्लटि शत्रादेशे शप्रत्यये गुणाभावे **चाऽऽरुजदिति** शत्रन्तं रूपं ज्ञेयम् । **उस्रिया इति ।** [२६-१२] रश्मिनामसुपठितात् उस्रशब्दात् तद्धिताः [४।१।७६] इति बहुवचन-

टीपः—१ शौणो इत्यत्र

ज्ञापितो घप्रत्ययः । घस्य आयनेयीति इति [७।१।२] सूत्रेण इय् इत्यादेशः । तत **इचडःस्रिय इत्यकारान्तशब्दो निष्पन्नो भवति । अविन्द इति ।** [२६-१३] लाभार्थकविदेर्लङि तस्य तिपादेशेश प्रत्यये 'शेमुचादीणाम्' [७।१।५९] इति नुयागमे अडागमे **अविन्द** इति रूपम् ॥ ५ ॥ ११ ॥

देवयन्तः ॥ लिङ्गव्यत्यास इति । [२६-१५] देवयन्त इति ऋचि प्रद्योतयन्त इति भाष्ये च लिङ्गव्यत्ययः छान्दस इत्यर्थः । **कर्तृसाधन इति ।** [२६-१५] । गृणन्ति स्तुवन्तीति गिर इति कर्तरि क्विपि 'ऋत इद्धातोः' [७।१।१००] इति इदादेशे जसिच गिर इति रूपम् । ननु विदद्वित्तमित्यत्र विददिति रूपमनुपपन्नम् । यगात्मनेपदयोः सतोर्विद्यमानवित्तमिति भवितव्यमित्यत आह । **विददिति कर्मणि छान्दसमिति ॥** [२६।१६] विदेः कर्मणि व्यत्ययेन परस्मैपदे लस्य शत्रादेशे यगभावे शप्रत्यये नुमभावे च विददिति कर्मणि छान्दसं रूपम् **महामिति ।** [२६।१६] ॥ अकारान्तात् महशब्दात् अमि छान्दसे पूर्वसवर्णदीर्घे **महामिति** रूपम् । **अनूषतेति ।** [२६।१७] णु स्तुताविति्येतस्मात् लुङि व्यत्ययेनात्मनेपदे तस्य ज्ञादेशे तस्य 'आत्मनेपदेष्वनतः' [७-१५] इति अदादेशे सिचि इडभावे षत्वे छान्दसे धातोर्दीर्घे अडागमेचा **नूषत** इति रूपम् ।

इन्द्रेण ॥ वाचशब्दाविति [२६।१७] भाष्यस्थौ वाचशब्दौ व्यत्यासेन योज्याविति्यर्थः । **मन्दुरिति** [२६-१८] ॥ मंशब्दोपपदाद्ददातेरौणादिको डुः उपपदविभक्त्यलोपश्च । एवं च **मन्दुरिति** रूपम् । **तुमर्थे कसेनप्रत्यय इति ॥** [२६-१९] ॥

दृशेः ' तुमर्थे सेसेनसे '... [३।४।९] इति सूत्रेण कसेन्प्रत्यय इत्यर्थः । दृशेः कसेन्प्रत्यये छान्दसे सुडागमे ' व्रश्च भ्रस्ज···· ' [८।२।३६] इति सूत्रेण शकारस्य षकारे ' षढोः कः सि ' [८।२।४१] इति तस्य कत्वे ' आदेश प्रत्यययोः ' [८।३।५९] इत्यनेन प्रत्ययागमसकारस्य षत्वे दृक्षसु इति रूपमिति भावः । **आबिभ्युषेति ।** [२६-१९] जिभीभय इत्यस्मात् ' लिटः क्वसुश्चे'तिलिटः क्वस्वादेशे द्वित्वे अभ्यासजश्त्वे ह्रस्वत्वे च तृतीयैकवचने ' वसोः संप्रसारणम् ' [६।४।१३१] इति संप्रसारणे धातोरीकारस्य यणादेशे क्वसोः सकारस्य षत्वे बिभ्युषेतिरूपम् । ततो नञ्समास इति ज्ञेयम् । **संजग्मान इति ।** [२६।२०] संपूर्वकात् गमेर्लिटि तस्य कानजादेशे द्वित्वादौ ' गमहनजनखनघसां लोपः क्ङित्यनङि ' [६।४।९८] इति गमेरुपधाकारलोपे ' सुपां सुलुक् ···· ' [७।१।३९] इति द्विवचनस्य सुइत्यादेशे संजग्मान इति रूपमिति ज्ञेयम् ॥ ७ ॥

अनवद्यैः ॥ सहस्वादिति [२६-२२] ॥ लिङ्व्यत्ययेन सहस्वानित्युक्तमिति बोध्यम् ॥ ८ ॥

अतः ॥ परितो ज्मामिति । [२६-२६] परिज्माशब्दात् वर्तत इत्यर्थे डान (छः कनिन्) प्रत्ययः । ततश्च परिज्मन्निति नकारान्तरूपम् । अन्यथानुवादशः परिहाराय तद्वचनमुपपादयति । **यथायुंजंतीति ॥** [२७-३] अत्र युंजंतीत्येतत् सूक्तप्रतीकग्रहणम् । अन्यत् ऋचां देवतानिरूपणमिति द्रष्टव्यम् । अवशिष्टानां चतसृणांऋचां देवतामाह । अनाख्यातेत्विति । [२७-४] चतस्र ऐन्द्र्यः इति भावः । **यथा कथंचिद्व्याख्यान इति ।** [२७-६] ब्रध्नमिन्द्रं परितस्थुषः परितः स्थिताः सेवका देवादयो युंजन्ति संगच्छन्ते अनुचरन्तीति व्याख्यान इत्यर्थः । **उत्तरासु चतसृष्विति ।** [२७-८] देवयन्त

इत्यादचतसृष्वित्यर्थः। मतिमित्यादेर्मरुद्गणामित्याद्यध्याहृतेन योजना किं न स्यादित्यत आह। **कथंचिद्योजनेति**। [२७।९] ॥ ९॥

इतोवा ॥ षण् संभक्तावित्यस्मात् भावेक्तिनि सत्वे 'जनसनखनां सन् झलोः' [६।४।४२] इति नकारस्यात्वे च सातिमिति रूपम्। ॥ १० ॥ ॥ १२ ॥ ॥ ६ ॥

इन्द्रमित् ॥ श्रुतौलिङ्व्यत्ययेन प्रयोग इति भावेनाह। **बृहत् बृहन्तामिति**। [२७-१७] **गाथिन इति** [२७-१८], गैशब्द इत्यतः उषिकुषिगार्तिभ्यःस्थन् ['उणादि. १६९'] इति थन्प्रत्यये स्त्रियां टापि च गाथाशब्द आकारान्तः। ततो व्रीह्यादित्वात् मत्वर्धे इनि प्रत्यये **गाथिन** इति रूपम्। **अनूषतेति ॥** [२७-१८] णु स्तुतावित्यस्मात् सार्वकालिके लुङि झस्य अत इत्यादेशे सिचि तस्य षत्वे अडागमे छान्दसे धातुदीर्घे **अनूषतेति** रूपम् **अर्का ऋच इति** [२७-१८] ऋच स्तुतावित्यन्तं 'पुंसि संज्ञायांघः प्रायेण' [३।३।११८] इति करणे घप्रत्यये 'चजोः कु(हि)घिण्यतोः [७।३।५२] इत्यनेन चकारस्य कुत्वे लघूपधगुणेच **अर्का** इति रूपम्। **उभयत्रेति**। [२७-२०] यद्यपि अर्केभिरिति एकत्रैव करणं दृश्यते तथापि अन्यवाणीभिरिति मुख्यार्थस्य विवक्षितत्वात् उभयत्रेत्युक्तमिति बोध्यम् ॥ १ ॥

इन्द्र इत्। सुपामित्यनेनैवादेश इति। [२७-२१] 'सुपांसु लुक्' [७।१।३९] इति सूत्रेणैव ओस आकारादेश इत्यर्थः। युजेः 'सत्सूद्विषे [३।२।६१] क्विपि ओसि तस्य अलोन्त्यपरिभाषया सकारस्य आ इत्यादेशे ओकारस्य छान्दसे लोपे युजेति षष्ठीद्विवचनस्य रूपं भवतीति भावः। **(हिरण्ययः) हितश्चेत्य-**

LIBRARY
ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431

त्रेति [२७-२६] हितशब्दे तशब्दलोपः, रमणीयशब्दे मलोपः, णीत्यत्र ईकारस्य यकारादेशश्चेति विज्ञेयम् । 'ऋत्व्यवास्त्यवास्त्वमाध्वीहिरण्ययानि छन्दसि' । [६।४।१७५] इति निपातनात् । अलाक्षणिकमेतत्सर्वं कार्यं विज्ञेयम् ॥ २ ॥

इन्द्रो दीर्घाय ॥ चक्षस इति । [२७-२६] चक्षिङः 'चक्षेर्बहुलं शिच्च' [उणादि ६८२] इति असुन्प्रत्ययः । ततश्च चक्षस इति रूपम् । अद्रिरिति । [२८।१] । दृङ् आदर इत्यस्मात् कर्मणि औणादिकः किप्रत्यय इति भावः ॥ ३ ॥

इन्द्र वाजेषु ॥ स्वयं तु सद्भिरिति । [२८-५] दुष्टानां कर्मवशात् उग्रैः स्वयंतु अनुग्रैरिति भावः ॥ ४ ॥

इन्द्रं वयम् ॥ आद्यर्थ इति । [२८-६] विभक्त्यर्थेन सह आद्यर्थे वर्तते । ततश्च वृत्रादिष्वित्यर्थलाभ इति भावः । इदं रूपमिति । [२८-७] वृजी वर्जन इत्यस्मात् रिनिप्रत्यये ऋकारस्याकारे वज्रीति रूपम् । अर्भ इति । [२८-७] ऋगतावित्यस्मात् 'अर्तिगृभ्यां भन्' [उणादि ४४०] इति भन् प्रत्यये गुणे च अर्भ इति रूपम् ॥ ५ ॥ १३ ॥

सनो वृषन् ॥ वर्षित (इ) रिति । [२८-८] वृष् सेचन इत्यस्मात् 'कनिन्युवृषि....' [उ० १६२] इति सूत्रेण कनिन् प्रत्यये निष्पन्नो वृषन्शब्दः वर्षणकर्तृत्ववाची ज्ञेयः । सहार्थो वेति [२८-९] 'साकंसत्रासमं सह' इत्यमरोक्तेरिति भावः । कर्मण्युकार इति । [२८-१०] 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' [उणादि. २७] इति उप्रत्यय इति भावः । अपावृधीति ।

[२८-१०] अपपूर्वात् वृञः ' शृणुञ्कृवृभ्यश्छन्दसि ' [६।४।१०२] इति हेर्धिरादेशे श्नुप्रत्ययलोपे ' निपातस्य च ' [६।३।१२६] इति उपसर्गदीर्घत्वे च अपावृधीति रूपम् ॥ ६ ॥

॥ तुंजे तुंजे ॥ क्रियाया इति शेष इति । [२८-१४] ततश्च तुंजे इत्यस्य क्रियाया गमने प्रापणे क्रियाया दापन इति वाऽर्थः संपद्यते । वर्णव्यत्यासानेदिनेति [२८-१६] विन्दत इत्यत्र दकारस्य धकारे अकारनकारतकाराणां लोपे विन्ध इति भवतीति भावः ॥ ७ ॥

वृषायूथेव ॥ इयर्तीति । [२८-१९] ऋगतावित्यस्मात् तिपि शपि तस्य श्लौ द्वित्वे ' अर्तिं पिपर्त्योश्च ' । [७।४।७७] इति इत्वे ' अभ्यासस्यासवर्णे ' [६।४।७८] इति इयङादेशे धातोर्गुणे इयर्तीति रूपम् ॥ ८ ॥

य एकः ॥ इरज्यतीति [२८-२१] । इरज ऐश्वर्य इत्यस्मात् ' कण्ड्वादिभ्योयक् ' [३।१।२७] इति यकि तिपि च इरज्यतीति रूपम् ॥ ९ ॥

इन्द्रंवोविश्वतः ॥ कथमाह्वानमिति । [२८-२५] सर्वगतस्य किमर्थमाह्वानमित्यर्थः । केवल इति । [२८-२५] असहाय इत्यर्थः ॥ १० ॥ १४ ॥ ७ ॥ २ ॥

एन्द्रसानसिम् ॥ वार्षिष्ठमिति । [२९-१०] वृद्धशब्दादिष्ठन् प्रत्यये ' प्रियस्थिर ..... ' [६।४।१५७] इत्यादिना वर्षादेशे वर्षिष्ठमिति रूपम् । भरेति [२९-२] हृधातोः सिपि शपि सिपो हि इत्यादेशे लुकिच गुणे ' हृगृहोर्भश्छन्दसि ' [वा० सू० ३।१।८४] इति हकारस्य भत्वे भरेति लोट्मध्यमपुरुषैकवचनम् । ॥ १ ॥

नियेन मुष्टि ॥ ' त्वोतास इति रूपं साधयति ' छन्दसि युष्मदस्मदोरिति । [२९-३] 'युष्मदस्मदोरनादेशे' [७।२।२६] इति सूत्रेण छन्दसि प्रत्ययोत्तरपदयोः युष्मदस्मदोः आकारादेश उपसंख्येय इति भावः । युष्मद्ऊतास इति स्थिते ' प्रत्ययोत्तरपदयोश्च ' [७।२।९७] इति मपर्यन्तस्य युष्मच्छब्दस्य त्व इत्यादेशे दकारस्यात्व त्वोतास इति रूपम् । धात्वन्तरस्येदं (स्यैतद्) रूपमिति । [२९-४] भाष्यस्थं निरुन्धाम इति रूपं रुधेर्भौवादिकस्य रूपमित्यर्थः । रुधिर् आवरण इत्यस्मात् लोटि आत्मनेपदे महिङि टेरेत्वे ' एत ऐ ' [३।४।९३] इति तस्य ऐत्वे श्नमि महिङः ' आडुत्तमस्यपिच्च ' [३।४।९२] इत्याडागमे रुणधामहै इति ऋग्गतं रूपम् । रुन्धधातोः लोटि परस्मैपदे मसि शपि अडागमेछान्दसे सकारलोपाभावे रुन्धामः इति भाष्यस्थं रूपम् । अभ्यासकल्पनेति [२९-८] । एकएवोपसर्गः आदरार्थं पुनः पुनरुच्चार्यत इति कल्पनानुपपत्तेरित्यर्थः । नन्वेवं तर्हि ' प्रप्रवस्त्रिष्टुभमि ' त्यत्र एकस्यैवोपसर्गस्य प्रकर्षेणेत्यर्थलब्धये द्विरुच्चारणमिति न स्यात् । किंतु तत्रापि धात्वन्तरमध्याहृत्य अपरस्य प्रशब्दस्यान्वयः स्यात् इत्यत आह । प्रप्रवस्त्रिषुभमित्यादाविति । [२९-८] इषमित्यादिकर्मकाण्डगणामेकवचनत्वेन वाक्यस्य भेत्तुमशक्यत्वादभ्यासकल्पनमिति भावः । ॥ २ ॥

इन्द्रत्वोतासः ॥ घनेति । [२९-१०] घनशब्दात् तृतीयैकवचनटाप्रत्यये तस्या डादेशे घनेति तृतीयैकवचनतमिति बोध्यम् । आददीमहीति [२९-१०] आङ्पूर्वाद्दाञः लिङि शपि तस्य श्लौ द्वित्वे सीयुटि ' लिङः सलोपोऽनन्त्यस्य ' [७।२।७९] इति सलोपे

'श्नाभ्यस्तयोरातः' [६।४।११२] इति धात्वाकारलोपे लिङो माहिङादेशे च सति आददीमहीतिरूपंज्ञेयम्। युद्धानिवेति। [२९-११] अस्मिन्व्यास्याने युधीत्येकवचनं बहुवचनार्थे। सतिसप्तमीयम्। ततश्चयुद्धेषु प्रसक्तेषु सत्सु स्पृधः युद्धा(धा.)नि संजयेमेति योजना ॥ ३ ॥

वयं शूरेभिः ॥ अस्तृभिः आस्रिभिरिति [२९-१२] ऋचिसंप्रसारणं छान्दसामिति भावः। **पृतन्यत इति** [२९-१२] पृतनाशब्दात् 'सुप आत्मनः क्यच्' [३।१।८] इति क्यचि 'कव्यध्वरपृतनस्यर्चि लोपः' [७।४।३९] इति आकारलोपे लटः शत्रादेशे **पृतन्यच्(त)छन्द** इति ज्ञेयम्। **ससह्यामेति** [२९-१२] सहेर्यासुटि(डि)तस्य लुकि द्वित्वे संज्ञापूर्वकविधेरनित्यत्वेन 'दीर्घो ऽ कितः' [७।४।८३] इति दीर्घाभावे लिङि तस्य मस्आदेशे शपि 'चर्करीतं च' [गणसूत्र] इत्यन्तादिवद्भावेन तस्यलुकि यासुटि सलोपे ससह्यामेति रूपमिति ज्ञेयम्। **सहामहै इति।** [२९-१३] सहेरात्मनेपदित्वात् सहामहै इत्युक्तामिति ज्ञेयम्। **' उपसर्गप्रादुर्भ्याम्....'** [८।३।८७] **इति** [२९-१३] उपसर्गेणः प्रादुषश्च परस्यास्तेः सस्य षः स्यात् यकारे अचि च परे इतिसूत्रार्थः ॥ ४ ॥

महाँ इन्द्रः ॥ प्राथिनेति। [२९-१४] पृथुशब्दात् 'पृथ्वादिभ्य इमनिज्वा' [५।१।१२२] इति इमनिचि 'टेः' [६।४।१४३] इति टिलोपे 'रऋतो हलादेर्लघोः [६।४।१६१] इति ऋकारस्य रादेशे प्रथिमन्शब्दः निष्पन्नो भवति। ततस्तृती-

---

टीप–१ इण् प्रत्याहारः। इकार उकाराभ्यामित्यर्थः

यैकवचने 'अल्लोपोनः' [६।४।१३४] इत्यकारलोपे छान्दसे मकारलोपे **प्रथिनेति** रूपमिति ज्ञेयम् ॥५॥ ॥१५॥

समोहे ॥ आशत अश्नुवतेति [२९-१९] अशू व्याप्ताविति्यतः श्नुप्रत्यये तस्य छान्दसे **आशतेति** रूपम् ॥६॥

यः कुक्षिः ॥ पिन्वत इति [२९-२२] पिविसेचन इत्यस्मात् व्यत्ययेयनात्मपदे टेरेत्वे शपि नुमिच **पिन्वत** इतिरूपं ज्ञेयम् । **अकारलोपादिति** । [२९-२३] ककु(दृश)च्छन्दात् भवार्ते अणि आदिवृद्धौ अणोऽकारलोपे **काकुदिति** हलन्तं छान्दसं रूपमिति भावः ॥ ७ ॥

ग्वाह्यस्य॥ प्रत्ययान्तर्भावे- ति । [३०-१] स्त्रीप्रत्यय-लोपेत्यर्थः । **विरप्शिन्शब्दः** बलिष्टवाची । तत्संबन्धात् लक्षणया तद्वाणीप्रतिपादक इति भावः । ॥ ८ ॥

एवाहिते॥दाशुष इति । [३०-२]"दाश्वान् साह्वान् मीढ्वां [६।१।१२] इति निपातनात् **दाशुष** इति रूपं साधु । ॥९॥

ग्वाह्यस्य काम्या ॥ स्तोम इत्येक वचनं बहुवचनार्थ इत्यभिप्रेत्याह । **स्तोमाश्चेति** । [३०-४] ॥ १०॥१६॥८॥

इन्द्रेहि ॥ ननु सोमस्य पर्वाणि येषामिति षष्ठ्यर्थः क इत्यतस्तमाह । **योहि यस्येति** [३०-७] **दीर्घाभाव इति** । [३०-१०] परसवर्णदीर्घबाध इति भाव : । **विकरणादिति** । [३०-११] भविष्यत्कालस्यापेक्षितत्वात् लृटा भाव्यम् । कालव्यत्ययेन लटि दिवादित्वात् श्यना भाव्यम् । विकरण व्यत्ययेन श्यन्लुकि सिपि **मत्सी**ति रूपमिति भावः । ॥ १ ॥

एमेनम् ॥ करणे इकार इति । [३०-१३] ' मदि-स्तुतिमोदमदस्वप्नकान्ति गतिषु ' इति धातोरिकारः नुम्चेति भावः। **'आट्गम···'**[३।२।१७१] इति [३०-१३] कृधातोः। कि प्रत्यये लिङ्वद्भावेन द्वित्वेच **चक्रि** शब्दनिष्पत्तिरिति भावः । करणे किरि-त्यनेन [३०-१३] कारणे किरित्येवोक्तं भवति । ततश्च चक्रिमित्यस्य कर्मकारणमित्यर्थो बोध्यः । ॥ २ ॥

मत्स्वाशु शिप्र ॥ सुशिप्रेति । [३०-१६] अनेकार्थत्वाद्धातूनां सुखवाचिनः शमेर्डप्रत्यये ' छन्दसि परे पि ' [१।४।८१] त्युक्तेः प्रेत्यु-पसर्गस्य परनिपाते शप्रेत्यानन्द वाचि " तृतीयोतिशय " [महाव्या.] इति वचनात् शकारस्थाकारस्य इकारे **शिप्रेति** रूपम् ॥ ३ ॥

असृग्रम्॥ असृग्रमनारतमिति । [३०-१९] । सृजेःकर्मणि रक्प्रत्ययः ' न्यङ्क्वादीनां च ' [७।३।५३] इति कुत्वं ततो [illegible] **असृग्रमिति** रूपम् । अत्यक्तवाचि क्रियाविशेषणम् । ततश्च असृ-ग्रमित्यस्यानारतमित्यर्थोलभ्यत इति भावः । **अहासतेति ।** [३०-१९] ओहाङ्गतौ लुङ् तस्यझः ' आत्मनेपदेष्वनतः [७।१।५] इति झस्यअतादेशः अडागमः सिच् ततश्चा **हासतेति** रूपम् । ॥ ४ ॥

संचोदय ॥ विभुप्रभ्विति रूपसिद्धिं स्फोरयितुं सूत्रं पठति । **विप्रसंभ्य** [३।२।१८०] **इति** [३०-२२] **लडर्थ इति** [३०-२२] अस्तेर्व्यत्ययेन लडर्थे लेटि तस्य तिपि " इतश्चलोपः परस्मैपदेषु " [३।४।९७] इति इकारलोपे " लेटोऽडाटौ " [३।४।९४] । इत्यडागमे **असदिति** रूपम् । अच्युतमित्यर्थः । प्रभुशब्दस्य कथमित्यत आह । **प्रभु प्रभूतामिति ॥** [३०-२३] प्रभ्वित्यनेन

प्रभूतमित्यर्थः प्रतीयते । प्रकर्षेण विद्यमानं च क्षयशून्यम् । तदेवाच्युत-मित्युच्यत इति भावः ॥ ५ ॥ १७ ॥

अस्मान्त्सु ॥ तुविद्युम्नेति । [३०-२३] बहूनामसु पाठात् **तुवि**शब्दो बहुत्ववाची । 'द्युम्नं द्योततेर्यशो वे'ति वचनात् **द्युम्न**-शब्दः यशोवाचीति ज्ञेयम् । **रभस्वत इति ।** [३०-२४] रेभ शब्द इत्यस्मात् असुन् प्रत्यये णकारस्याकारे **रभस्** शब्दो भवति ततो मतुपि **रभस्वच्** (त्) शब्द इति ज्ञेयम् ॥ ६ ॥

संगोमत ॥ संधेहीति । [३१-१] डुदाञ् दान इत्यतः लोटि सिपि शपः श्लौ द्वित्वादौ 'ध्वसोरेद्धावभ्यासलोपश्च' [६-४-११९] इति एत्वे अभ्यासलोपे छान्दसे दकारस्य धकारे **धेहीति** रूपमिति ज्ञेयम् ॥ ७ ॥

अस्मे धेहि ॥ सहस्रसातममिति [३०-२] सहस्र शब्दोपपदात्सनेः ' जनसनखनक्रमगमो विट् ' [३।२।६७] इति विट्प्रत्यये 'विड्वनोरनुनासिकःस्यात् [६।४।४१] इति नकारस्यात्वे सहस्रसाशब्दः ततस्तमपि **सहस्रसातम** शब्द इति ज्ञेयम् ॥ ८ ॥

वसोरिन्द्रम् । वसोरित्यस्य वसुमित्यनेनान्वय इत्यभिप्रेत्याह **वसोर्वसुपतिमिति ।** [३१-५] **ऋग्मियमिति** [३१-५] ऋग्मेयशब्दे व्यत्ययेन एकारस्य इकारे **ऋग्मियमिति** रूपम् । **होमेति ।** [३१-६] ह्वेञः लटि तस्य मसि छान्दसे सकारलोपे शपो लुकि 'ह्वः संप्रसारणम्' [६।१।३२] इत्यतः परेण 'बहुलं छन्दसि ' [६।१।३४] इति सूत्रेण संप्रसारणे छान्दसे गुणे **होमेति** रूपमिति ज्ञेयम् ॥ ९ ॥

...८...

सुते सुते ॥ नरीयते वेत्यारिरीति । [३१-७] रीङ्क्षय इत्यतोडिः ततोनङ्समास इति भावः । शूषमिति (३१-८) सुखनामसु पाठात् शूषशब्दः सुखवाची । प्रातिसोमसवनामिति । (३१-८) इतः परं ओकस इत्यतः पूर्वं नीत्युच्छिन्नं गृहायेत्यतः पूर्वं सदित्युच्छिन्नम् । सदिति योग्यतया संबन्ध । (३१-९) इति वाक्यं प्रक्षिप्तम् । सतामिति च प्रक्षिप्तम् । समीचीनेत्युच्छिन्नम् । न्यर्चतीत्यत्र नीति प्रक्षिप्तम् । ततश्चैवं टीकावाक्य पाठः । न्योकसे सदृगृहाय समीचीनाश्रयाय बृहते पूर्णाय इन्द्राय देवाय अर्चतीति । अवश्यं चैतदेवं विज्ञेयम् । न्योकस इत्यस्यैकपदत्वेनार्चतीत्यनेन संबन्धायोगात् भाष्ये समीचीनाश्रयायेत्यभिप्रायेण न्योकस इत्यस्य सदृगृहायेत्यर्थस्योक्तत्वाच्च अत एव क्वचित्पुस्तके न्योकसे अर्चतीति पाठः ॥ १० ॥ १८ ॥ ९ ॥

गायन्ति ॥ अरंकमिति [३१-११] अरंकरमिति शब्दे अरंशब्दस्य टिलोपे अर्कोमिति रूपम् ॥ १ ॥

यत्सानोः ॥ पूर्वमस्पष्टेति संबुद्ध्यन्तत्वेन व्याख्यानम् । अधुना क्रियापदत्वमभिप्रेत्याह । अस्पष्टेति । [३१-१५] स्पश-धातोः लुङि तस्य तादेशे श्लेः सिचि आगमशासनस्यानित्यत्वेनेड-भावे सिचो लोपे धातुशकारस्य षत्वे ष्टुत्वे अडागमे च सति अस्पष्टेति रूपमिति ज्ञेयम् । तृंचो लोप इति । (३१-१६) कर्तृत्वमिति शब्दे तृचो लोपे कर्त्वमिति रूपम् ॥ २ ॥

युक्ष्वाहि ॥ सेचकाविति । (३१-२४) रेतस इति शेषः । तस्य तात्पर्यमाह । युवानाविति । [३१-२४]

टीप–१. कर्त्वं तृचोलोपः कर्तृत्वम् इति टीकापाठो भाव्यः ।

युक्ष्व । युड्क्ष्वेति । युजेर्लोटि थासि थासः से इत्यादेशे 'सवाभ्यां वामौ' [३।४।९१] इति एकारस्य वकारे श्नमः छान्दसे लोपे 'चोः कुः' [८।२।३०] इति जकारस्य कुत्वे युक्ष्वेति छान्दसं रूपम् विकरणलोपाभावे युडक्ष्वेति भाषायां रूपं ज्ञेयम् ॥ ३ ॥

एहि स्तोमान् ॥ गृणीहीति [३२-२] गृशब्द इत्यस्मात् लोटि सिपि तस्य हित्वे श्नाप्रत्यये 'ईहल्यघोः' [६।४।११३] इतीत्वे 'दीनां ह्रस्वश्चा' [७।३।८०] इति धातोः ह्रस्वत्वे गृणीहीति रूपम् आरुवेति [३२-२] आङ्पूर्वात् रु शब्द इत्यस्मात् लोटि सिपि हित्वे विकरणप्रत्ययेन श्नप्रत्यये उवङादेशे लुकि आरुवेति रूपम् ॥ ४ ॥

उक्थमिन्द्राय ॥ निष्षिदिति । [३२-५] निःपूर्वात् षिधेः क्विपि धात्वादेः सत्वे छान्दसे धातोः सस्य षत्वे निसः सकारस्य 'ष्टुनाष्टुः' [८।४।४१] इति षत्वे निष्षिदिति रूपम् । ननु 'कर्तृकर्मणोः कृति' [२।३।६५] इति स्मरणात् भाष्ये शत्रूणामिति वक्तव्यं कथं शत्रूनित्युक्तमित्यत आह । उपपदमिति [३२-६] कृदुत्पत्तेः पूर्वं पुरु इत्युपपदं द्वितीयान्तं कर्मवाचीति दर्शयितुं शत्रूनित्युक्तमित्यर्थः अन्यथेति अत्र अन्यथेति प्रक्षिप्तम् । अथवे [३२-७] त्युच्छिन्नम् । ततश्चैवं टीकावाक्यपाठः । अथवा विभक्तिव्यत्ययेन शत्रूणामित्यर्थः इति । एतेना 'न्यथा विभक्तिव्यत्ययेन शत्रूणामित्यर्थ' इति वाक्ये पदानां परस्परमनन्वय इति परास्तम् । यङ्लुगन्तादिति । [३२-९] रण शब्द त्यस्मात् यङि 'यङोऽचि च' [३२।४।७४] इति यङो लुकि द्वित्वे लेटि लेटोऽडागमे लेडादेशतिप कारलोपे रारणदिति रूपम् ॥५॥

तमित्सखित्वे ॥ शकदिति [३२-१२] शक्लृ धातोः लुङि च्लिप्रत्यये तस्य ' पुषादिद्युताद्यृदितः परस्मैपदेषु [३।१।५५] इति अङादेशे छान्दसे अडभावे शकदिति रूपम् । अशकदिति भाषायां रूपम् । दयमान इति [३२-१३] दयधातोः लटः शानचि शपि ' आनेमुक् ' [७।२।८२] इति मुकि रूपमेतदिति ज्ञेयम् ॥ ६ ॥ ॥ १९ ॥

सुविकृतम् ॥ अपवृधीति । [३२-१६] वृञः लोटि तस्य हीत्यादेशे ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' [६।४।१०२] इति हेर्ध्यादेशे छान्दसे विकरणलोपे वृधीति रूपम् । कृणुष्वेति । [३२-१७] कृधातोर्लोटि व्यत्ययेन श्नुप्रत्यये कृणुष्वेति रूपमिति ज्ञेयम् ॥ ७ ॥

नहित्वा ॥ कण्ड्वादिरिति । [३२-२०] ऋघ शब्दात् यकि शानचि मुकि ' अकृत्सार्वधातुकयो र्दीर्घः ' [७।४।२५] इति दीर्घे ऋघायमाणमिति रूपमिति ज्ञेयम् । इन्वत इति [३२-२१] इवि व्याप्तावित्यस्मात् लटि तस्य तसादेशे नुमि शपि च इन्वत इति रूपम् । लक्ष्यें लेडिति । [३२-२३] जिधातोर्लेटि तस्य सिपादेशे " सिब्बहुलं लेटि " [३।१।३४] इति सिपि लेट अडागमे धातोर्गुणे जेष इति रूपम् । संधूनुहीति [३२-२४] धूञ्कम्पनइत्यस्मात् श्नुप्रत्यये ' छन्दसि वेति वक्तव्यम् ' [वार्ति ७, ६।१।१] इति वचनात् ' उतश्च प्रत्ययादसंयोगपूर्वात् ' [६।४।१०६] इति प्राप्तस्य हेर्लुकोऽभावे धूनुहीति रूपमिति ज्ञेयम् । ॥ ८ ॥

आश्रुत्कर्ण ॥ आश्रुत्कर्णेति । [३२-२५] आङ् पूर्वात् श्रुधातोः क्विपि ' ह्रस्वस्य पिति कृति तुक् ' [६।१।७१]

इति तुकि आश्रुत् इति रूपम् । दधिष्वेति [३३-२] । धाञो लोटि द्विर्वचने ' छन्दस्युभयथा ' [३।४।११७] । इति आर्धधातुकत्वादिडागमे आकारलोपे दधिष्वेति रूपम् । कृष्वेति [३३-३] कृञो बाहुलिके विकरणलोपे कृष्वेति रूपम्। चशब्दा इति । [३३-३] भाष्यस्या इति शेषः । ॥ ९ ॥

विभ्राड्हित्वा ॥ विद्मेति । [३३-६] । 'विदो लटो वा' [३।४।८३] इति मसो मादेशे विद्मेति रूपम्। सहस्रसा इति । [३३-६] सहस्रशब्दोपपदात् सनोतेः ' जनसनखनक्रमगमो विट् ' [३।२।६७] इति विट्प्रत्यये ' विड्वनोः ... ' [६।४।४१] इत्यात्वे सहस्रसा इति रूपम् । हूमह इति । [३३-७] । ह्वेञः महिङि टेरेत्वे छान्दसे शपो लुकि छान्दसे संप्रसारणे ' हलः ' [६।४।२] इति दीर्घेच हूमह इति रूपम् । ननु श्रोतारमित्यस्य तृजन्तत्वात् ' कर्तृकर्मणोःकृति ' [२।३।६५] इति आङ्ज्ञानशब्दात् षष्ठया भाव्यमित्यत आह। श्रोतारामिति तृनिति । [३३-७] ' न लोकाव्यय ' [२।३।६९]। इति निषेधात् न षष्ठीति भावः ॥ १० ॥

आतून ॥ मन्दो मद इति । [३३-१३] मदी हर्ष इत्यस्मात् कप्रत्यये इदित्वाभावान्नुमभावे अनुस्वारोऽधिक इति भावः । नव्यमिति [३३-१४] । णु स्तुतावित्यस्मात् ' अचो यत् ' [३।१।९७] । इति यत्प्रत्यये ' यातोस्तातिमित्तस्यैव ' [६।१।८०] इति अवादेशे नव्यमिति रूपमिति भावः । तिरेति [३३-१४] तृधातोर्लोटि शपि हेर्लुकि ' इत्वोत्वाभ्यां गुणवृद्धी पूर्वविप्रतिषेधेन ' [वार्ति, प. १।१।१००] इति गुणे तरेति रूपम् । तृतीयोऽतिशय

इति अकारस्येकारे**तिरेति** रूपमिति ज्ञेयम्। **सहस्रसामिति** [३३-१५] सहस्रशब्दो षपदात् सनोतेः 'जनसनखनक्रमगमो विट्' [३।२।६७] इति विटि 'विड्वनोरनुनासिकः स्यात्' [६।४।४१]। इति आत्वे विटः सर्वापहारिलोपे **सहस्रसा** शब्दः आकारान्तपुलिङ्गः। **कृधीति** [३३-१५] कृधातोः छान्दसे विकरणाभावे 'श्रुशृणु-पृकृवृभ्यश्छन्दसि' [६।४।१०२] इति हेर्ध्यादेशे **कृधीति** छान्दसं रूपम्। ॥ ११ ॥

परित्वा ॥ आयोलाभो यस्यासाविति। [३३-१६] अनेनायशब्दस्य व्यत्ययेनाकारस्योकारे **आयुरिति** रूपम् ॥ १२ ॥ ॥ २० ॥ १० ॥

इन्द्रं विश्वा। समुत्पूर्वादिति [३३-२०]। सम् उत् पूर्वात् रिचेर्डप्रत्यये टिलोपे जश्त्वे **समुद्रेति** रूपमिति भावः। ॥१॥

सख्ये त ॥ मा भेमेति। [३३-२३] भीधातोर्लुङि तस्य मसि छान्दसे सिचो लुकि सिच्प्रयुक्तवृद्ध्यभावे 'छन्दस्युभयथा' [६।४।६४] इति मस आर्धधातुकत्वेन ङित्त्वाभावात् गुणे 'नित्यं ङितः' [३।४।९९] इति सलोपे माङ्योगादडभावे **भेमेति** रूपम् **प्रणोनुम इति**। [३३-२४] णुस्तुतावित्यतः लटि तस्य मसि य-ङ्लुकि द्वि(गा)त्वे 'गुणो यङ्लुकोः' [७।४।८२] इति अभ्यासस्य गुणे शपो लुकि "उपसर्गादसमासेऽपि णोपदेशस्य" [८।४।१४] इति णत्वे **प्रणोनुम** इति रूपं ज्ञेयम् ॥ २ ॥

पूर्वीरिन्द्रस्य ॥ नविदस्यन्त इति। [३३।२५] यद्यपि दस्यतिः परस्मैपदी तथापि भाष्यकृता न भिद्यन्त इति व्यत्ययेन कर्मणि व्याख्यातमिति दस्यन्त इति कर्मणि रूपं प्रत्युक्तम् ॥३॥

पुरां भिन्दुः । [३४-१] भिदेः " पृभिदिव्यधिगृधि-धृषिभ्यः " । [उणा. २३] इति कुप्रत्यये " छन्दस्युभयथा " [६।४।११७] इति सार्वधातुकसंज्ञायां भमि भिंदुरिति भौतं रूपम् ॥ ४ ॥

त्वं वलस्य ॥ छान्दसो विकरणलोप इति । [३४-६] अपपूर्वात् पृणो लङि तस्य सिपि स्नुप्रत्ययस्य छान्दसे लोपे गुणे ' हलङ्याब्भ्यो दीर्घात् " [६।१।६८] इति सिपो लोपे अपावरिति छान्दसं रूपम् । भाषायां तु अपावृणोरिति रूपं ज्ञेयम् । अबिभ्युष इति । [३४-७] बिभीभय इत्यस्मात् धातोर्लिटः क्वस्वादेशे द्वित्वादौ बिभीवसिति रूपम् । नञ् समासे अबिभीव-सिति रूपम् । अस्मात् व्यत्ययेन असःस्थाने क्वसि " वसोःसंप्र-सारणम् " [६।४।३१] । इति सूत्रे ' कसोरपि ग्रहणमिष्यत ' इति वचनात् संप्रसारणे यणादेशे षत्वे चअबिभ्युष इति रूपम् । आविषुरिति । [३४-८] । अवतेर्लुङि इयादेशे सिचि इडागमे ह्रेर्जुसि धातोः ' आडजादीनाम् ' [६।४।७२] इति आडागमे आविषुरिति रूपम् । ज्ञात्वामित्वेत्यादीनां भावो यत्र प्रतिष्ठिता इत्यनेनान्वय इति भ्रमं वारयति । ज्ञात्वेत्यादीनामिति । [३४-१२] ॥ ५ ॥

तवाहम् ॥ प्रत्यायमिति । [३४-१५] । प्रतिपूर्वादिणो र्लङः मिपो ऽमादेशे अडागमे " आटश्च " [६।१।९०] इति वृद्धौ आयादेशे प्रत्यायमिति रूपम् । कारव इति । [३४-१७] " कृवापाजिमिस्वदिसाध्यशूभ्य उण् " [उणा. १] इति कृधातोरुणि वृद्धौ असि कारव इति रूपम् । उपातिष्ठन्त इत्यत्रात्मनेपदमयुक्तम् ।

मन्त्रकरणाभावात् । उपान्मन्त्रकरण इत्यनेन मन्त्रकरण एव सिद्धतेरात्मनेपदविधानात् इत्यत आह । मन्त्रैस्त्वामपूजयन्निति । [३४-१७] ॥ ६ ॥

मायाभिः ॥ ननु 'अस्मायामेधास्रजो विनिः' [५।२।१२१] इति वचनात् मायाविनमिति भाव्यमित्यत आह । व्रीह्यादित्वादिति [३४-१८] तृतीयस्येति । [३४-२०] । 'मेधः क्रतौ क्रियायां चे'ति विश्वोक्तेर्मेधशब्द अकारान्तः । मेधशब्दोपदात् रमेर्डप्रत्यये मेधरशब्दः । तत्राकारस्थाने य इकारः स अतिशयार्थकः । तृतीयवर्णस्यातिशयार्थकत्वादिति भावः । उत्तिरेति [३४-२०] । उत्तरेत्यत्र तृतीयोऽतिशय इत्यकारस्येकार उत्तिरेति रूपम् ॥ ७ ॥

इन्द्रमीशानम् ॥ अभ्यनूषतेति । [३४-२२] । णू स्तवन इत्यस्मात् 'छन्दसिलुङ्लङ् लिटः' [३।४।६] इति सार्वकालिके लुङि व्यत्ययेनात्मनेपदमस्यात् इत्यादेशे सिचि छान्दसे इडभावे घातोरङागमे अनूषतेति रूपमिति ज्ञेयम् । ॥ ८ ॥ २१ ॥ ॥ ११ ॥ १ ॥

मानादिति प्रत्येकमिति [३४-२४] ऋक्संहितायाः मानात् स्वाध्यायात् व्यासनिर्मितात् प्रबन्धात् मानात् ब्राह्मणेभ्यो मानादिति प्रत्येकमभिसबध्यत इत्यर्थः । ऋक्संहिताया इत्यादि पञ्चमी तृतीयार्थ इत्यभिप्रेत्ययोजनान्तरमाह । यद्देति । [३४-२५] ननु शतस्य ऋचां समाहार इति विगृह्य समासे एकवचनेन भाव्यं कथं शतग्भिरित्युक्तमित्यत आह । विशेषणसमासोऽयमिति [३५-६] शतंच ताः ऋचश्चेति विगृह्य ' विशेषणं विशेष्येण बहुलम् । [२।१।५७] इति विशेषणसमासाङ्गीकाराच्चैकवचनप्रसक्तिः । समासान्तविधेरनित्य-

त्वात् समासान्तोऽपि शतर्गिभिरिति साधुरिति भावः । शतसंख्याभ्य उत्तरा इति [३५-७] इतःपरं टीकायां श्रूयमाणं एकोनचत्वारिंशदपीति वाक्यं प्रक्षिप्तम् । त्रयश्चत्वारिंशदपीति वाक्यमुच्छिष्टम् । अवश्यं चैतदेवं विज्ञेयम् । शतसंख्याभ्य उत्तरासां कस्य नूनमित्यतः प्राक्तनीन ऋचां त्रयश्चत्वारिंशत्त्वेन एकोनचत्वारिंशत्त्वाभावात् ।

इति ऋष्यादिविचारः ॥

अग्निं दूतम् ॥ वृणीमह इति । [३५-१७] वृङ् संभक्तावित्यतः महिङि टेरेत्वे श्नाप्रत्यये ' ईहल्यघोः ' [६।४।११३] इति ईत्वे वृणीमह इति रूपम् ॥ १ ॥

अग्निमग्निम् ॥ कंचिद्विशेषमिति । [३५-१८] जामदग्न्यत्वरूपं विशेषं चाहेत्यर्थः । हवीमभिरिति । [२५-२०] हवेमः बाहुलिके ईमनिन्प्रत्यये छान्दसे संप्रसारणे पूर्वरूपे गुणे अवादेशे मिसि च हवीमभिरिति रूपम् । हवन्तेति । [२५-२०] ह्वेञो लङि ' बहुलं छन्दसि ' [६।१।३४] इति संप्रसारणे अडभावे झस्यान्तादेशे हवन्तेति रूपम् ॥ २ ॥

अग्ने देवान् ॥ जज्ञान इति । [३५-२१] जनी प्रादुर्भाव इत्यतः लिटि तस्य कानचि ञित्वादौ ' गमहनजनखनघसां लोपः क्ङित्यनङि ' [६।४।९८] इति उपधालोपे ' स्तोश्चुनाश्चुः " [८।४।४०] इति श्चुत्वे जज्ञान इति रूपम् ॥ ३ ॥

ताँ उशतः ॥ आसत्सीति । [३५-२४] आङ्पूर्वात् सदो सिपि शब्लुकि आसत्सीति वैदिकं रूपम् । आसीदसीति [३५-२४] आङ्पूर्वात् सदेः शपि ' पाघ्राध्मा " [७।३।७८] इत्यादिना धातोः सीद इत्यादेशे सिपि आसीदसीति भाषाया

रूपम् । भाष्ये उपविक्षसीति कालव्यत्ययेनोक्तमिति सूचयितुं उपविक्षसीत्यनूद्य उपवेक्ष्यसीत्युक्तम् ॥ ४ ॥

घृताहवन ॥ यङ्लुगन्तादिति । [३५-२५–३६-१] यङ्लुगन्ताद्दीव्यतेरनुनि द्वित्वादौ संज्ञापूर्वकविधेरनित्यत्वेन 'गुणो-यङ्लुकोः' [७।४।८२] इति गुणाभावे दीर्घोऽकितः [७।३।८३] [७।४।८३] इति दीर्घे दीदिव इति रूपम् रिषत इति । [३६-१] इतःपरं टीकायां श्रूयमाणं अन्तर्णीतण्यर्थोऽयमिति वाक्य प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेव विज्ञेयम् । नाशकानितीति नाशकर्तृत्वेन व्याख्यानात् तथा रक्षःस्विन इति पदस्य रक्षःसंबन्धिन इति व्याख्यानात् । अन्यथा रक्षःस्वामिन इति व्याकुर्युः। रक्षःस्विन इति । [३६-१] । रक्षःशब्दात् 'अस्मायामेधास्रजो विनिः' [५।२।१२१] इति विनिप्रत्यये शसि च रक्षःस्विन इति रूपम् ॥ ५ ॥

अग्निनाग्निः ॥ जुह्वास्य इति । [३६-२] । यद्यपि हु दानादानयोरित्यस्मात् 'धुतिस्वपिजुहोतीनां द्वे च' [वा सू. ३।२।१७८] इति वार्तिकेन क्विपि द्वित्वे च 'जुहोतेर्दीर्घश्च [वा. सू. ३।२।१७८] इति वार्तिकेन दीर्घे जुह्वारिति रूपम् । तथापि नपुसकत्वविवक्षया 'ह्रस्वो नपुसके प्रातिपदिकस्य' [१।२।४७] इति ह्रस्वत्वे जुहु होमाधिकरणं आस्यं यस्येति व्याख्यानमुपपन्नमिति बोध्यम् । ॥ ६ ॥ २२ ॥

कविमग्निम् ॥ होतृग प्रतीति । [३६-८] होतारं च प्रतीति ग्राह्यम् ॥ ७ ॥

यस्त्वाम् ॥ सपर्यतीति । [३६-८] सपर् पूजायामिति धातोः कण्ड्वादित्वात् यकि लिटि तिपि सपर्यतीति रूपम् । ॥८ ॥

यो अग्निम् ॥ धातुपाठेन 'देववीतिस्तु तङ्गतिरि' [भाष्य १२-१६]ति व्याख्यानं घटयति वीगतीति । [३६-१०] ॥ ९ ॥

सनःपावक ॥ [३६-१२] पूञ् पवन इत्यस्मात् कर्तरि ण्वुल्प्रत्यये पावकेति रूपम् । दीदिव इति । [३६-१२] दीव्यतेर्यङ्लुगन्तादसुनि द्वित्वादौ संज्ञापूर्वकविधेरनित्यत्वेन गुणाभावे 'दीर्घोऽकितः [७।४।९४] इति अभ्यासस्य दीर्घत्वे दीदिव इति रूपम् ॥ १० ॥

सनःस्तवानः ॥ नवीयसेति । [३६-१४] नवशब्दादीयसुनि तृतीयैकवचने नवीयसेति रूपम् । स्तवान इति । [३६-१५] । ष्टुञ् स्तुतावित्यतः कर्मणि लटि तस्य शानचादेशे 'छन्दस्युभयथा' [६।४।६४] इति आर्धधातुकत्वेन यगाद्यभावे गुणे स्तवान इति छन्दसि रूपम् । ॥ ११ ॥

अग्ने शुक्रेण ॥ हूतिभिरिति । [३६-१७] 'ह्वेञः क्तिनि संप्रसारणे तृतीयाबहुवचने हूतिभिरिति रूपम् । ॥ १२ ॥ ॥ २३ ॥ १२ ॥

सुसमिद्धः ॥ आप्रीसूक्तमिति । [३६-१८] आ सम्यक् प्रीयते याभिः ऋग्भिर्भगवान् ता ऋचः आप्रिय इत्युच्यन्ते । 'आप्रीभिराप्रीणाति' इति ब्राह्मणवाक्यात् । आप्रीभिर्युक्तं सूक्तं आप्रीसूक्तमित्यर्थ । यक्षीति । [३६ १९] यजेर्लोटः सिपि शब्लुकि 'वा छन्दसि' [३।४।८८] । इति सेर्हित्वाभावे 'व्रश्च' [८।२।३६] इति षत्वे कत्वे 'आदेशप्रत्यययोः' [८।३।५९] । इति सस्य षत्वे यक्षीति छान्दसं रूपम् । बहुवारमुच्यत इति । [३६-२०] । मेधातिथिना देवानावहेति बहुवारमुच्यते । तेन सस्य

यज्ञादरे तात्पर्यं गम्यते अतः आदरात् यजेत्याहाचार्यो भाष्यकार इत्यर्थः। एतेन–ऋचि यज्ञादरसूचकस्याभावादादराद्यजेति कथनमनुपपन्नमिति-परास्तम् ॥ १ ॥

मधुमन्तम् ॥ कृणुहीति । [३६-२३] कृवि हिंसायां करणेचेति धातोः ' इदितोनुम्धातोः ' [७।१।५८] इति नुमि लोटः सेर्ह्यादेशे ' धिन्विकृण्व्योरच ' [३।१।८०] इति उप्रत्यये वकार-स्याकारादेशे ' अतो लोप ' [६।४।४८] इति अकारस्य लोपे ' छन्दसि वेति वक्तव्यम् ' [वा. सू. ६।१।१] इति वार्तिकेन हेर्लुग-भावे **कृणुहीति** रूपम् ॥ २ ॥

नराशंसम् ॥ शंसस्तुताविति । [३६-२४] आङ्-पूर्वादस्मात् कर्मणि घञि **आशंस**मिति रूपम् । **नरैराशंस्यत इति ।** [३६-२४] अत्रानुस्वारः प्रक्षिप्तः । शंस स्तुतावित्यस्मा-त्कर्मणि यकि ' अनिदितां हल उपधायाः क्ङिति ' [६।४।२४] इति नलोपावश्यंभावात् ॥ ३ ॥

अग्ने सुखतमे ॥ मनुसूशब्दोऽयमिति । [३७-१] मनेरुसि प्रत्यये मनुस् इति शब्दो निष्पद्यत इति ज्ञेयम् । ननु ' चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ' [२।१।३६] इति सूत्रेण हितशब्दयोगे चतुर्थीसमासविधानात् ज्ञापकात् ' मनूनां च हितत्वेने'ति [१२-२१] भाष्ये चतुर्थ्या भाव्यं कथं षष्ठीप्रयोग इत्यत आह । **चतुर्थ्यर्थ इति ।** [३७-१] मूले मनुर्हित इत्यत्र चतुर्थी लुप्तास्ति तदर्थज्ञापनाय तदर्थज्ञापनार्थमिति यावत् । षष्ठी प्रयुक्ता भाष्यकृते-त्यर्थः । मूले चतुर्थीविभक्तिरुपपदविभक्तिरेव, न कारकविभक्तिः । ततश्च चतुर्थ्या न संप्रदानत्वमर्थ इति प्रतिपत्तव्यम् । अपितु षष्ठ्यर्थ-एव चतुर्थ्या अर्थ इति प्रतिपत्तव्यामिति ज्ञापनाय षष्ठीप्रयोगः कृत इति भावः ॥ ४ ॥

स्तृणीत ॥ चक्षिङ् ख्याञभाव इति । [३७-४] इतःपरं असनयोश्चेति वाक्यमुच्छिन्नं छान्दसः । छन्दस्युभयथेति वा प्रकृत्यन्तरं वेत्येतावत्प्रक्षिप्तम् । अवश्यं चैतदेवं विज्ञेयम् । 'असनयोश्च' [१] इति वार्तिकेनैव ख्याआदेशप्रतिषेधेन ख्याञभावस्य छान्दसतानुसरणायोगात् । वार्तिकेनैव ख्याञो निषिद्धत्वेन ख्युटः 'छन्दस्युभयथा' [६।४।१६७] इति सार्वधातुकत्वमाश्रित्यार्धधातुकाधिकारविहितः ख्याञ् इह न भवतीति समाधानायोगात् । प्रयोजनाभावे प्रकृत्यन्तरत्वानुसरणायोगात् ॥ ५ ॥

विश्रयन्ताम् ॥ श्रौतं पदद्वयमुपादाय भाष्यस्थपदद्वयेन संयोजयति । द्वारो देवीः । द्वारो देव्य इति [३७-८] द्वार इति षष्ठ्यन्तं पदम् । तेन तत्सम्बन्धोक्त्या देवीनां दासीत्वलभ्यते । श्रिय इति योग्यतया संबध्यत इति भावेन श्रियो दास्य इति भाष्यकृता उक्तमिति बोध्यम् । यष्टव इति । [३७-९] यजेः 'तुमर्थे ससेनस' [३।४।९] इति तवेन्प्रत्यये षत्वे च यष्टव इति रूपम् ॥ ६ ॥ २४ ॥

नक्तोषासा ॥ कसुनिति । [३७-१४] अस्मात् कसुनि 'ग्रहि ज्या ' [६।१।१६] इति संप्रसारणे उषा इति रूपमिति भावः ॥ ७ ॥

ता सुजिह्वा ॥ यक्षतामिति । [३७-१९] यजेर्लोटि तस्य तामादेशे शपि 'सिब्बहुल लेटि' [३।१।३४] इति बहुलग्रहणात् शपः पूर्वं सिपि षत्वकत्वयोः (सिपः षत्वे, जस्यकत्वे), यक्षतामिति छान्दसं रूपम् ॥ ८ ॥

इळा ॥ इळा व्यावृत्त्यर्थो वेति । [३७-२३] तु-शब्द एवार्थः । सा च भारती मही एव नत्विळेति इळाव्यावृत्तिबो-

धनार्थ इत्यर्थः । यथा महीशब्देन भारती उक्ता तथा इळाशब्देनापि गुणातिशयप्रतिपादनाय उक्तेति शङ्कानिरासाय ळाशब्दोक्तत्वव्यावृत्त्यर्थ इति भावः ॥ ९ ॥

इह त्वष्टारम् ॥ त्विषेर्देवतायामिति । [३८-३] त्विषेर्धातोर्देवतायामभिधेयायां तृन्प्रत्ययो भवति । उपधायाः अकारः इडभावश्चेति वार्तिकार्थः ॥ १० ॥

अवसृज ॥ नस्(सन्)शब्दस्य लोकेऽप्रसिद्धत्वादाह । **यद्वेति ।** [३८-६] ॥ ११ ॥

स्वाहा ॥ अकारप्रत्यय इति । [३८-९]कप्रत्यय इत्यर्थः । **कर्मणीदं रूपमिति ।** [३८-१०]हा धातोः कर्मणि कप्रत्यये आकारलोपे नञ्समासे टापि **आहेति** रूपम् । ततः सु आ इति उपसर्गद्वययोगे **स्वाहेति** रूपम् । **कृणोतनेति ।** [३८-११] कृवि हिंसाकरणयोः इत्यस्य इदित्वान्नुमि लोटि 'धिन्विकृण्व्योरच' [३।१।८०] इति उप्रत्यये वकारस्याकादेशे 'अतो लोपः' [६।४।४८]इत्यकारलोपे लोटस्तिपि तिपो व्यत्ययेन 'तप्तनप्तनथनाश्च' [७।१।४५] इति तनबादेशे कृते गुणे **कृणोतनेति** छान्दसं रूपम् ॥ १२ ॥ २५ ॥ १३ ॥

ऐभिरग्ने ॥ अस्मादिति । [३८-१४] दुहेरुत्प्रत्यये डित्वात् टिलोपे शसि इयङुवङ्प्रकरणे 'तन्वादीनां छन्दसि बहुलमुपसंख्यानम्' [वा. सू. ६।४।८६] इति उवङादेशे **दुव** इति रूपम् ॥ १ ॥

आत्वा कण्वाः ॥ अहूषतेति । [३८।१६] । हूवेञो लुङि तदादेशझस्यान्तादेशे सिचि संप्रसारणे 'हलः' [६।४।२] ।

इति दीर्घे गुणाभावे ' आदेशप्रत्यययोः ' [८।३।५९] । इति षत्वे अडागमे च अहूषतेति रूपम् । **आगहीति** । [३८-१७] । गमेर्लोटि तस्य सिपि तस्य हित्वे मकारलोपे विकरणलोपे च आङ्योगे छान्दसं रूपम् ॥ २ ॥

इन्द्रवायू ॥ एवशब्द इति । [३८-१९] । ' त्वष्टा तेजस्वतो विष्णुरि ' (भाष्ये १३-७) त्यतो अनुवृत्तेन विष्णुरित्यतो संबध्यत इत्यर्थः । **मरुच्छब्देत्विति** । [३८-२५] मरुच्छब्दे व्याख्येये सतीत्यर्थः । मारुतशब्दो गणविशेषणम् । ततश्च मरुच्छब्दो व्याख्येय इति भावः । ॥ ३ ॥

प्रवोभ्रियन्त ॥ णेश्छन्दसीतीति । [३९-२] । ण्यन्तान्मदेः " णेश्छन्दसि " [३।२।१३७] इति इष्णुच्प्रत्यये णिचि उपधावृद्धौ " अयामन्ताल्वाय्येत्न्विष्णुषु " [६।४।५५] इति णेरयादेशे जसि **मादयिष्णव** इति रूपम् । **द्रुगताविति** । [३९-३] अस्मात् सप्रत्यये धातोरुकारस्याकारे पुगागमे जसि **द्रप्सा** इति रूपम् । **मध्वइति** । [३९-४] । मधुशब्दात् जसि गुणाभावे यणादेशे **मध्व** इति छान्दसं रूपम् । **प्रभ्रियन्त इति** । [३९-५] । भृञः कर्मणि यकि ' रिङ्शयग्लिङ्क्षु ' [७।४।२८] इति रिङादेशे **भ्रियन्त** इति रूपम् । ॥ ४ ॥

ईळते त्वाम् ॥ भाष्यस्थं अवनार्थप्रवृत्तेति इति । [१३-१४] अवस्युपदव्याख्यानं घटयति । **अवः (वं) अवनमिति** । [३९-८] अवशब्दात् " सुप आत्मनः क्यच् " [३।१।८] इति क्यच्प्रत्यये ' सर्वप्रातिपदिकेभ्यो लालसायामुन्वक्तव्यः ' [वा ह्र, ७।१।५१] इत्युक्त्वा ' सुगित्येक ' इत्युक्तत्वात् । अत्र सुगागमे अवस्यशब्दो

भवति । अस्मात् ' क्याच्छन्दसि ' [३।२।१७०] इति उप्रत्यये अकारलोपे अवस्युरिति रूपमिति ज्ञेयम् । ननु मेधातिथाविति । [३९-९] अत्र प्रतीकग्रहणानन्तर टीकायांश्रूयमाण अस्मदो द्वयोश्चेति वचनादिति भाव [३९-९-१०] इति वाक्यं प्रक्षिप्तम् । आत्मभिन्नधर्माणां बहुत्वात् । वाक्यप्रयोक्तृमात्रविषय बहुवचनान्तं पदामिति भाव इत्युच्छिष्टम् । अवश्यं चैतदविशेषेण ज्ञेयम् । ' अस्मदो द्वयोश्च ' [१।२।५९] इति सूत्रस्यास्मदः एकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवतीत्यर्थैकत्वेन प्रकृतेचास्मच्छब्दाभावेनानुदाहार्यत्वात् । बहुवचन युक्तमिति । [३९-१०] । इतःपर टीकायां श्रूयमाण वाशब्दावितरेतरसमुच्चय [३९-१०] इति वाक्य प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेव विशेषेण ज्ञेयम् । भाष्यस्थयोरितरेतरविकल्पार्थकत्वेनेतरसमुच्चयार्थकत्वाभावात् । कण्वा वयमित्याद्युपपद्यत इति [३९ ११] वाक्ये वयमिति प्रक्षिप्तम् । ऋचि वयमिति पदाभावेन तदनुपपत्तिशङ्कायोगात् । ननु उत्तरेषामिति भवितव्यं कथमुत्तराणामित्यत आह । उच्छब्दादिति । [३९-१२] ' तस्यां तस्यामवस्थायां तत्तत्प्राप्तिविशेषतः । तत्तद्वाक्यस्वरूपेण प्रार्थनादिषु पश्यती ' [ऋग्भाष्य] तिसमाधानस्याभिहितत्वात्पुनः समाधानाभिधान व्यर्थमित्यत आह । तस्या तस्यामिति [३९-१३] कण्वासो वयमिति यावदिति [३९-१५] वयमित्युक्ते योऽर्थोऽवगम्यतेकण्वास इत्यनेनापि स एवार्थोऽवगम्यत इति भावः । न चैव सति उत्तमपुरुषप्रयोगापत्तिः । अस्मच्छब्देनार्थविशेषप्रतिपादनेच्छायामेवोत्तमपुरुषस्य विहितत्वेन प्रकृते तेन शब्देन कण्वविवक्षा भवति ॥ ५ ॥

घृतपृष्ठाः ॥ ननु विदोषिणेत्यत्र विगता दोषा यस्मात्स इति बहुव्रीहौ विदोषेणेति भाव्यम् । कथं इनिप्रत्ययप्रयोगः व्यर्थत्वादित्यत आह । विशब्दो नञर्थ इति । [३१-१७] ततश्च दोषस्याभावो विदोषः सोऽस्यास्तीत्यर्थे इनिप्रत्यय इति भावः । ॥ ६ ॥ २६ ॥

तान्यजत्रान् ॥ यजत्रानिति । [३९-१९] यजेः अभिनक्षियाजिवधिपतिभ्योऽत्रन् [उ ३९२] इत्यत्रन्प्रत्यये यजत्रानिति रूपम् ॥ ७ ॥

ये यजत्राः ॥ अनुदात्तं सर्वमपदादाविति । [३९-२३] ' अनुदात्तं सर्वमपदादौ ' [८।१।१८] इति अधिकारसूत्रेणैकवाक्यतापन्ने ' तेमयावेकवचनस्य ' [८।१।२] इति सूत्रेणानुदात्तत्वस्मरणादित्यर्थः । ननु द्वितीयस्य तेशब्दस्य तच्छब्दरूपत्वाङ्गीकारेऽपि अनुदात्तत्वं भविष्यति । ' तस्य परमाम्रेडितम् ' [८।१।२] इत्यनेनाम्रेडितसंज्ञां विधाय ' अनुदात्त च ' [८।१।३] इति अनुदात्तत्वविधानादिति चेन्न । ' तुञ्जेऽतुञ्जे, योगेऽयोगे ' इत्यादाविवावग्रहैकपदत्वयोः प्रसंगात् । यत उदात्त इति [३९-२४] ततशब्दः फिट्स्वरेणान्तोदात्तः । जसादेशस्य शी इत्येतस्य सुपूत्वादनुदात्तस्योदात्तशब्दाकारेण एकादेशे 'एकादेश उदात्तेनोदात्तः' [८।१।५] इति उदात्तत्वे त इति बहुवचनान्तमुदात्तमिति भावः । अन्यथा सोऽप्यनुदात्तइति । [३९-२५] आद्यस्य तेशब्दस्य नञा निर्दिष्टमनित्यमित्यङ्गीकृत्य पादादित्वेऽपि युष्मच्छब्दरूपत्वाङ्गीकारे आद्यस्तेशब्दोऽपि नञा निर्दिष्टस्यानित्यादेव पादादित्वेऽपि अनुदात्तत्वे प्रसज्येतेत्यर्थः । द्विरावृत्त इति । [३९-२६] अङ्गीकारवादेन द्विरावृत्तत्वाभिधानमिति द्रष्टव्यम् ॥ ८ ॥

आकीम् ॥ आवक्षतीति । [४०-३] वहेर्लेटि अडागमे 'सिब्बहुलं लेटि' [३।१।३४] इति सिपि च 'हो ढः' [८।२।३१] इति हकारस्य ढत्वे षत्वे च 'इतश्च लोपः' [३।४।९७] इति इकारस्य लोपाभावे वक्षतीति रूपम् ॥ ९ ॥

विश्वोभिः ॥ ननु 'मनु व्यच्कोऽकर्तरि' [३४] इति लिङ्गानुशासनसूत्रात् धामशब्दस्य नपुंसकत्वात् मित्रधामान इति कथमित्यत आह । धामशब्दमिति । [४० ४] 'शलाका नित्य स्त्रियाम्' (स्त्रियांनित्यम्,, सि कौ. पाठ) [लिंगानु सू ३४] इत्यत्र नित्यग्रहणेन विनापि स्त्रीत्वस्य नित्यत्वसिद्धेः पुनर्नित्यग्रहणेनान्यलिङ्गविधेरनित्यत्वज्ञापनात् 'मनुव्यच्क' इत्यत्यानित्यत्वात् पुल्लिङ्गत्वमिति भावः । बहुव्रीहिदयमिति । [४०-५] विष्णुधामत्वादित्येको बहुव्रीहिः । मित्रधामान इत्यपरो बहुव्रीहिरिति बहुव्रीहिद्वयमित्यर्थः । ॥ १० ॥

त्वं होता ॥ 'सेमंनो अध्वरमि'ति श्रुतौ स इमं नः इति पदच्छेदमभिप्रेत्याह । स त्वमिति । [४०-७] ॥ ११ ॥

युक्ष्व ॥ अग्निसप्रभा इति । [४०-९] अत्र पद्मेत्युच्छिन्नं ग्राह्यम् । ततश्चैव टीकावाक्यपाठः । पद्माग्निसप्रभा इति । काञ्चनाश्वतर्य अग्निसप्रभाः काञ्चन पद्मसप्रभा इति भावः । युक्ष्वेति । [४०-१०] युजेः स्थासि तदादेशस्य से इत्यस्य 'सवाभ्यां वामौ' [३।४।९१] । इति एकारस्य वत्वे विकरणलोपे कुत्वचर्त्वयोः सकारस्यषत्वे च युक्ष्वेति रूपम् । आवहेति । [४०-१०] इतःपरं टीकायां श्रूयमाणं पद्मसप्रभा इति अन्यत्रोक्तस्य विवरण-

मिति प्रक्षिप्तम्। अरुषीनित्येतद्विवरणत्वसंभवेनानुपयोगकथनायोगात्। भाष्ये पद्मसप्रभ इति पुष्टिप्रदामावाच्च ॥१२॥२७॥१४॥

इन्द्रसोमम् ॥ ऋतव्यमिति। [४०-११] ऋतुशब्दात् 'साऽस्य देवता'। [४।२।२४] इत्यर्थे 'वाय्वृतुपितुषसोयत्'। इति यत्प्रत्यये 'ओर्गुणः'। [६।४।१४६] इति गुणे 'वान्तो यि प्रत्यये'। [६।१।७९] इति अवादेशे ऋतव्यमिति ज्ञेयम्। सामान्यतोऽर्थमाहेति। [४०-१२] सर्वशब्दसाधारणमेकमाहेत्यर्थः अत्रत्याः सर्वे ऋतुशब्दाः मार्गपात्रदेवतारूपार्थत्रयप्रतिपादकाः। अत्र मार्गरूप एकार्थ इदानीमुच्यत इति भावः। क्तुप्रत्यय इति। [४०-१-१३] अर्तेश्चतुः [उ ७४]। इत्यनेन तुप्रत्ययः सः कित्वेति भावः। विशेष्टुं तुशब्द इति [४०-१३] इतः परं टीकायां श्रूयमाणं तथा चादित्यमार्गस्थाः कालदेवताऋतुशब्दा इत्यर्थो [४०-१३] इति वाक्यं प्रक्षिप्तम्। न टीकावाक्यम्। अवश्यं चैत देवं विज्ञेयम्। भाष्ये 'ऋतुमार्गस्त्विति। [मा. १३-२१] मार्गपरतयैव ऋतुशब्दस्य व्याख्यातत्वेन आदित्यमार्गस्था इत्युक्त्ययोगात्। "ज्ञापयन्ति स्वलिङ्गानि" इति ऋतुशब्दस्य देवतापरत्वेन व्याख्यास्यमानत्वाच्च। गमेस्ताच्छील्ये न इति नप्रत्ययो डिच्चेति। [४०-१६] अत्र न इतीति पदं प्रक्षिप्तम्। ततश्चैवं टीकावाक्यपाठः। गमेस्ताच्छील्ये नप्रत्ययो डिच्चेति। अवश्यं चैतदेवं विज्ञेयम् ताच्छील्येन इति औणादिकत्रप्रत्ययाभावेन गमेस्ताच्छील्येऽर्थे बाहुलिकनप्रत्ययस्यैवाश्रयणीयत्वात्। उक्तार्थमिति। [४०-१७] गमेर्नयतेश्च ड इत्युक्तावयवार्थमित्यर्थः। ऋतुशब्देन यदि देवताः

स्वीक्रियन्त इति । [४०।१७।१८] अत्र देवताः स्वीक्रियन्त इति प्रक्षिप्तम् मार्गः स्वीक्रियतइयुच्छब्दम् । ततश्चैव टीकावाक्यपाठः । ऋतुशब्देन यदि मार्गःस्वीक्रियते तर्हीति । अवश्य चैतदेव निश्चेयम् । ऋतुशब्दस्य मार्गवाचकत्वेन पूर्वं व्याख्यातत्वात् । ऋतुशब्दस्य मार्गवाचकत्वे तदोकस इत्युनुपपन्नं स्यात् । सोमानां मार्गस्थानत्वाभावादित्याक्षेपसभवाच । सत्यमृतुशब्देनेति । [४०-१९] ऋतुशब्देन मार्गग्रहणे तदोकस इत्यनुपपन्नमिति सत्यम् । तथापि तस्य देवतावाचित्वेन व्याख्यास्यमानत्वात् ऋतुशब्देन देवतोच्यते । नचैवमपि किं प्रकृत इति वाच्यम् । देवतापात्रमपि देवतावाचकेन शब्देन गृह्यते । एवच तदोकस इत्यत्र ऋतुपात्रपरामर्शे न काप्यनुपपत्तिरिति भावः । नेष्टापि कस्मादिति । [४०-२१] नेष्टृनामकऋत्विगपि कुतो नेष्टेत्युच्यत इत्यत आहेत्यर्थः । अनर्थान्तरत्वप्रसगादिति । [४०-२२] पत्नीशालां प्रति स्त्रीनेतृत्वस्य नेष्टृशब्दार्थत्वेन प्राप्त इत्यस्यापि स्त्रीमात्रस्वरूपार्थत्वे स्त्रीनेतृत्वे पर्यवसानादनर्थान्तरत्वप्रसग इत्यर्थः । ऋतुशब्दो मार्गवाचीति । [४०-२२] इतः परं टीकायां श्रूयमाण 'तत्रत्या देवता लक्षणया तच्छब्दा' [४०-२३] इत्यतावत् प्रक्षिप्तम् ततश्चैवं टीकावाक्यपाठः ऋतुशब्दो मार्गवाचीत्युक्तम । इदानी ऋतुशब्द देवतास्वेव निर्वक्तीति [४०-२३] अवश्यं चैतदेवं विज्ञेयम् । पूर्वं भाष्यकृता ऋतुमार्गस्त्विस्येवोक्तत्वेनान्यथानुवादप्रसंगात् । करणएवेति । [४०-२४] करणेक्तुप्रत्ययः । ऋच्छन्ति ज्ञानन्त्येभिरिति विग्रह इति भाष्य । कुसुमोद्भवादीनीति । इतः पर टीकाया श्रूयमाणं "अथवा

पूर्वं ऋतुशब्दो मार्गएव निरुक्तः । इदानीं पुनः ऋतु-देवताम्बिभेदः । इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । ऋतुशब्द-व्याख्यानयोरेभदप्रसक्त्यभावेन भेदाभिधानायोगात् । तदीयस्थ-पात्रस्येति । [४०-२६] पोतृशब्दात्तस्येदमित्यर्थे 'तद्धिताः' [४।१।७६] इति बहुवचनज्ञापितोऽकारप्रत्यय इति भावः ॥ १ ॥

मरुतः ॥ पुनीतनेति । [४१-४] पूञ् पवन इत्येत-स्मात् लोट्मध्यमपुरुषबहुवचने तुदादेश्शतशब्दस्य 'तप्तनप्तनथनाश्च' [७।१।४५] इति तनादेशे श्नाप्रत्यये तस्य 'ई हल्यघोः' [६।४।११३] इति ईत्वे 'प्वादीनां ह्रस्व' इति धातोः ह्रस्वत्वे पुनीतनेति रूपमिति ज्ञेयम् । सुदानव इति । [४१-५] सुपूर्वात् दाञः " दामाभ्यांनुः " [उ ३१९] इति नुप्रत्यये जसि गुणेऽवादेशे सुदानव इति रूपम् ॥ २ ॥

अभियज्ञम् ॥ अभिगृणीहीति । [४१-६] गृ शब्द इत्यस्मात् लोटः सिपि सेर्हि इत्यादेशे श्नाप्रत्यये तस्य ईत्वे प्वादीनां ह्रस्वत्वे गृणीहीति रूपम् ॥ ३ ॥

अग्ने देवान् ॥ स्थानशब्दस्येति । [४१-९] स्थाने निरूढस्य योनिशब्दस्य काले निरूढत्वाभावादित्यर्थः ॥४॥

ब्राह्मणादिन्द्र ॥ तस्येदमिति । [४१-१३] ब्रह्मन् शब्दात् 'तस्येदम्' । [४।३।१२०] इत्यर्थे अणि कृते । ['अन्' ६।४।१६७] प्रकृतिभावे ब्राह्मणशब्दः पात्रविशेषवाचक इति भावः । ॥ ५ ॥

युवं दक्षम् ॥ युवमिति । [४१-१४] युष्मद् औ इति स्थिते 'ङेप्रथमयोरम्' । [७।१।२८] इति औकारस्यामादेशे

'युवावौ द्विवचने' । [७।२।९२] इति मपर्यन्तस्य युवादेशे 'प्रथमायाश्च द्विवचने भाषायाम्' [७।२।८८] इत्यत्र भाषायामित्युक्तेरात्वाभावेन त्यदाद्यत्वे युवामिति रूपम् । दुर्दभमिति । [४१-१५] संहितायां दुरित्यस्य रेफलोपः दीर्घश्च दस्य ळत्वच्च पृषोदरादित्वात् । ततश्च दूळभामीति रूपम् ॥ ६ ॥ २८ ॥

द्रविणोदाः ॥ यद्यत्र होतेति । [४१-१९] अस्यां ऋचि द्रविणोदा इत्यस्य होतृवाचकत्वं स्यात् तर्हि उत्तरस्यां ऋचि द्रविणस्शब्देन अग्निग्रहणमनुपपन्नं स्यात् प्रायपाठविरोधादिति भावः एतेनात्र द्रविणोदस् शब्दस्य होतृवाचकत्वेऽपि उत्तरस्यामृचि (तस्याग्निवाचकत्वात्) ददात्विति प्रार्थन युक्तमेवेत्ययुक्तत्वाभिधानमयुक्तमिति परास्तम् । प्रायपाठविरोधे तात्पर्यात् । न कोऽपि विरोध इति । [४१-२०] प्रायपाठविरोधो नेत्यर्थः । अत्राप्यग्निरेवेति । [४१-२०] उत्तरत्रेवात्राप्यग्निरेव द्रविणोदाः न होतृदेवतात्वेनाग्निरिति किं न स्यादित्यर्थः । देवतास्तुताविति [४१-२०] स्तावकान्तर्गताग्निरूपस्यैव यज्ञे स्तुतिकर्तृत्वसंभवादन्यस्यासंभवादित्यर्थः । द्रविणोदा इत्यत्र विभक्तिविपरिणामेन व्याख्याने स्तुतिकर्तृत्वमसिद्धमित्यत आह । विभक्तिव्यत्यासेनेति । [४१-२१] ऋचं योजयति द्रविणोदा इति । [४१-२१] अत्र होतेत्यतः परं अग्निरित्युच्छिष्टम् । होतृका इत्यतः परमग्नय इत्युच्छिष्टम् । तत्रैवं टीकावाक्यपाठः । द्रविणोदा होता अग्निश्च द्रविणसः होतृका अग्नयश्चाध्वर इति । अवश्य चैतद् देवं विज्ञेयम् । भाष्यकृता 'अग्निर्वैवाग्नयस्तेषामिति' 'द्रविणोदा द्रविणस' इतिशब्दार्थतया अग्नीनां कथितत्वात् ददातेरसुन्

प्रत्ययो ङिच्च ततश्च दा इति रूपम् । द्रविणश्शब्दपर्यायस्य छान्दस द्रविणस्शब्दस्य श्रितादिषूपसंख्यानात् द्वितीयासमासः । ततश्च द्रविणोदा इति रूपम् । द्रविणस्शब्दात् होतृषाचकात् जसि द्रविणस इति रूपम् देवमिति । [४१-२२] अत्राग्निभिः सहितं ग्रघानेति प्रक्षिप्तम् । ततश्चैवं टीकावाक्यपाठः । ' देवं विष्णुमग्निं चेळत ' इति । अवश्यं चैत देवं विज्ञेयम् । अस्यां श्रुतौ अग्निभिरित्येतदर्थकदेवमिति शब्दवत् अग्निभिः सहितमित्येतदर्थक शब्दाभावात् ॥ ७ ॥

द्रविणोदा ददातु ॥ शृण्विर इति । [४१।२३] शुश्रवण इत्यतः ' छन्दसिलुङ्लुङ्लिटः ' [३।४।६] इति कर्मणि वर्तमानार्थे लिटि " लिटस्तझयोरेशिरेच् " इति झस्य इर् इत्यादेशे छान्दसत्वादद्वित्वाद्यभावे ' छन्दस्युभयथा ' [३।४।११७] इति सार्वधातुकत्वेन व्यत्ययेन यगभावे ' श्रुवः शृ च ' । [३।१।७४] इति शृ इन्यादेशे ' हुश्नुवोः सार्वधातुके ' [६।४।८७] इति यणादेशे शृण्विर इति रूपम् ॥ ८ ॥

द्रविणोदाः पिपीषति ॥ प्रतिष्ठतेति । [४१-२६] स्थाधातोः ' समवप्रविभ्यः स्थः ' [१।३।२२] इत्यात्मनेपदे लङो झस्य छान्दसे अत् इत्यादेशे शपि ' प्राग्ग्राध्मा ' । ७।३।७८] इति धातोस्तिष्ठादेशे छान्दसत्वात् अडभावे प्रतिष्ठतेति छान्दसं रूपम् । जुह्वतेति । [४१-२६] जुहोतेर्लोट्मध्यमपुरुष बहुवचनस्य ' तप्तनप्तनथनाश्च ' । [७।१।४५] इति तप इत्यादेशे गुणे भ्रुविकरणत्वात् द्वित्वे रूपम् ॥ ९ ॥

टीप—छन्दारीये, छान्दसत्वे हेतु स्फुट ।

यत्त्वा तुरीयम् ॥ तुरीयमित्येतद् न यज्ञविशेषणं किंतु यज्ञानुष्ठानविशेषणमिति भावेनाह चतुर्थकारमिति । [४२-२] यज्ञानुष्ठानस्तुरीयत्वं साधयितुमाह । **चतुर्थ्या हीति ।** [४२-३] स्तावकत्वात्तत्तृतीयत्वात् स्तुतिरूपयज्ञानुष्ठानस्यापि तुरीयत्वमिति भावः । **ददिरिति ।** [४२-३] दाधातोः 'आदृगमहनजनः किकिनौ लिट् च' । [३।२।१७१] इति किप्रत्यये तस्य लित्त्वसद्भावेन द्वित्वादौ आकारलोपे **ददिरिति** रूपमिति ज्ञेयम् ॥ १० ॥

अश्विना ॥ दीव्यतेरिति । [४२-४] संज्ञापूर्वकविधेरनित्यत्वात् 'गुणो यङ्लुकोः' [७।४।८२] इति न गुणः ॥ ११ ॥

गार्हपत्येन ॥ कवयो विप्रा इति । [४२-९] द्वादशप्रहाणां प्रत्युदेवताकत्वात् अनेनमन्त्रेण विष्णोः प्रत्याधिपत्यं सिद्धमिति भावः ॥ १२ ॥ २९ ॥ १५ ॥

आत्वाहन्तु ॥ ऊरशब्द इति । [४२-१४] इतःपरं टीकापाठ्यमानं 'छन्दसि धातुना विनापि प्रयुज्यत' इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवक्यं चैतदेवं विज्ञेयम् । [२।४।९४] ते प्राग्धातोरित्यादिना गत्युपसर्गसंबन्धनामेव धातुसाहित्यनियमविधानेऽपि ऊरीशब्दसमानार्थकस्योरशब्दस्य ऊर्यादिगणे पाठाभावेन गतिसंज्ञारहितस्य धातुसाहित्यनियमाभावेन छान्दसत्वमाश्रित्य धातुना विना प्रयोगसमर्थनवैय्यर्थ्यात् । **ऊराणीति** प्रतीकम् । **विषयानूरीकुर्वन्तीति** [४२-१५] व्याख्यानमिति विवेकः । **चक्षांसीति** [४२-१५] 'चक्षेर्महिङ शिच' [३-६८३] इति

असुच्प्रत्यये क्विप्त्वात् स्यालादेशाभावे असि चक्षांसीति रूपम् ॥१॥

इमा धानाः ॥ स्नेहसाम्यादिति । [४२-१७] भोक्तुः वृतस्नेहः भजनीयस्य भक्तौ स्नेहः इति स्नेहसाम्यात् इत्यर्थः । वृतशब्दः योगवृत्त्या भक्तौ वर्तत इति भावः । उपवक्षत इति । [४२-१८] उपपूर्वात् वहेर्लेटि मध्यमपुरुषबहुवचनस्य व्यत्ययेन प्रथमपुरुषबहुवचनादेशतासि 'लेटोऽडाटौ' [३।४।९४] इत्यडागमे 'सिब्बहुलं लेटि'। [३।१।३४] इति सिपि 'हो ढः' [८।२।३१] इति ढत्वे 'पढोः कः सि' [८।२।४१] इति कत्वे षत्वे च उपवक्षतः इति छान्दसं रूपम् । उपवहतमिति । [४२-१८] लोण्मध्यमपुरुषबहुवचनरूपम् ॥ २ ॥

इन्द्रं प्रातर्हवामहे ॥ क्रियाशब्दोऽयमिति । [४२-२४] इन्द्र शब्दः परमैश्वर्यरूपधात्वर्थमाश्रित्य प्रवृत्त इति क्रियाशब्दः । क्रियाशब्द इति प्रकृताभिप्रायेणोक्तम् । धातोरिन्द्रशब्दावयवत्वात् अवयवार्थमाश्रित्य प्रवृत्तत्वात् यौगिकशब्द इत्यत्र तात्पर्यम् ॥३॥

उपनः ॥ हवामह इति । [४३-१] ह्वेञः लटि तस्य महिङि शपि 'बहुलं छन्दसि' । [६।१।३४] इति संप्रसारणे 'संप्रसारणाच्च' । [६।१-१०८] इति एकारस्य पूर्वरूपत्वे गुणेऽवादेशे 'अतो दीर्घो यञि' । [७।३।१०१] इति दीर्घे टेरेत्वे हवामह इति रूपम् ॥ ४ ॥

सेमंनः स्तोमम् ॥ [४३-१] सेमंन इत्यत्र 'सोऽचि लोपे चेत्पादपूरणम्' । [६।१।१३४] इति सोर्लोपे सेममिति संहितासिद्धिः ॥ ५ ॥ ३० ॥

इमे सोमासः ॥ ईश्वरबले व्यक्तिर्नाम क इत्यत्र आह । व्यक्तिश्रेति । [४३-७] व्यक्तिश्च बलसाध्यमभीष्टं संपादन-

मित्युक्तार्थे अनुग्रहो नाम कःइत्यत आह । व्यक्तिश्चेति । [४३-७] 'व्यक्तिश्च बलसाध्यमभीष्ट संपादनमि'त्युक्तार्थे अनुग्रहो व्यक्ति (भाष्ये) रिति वाक्यं कथं प्रमाणमित्यत आह । अनुग्रह इतीति । [४३-८] 'अनुग्रहो व्यक्तिरेवेत्येव भाष्यपाठः । अनुग्रहव्यक्तिरिति पाठस्तु प्रामादिकः । अत एव टीकायां अनुग्रह इतीति प्रतीकधारणम् । अनुग्रहव्यक्तिरिति पाठे अनुग्रहेतीति प्रतीकधारणं स्यात् । अनुग्रहपदेनैव परामीष्टसंपादनस्य प्राप्तत्वात् व्यक्तिपदवैय्यर्थ्यप्रसंगश्च । अनुग्रहो व्यक्तिरिति पाठे तद्गुणानां व्यक्तिरनुग्रह इत्यन्वयः संगच्छते ॥ ६ ॥

अथ ते स्तोमः ॥ इन्द्रेति । [४३-९] इतः परं अग्रियः अग्र्य इति वाक्यमुच्छिनत्ति । अवक्यं चैतदेवं विज्ञेयम् । सर्वाणि पदानि व्याख्याय अग्रिय इति पदस्यैवाव्याख्याने कारणा भावात् । हृदि स्पृगिति । [४३-९] स्पृशेः 'स्पृशोऽनुदके क्विन्' । [३।२।५८] इति क्विन् प्रत्यये 'हृदयुभ्यां डेरिति वाक्यम्' इति पार्षिकेन डेरलुकि हृदिस्पृगिति रूपम् ॥ ७ ॥

विश्वामित्र ॥ मदायेति [४३-१०] मदी हर्ष इत्यतः मदोऽनुपसर्गे [३।३।६७] इत्यप्प्रत्यये मदशब्दो निष्पन्नः । ॥ ८ ॥

सेमंनः कामम् ॥ पुणप्रीणन इति [४३-१२] पुण प्रीणन इत्यतः घञ्प्रत्यये हेर्लुकि पुणेति रूपमिति भावः । ध्यायतेः किबिति [४३-१३] ध्यायतेः 'अन्येभ्योऽपि दृश्यते' इति किपि क्वौ[1]त्रह्णात् [३।२।१७८] संप्रसारणे ' इकः ' [६।४।२] इत्यनेनाकारयकारस्य उत्तरस्य संप्रसारणस्य दीर्घे स्वाधीति रूपम् । इतः परं टीकायां भूयमाणं ' यणादेशः छान्दसः । न भूसुधियोरिति । नञानिर्दिष्टमनित्यमिति वा रूपग्रहणाद्वा '

१ टीप—हृदयुभ्यां च [वा सू ८।३।९५] क्वि की पाठ

[४३-१३-१४] इति वाक्यत्रयं प्रक्षिप्तम् । नटीकावाक्यम् । अवधेयं चैतदेवं विज्ञेयम् । स्वाधीशब्दात् जसि ' एरनेकाचोऽसंयोगपूर्वस्य ' [६।४।८२] इति विहितयणादेशस्य छान्दसत्वाश्रयणायोगात् । ' न भूसुधियोः ' [६।४।८५] इति सूत्रे सुधीति रूपग्रहणेन यणादेशनिषेधस्याप्रवृत्तेः तदनित्यत्वाभिधानवैय्यर्थ्यात् । रूपग्रहणाद्वेत्यत्र यणादेशनिषेधाभाव इति साध्यस्यानुक्तत्वेनानन्वितत्वाच्च । ॥ ९ ॥ ३१ ॥ १६ ॥

इन्द्रावरुणयोः ॥ मृळात इति । [४३-१७] मृड सुखे इत्यतो ' लिङर्थे लेट् ' [३।४।७] इति लेडि तस्य तसि अडागमे शप्रत्यये गुणाभावे मृळात इति रूपम् ॥ १ ॥

गन्तारा ॥ धर्तारावितिः । [४३-१८] । धृ धारण इत्यतः तृचि गुणे प्रथमाद्विवचने ' ऋतोऽङि ' [७।३।११०] इति गुणे ' अपृक्तसुन् ' [६।४।११] इति दीर्घे ' सुपां सुलुक् ' [७।१।३९] इति औकारस्याकारादेशे **धर्तारेति** छन्दसि रूपम् ॥ २ ॥

अनुकामम् ॥ नेदिष्ठमिति । [४३-१९] अन्तिकशब्दादतिशयार्थे इष्ठनि आन्तिकशब्दस्य ' आन्तिकबाढयोर्नेदसाधौ ' [५।३।६३] इति नेदादेशे **नेदिष्ठ** मितिरूपम् ॥ ३ ॥

युवाकु ॥ लुप्तषष्ठीति । [४३-२२] युष्मच्छब्दात् युवयोरिमा इत्यर्थे आकुप्रत्यये युवादेशे षष्ठीबहुवचनस्य लुकि एतद्रूपमिति भावः । **विकरणस्येति ।** [४३-२४] शपो लुगित्यर्थः । ॥४॥

इन्द्रः ॥ उक्थ्य इति । [४३-२५] उक्थशब्दात् " भवे छन्दसि " [४।४।११०] इति सूत्रेण उक्थेषु स्तुत्यत्वेन भवतीत्यर्थे यत्प्रत्यये **उक्थ्य** इति रूपम् ॥ ५ ॥ ३२ ॥

तयोरिति ॥ निधीमहीति । [४४-३-४] ध्यै चिन्तायामित्यतो लिङि तस्य व्यत्ययेनात्मनेपदे महिङि विकरणलोपे संप्रसारणे चैतद्रूपम् ॥ ६ ॥

इन्द्रावरुण ॥ सुजिग्युष इति । [४४-८] जि जय इत्यतः लिटि तस्य कस्वादेशे द्वित्वे 'सन्लिटोर्जेः' [७।३।५७] इति अभ्यासात्परस्य जिशब्दस्य कुत्वे शसि' 'वसोः संप्रसारणम्' [६।४।१३१] इति संप्रसारणे यणादेशे च एतद्रूपम् । कृतामिति [४४-८] कृञः लोट्मध्यमपुरुषद्विवचने विकरणलोपे च कृतामिति रूपम् ॥ ७ ॥

इन्द्रावरुण नु ॥ कारकालाभाच्चेति । [४४-१०] कर्तुस्सिङ्वाच्यत्वात् तदभावे कर्तृकारकालाभादित्यर्थः । साधयतेरिति । [४४-१२] साधयतेः सनि 'सन्यङोः' [६।१।९] इति द्वित्वे 'सन्यतः' । [७।४।७९] इति अभ्यासाकारस्येत्वे पृषोदरादित्वेन धात्वन्तधकारलोपे सनः इडभावे शतृप्रत्यये 'उगितश्च' । [६।३।४५] इति ङीपि शतुर्नुमागमे सप्तमीबहुवचने सिसासन्तीष्विति रूपम् ॥ ८ ॥

प्रवामश्नोतु ॥ हुव इति । [४४-१४] ह्वेञो लटि तस्येडादेशे तस्येत्वे विकरणलोपे संप्रसारणे उवङादेशे हुव इति छान्दसं रूपम् । ऋधाथ इति । [४४-१६] ऋधेः श्नुविकरणित्वेऽपि व्यत्ययेन शपि 'बहुलं छन्दसि' । [४।२।७३] इति श्नपो लुकि लट आथामादेशे टेरेत्वे च ऋधाथे इति छान्दस रूपम् ॥९॥३३॥१७॥४॥

सोमानम्॥ ब्रह्मणस्पत्यादिशब्दार्थ इति । [४४।१८] ब्रह्मणस्पतिसोमदक्षिणासदसस्पतिनराशंसशब्दार्थाः भाष्ये स्पष्टा इत्यर्थः ।

कृणुहीति । [४४-१९] कृवि हिंसाकरणयोरित्यतः 'इदितोनुम्धातोः' [७।१।५८] इति नुमि 'धिन्विकृण्व्योर च' [३।१।८०] इति उप्रत्यये तत्संनियोगेन वकारस्याकारे 'अतो लोपः' । [६।४।४८] इति अकारलोपे 'उतश्च ' [६।४।१०६] इत्यत्र 'छन्दो वा वचनमित्युक्तत्वेन हेर्लुगभावे कृणुहीति छान्दसं रूपम् ॥ १ ॥

यो रेवान् ॥ रेवानिति। [४४-२२] रयिशब्दात् मतुपि संप्रसारणे पूर्वरूपत्वे 'छन्दसीरः' [८।२।१५] इति मतोर्वत्वे आदुगुणे रेवानिति रूपम् तुरत्वरणे इत्यस्येति । [४४-२३]'इगुपधाज्ञाप्रीकिरः कः' । [३।१।३१] इति कप्रत्यये रूपमेतत् । सिषक्तु इति । [४४-२४] षच समवाय इत्यस्मात् "बहुलं छन्दसि" । [४।२।७६] इति शपः श्लौ द्वित्वे 'बहुलं छन्दसि' । [७।१।१०३] इति अभ्यासस्य इत्वे एतद्रूपम् ॥२॥

मा नः ॥ धुर्वी हिंसार्थ इति। [४४-२६] अस्मात् "क्विप् च्वौ च संज्ञायाम्" इति क्विप्प्रत्यये "तितुत्र " [७।२।९] इति निषेधादिडभावे 'उपधायाश्च' । [७।१।१०१] इति उपधाया दीर्घत्वे 'राल्लोपः' [६।४।२१] इति वकारलोपे धूर्ति-रिति रूपम् । प्रणगिति । [४४-२६] प्रा पूरणे इत्यतः ङनक् प्रत्यये प्रणागिति कृदन्तपदम् ॥ ३ ॥

स घा ॥ न रिष्यतीति। [४५।५] हिंसार्थात् रिषेः कर्मणि यकि व्यत्ययेन परस्मैपदे रिष्यति इति रूपम् ॥४॥

त्वं तम् ॥ दक्षिणेसरलोदारावितिः । [४५८] अस्याऽर्थो न ज्ञातः ॥ ५ ॥ ३४ ॥

सदसस्पतिम् ॥ आयासिषामिति। [४५-११] यातेर्लुङि

तस्य सिपि तस्यामादेशे ' यमरमनमातां सक्च ' [७।२।७३] इति धातोः सगागमे ईसिच इटि **अयासिषामिति** रूपम् ॥ ६ ॥

यस्मात् ॥ इन्वतीति । [४५-१४] इवि प्राप्तावित्यतः लटि शपि नुमागमे **इन्वतीति** रूपम् ॥ ७ ॥ ८ ॥

नराशंसम् ॥ ब्राह्मणादिभिः आशंस्यत इति । [४५-२०] अत्र शस्यत इत्येव पाठः । शंस्यत इति पाठस्तु प्रामादिकः । संश स्तुतावित्यस्मात्कर्मणि यकि ' अनिदितां हल उपधायाः क्ङिति ' । [६।४।२४] इति नकारलोपस्यावर्जनीयत्वात् । **नराशंस इति ।** [५४-२०] ' अन्येषामपि दृश्यते ' [६।३।१३७] इति दीर्घः । [४५-२०] **समाने लोप इति ।** [महा. व्या.] समाने शब्दे परतः लोपोभवतीति सूत्रार्थः ॥ ९ ॥ ॥ ३५ ॥ १८ ॥

प्रतित्यम् ॥ भाष्ये " यज्ञं प्रति प्रतीति [१५-११] यज्ञामिति शब्दः प्रथमप्रतिशब्दानन्तरमनुवर्तते । तस्य द्वितीयप्रतिशब्देन संबन्धः । ततश्च प्रसिद्धं शास्त्रोक्तलक्षणं यज्ञं प्रति यज्ञं प्रति आहूयस इत्यर्थः । टीकायां अध्वरं यज्ञं प्रति प्रतीति । अत्र यज्ञं प्रतीत्यनन्तरं यज्ञमिति यज्ञशब्दः उच्छिन्नः । ततश्चैवं टीकावाक्यपाठः । **यज्ञं प्रति यज्ञं प्रतीति ।** अवश्यं चैतदेवं विज्ञेयम् । ' नित्यवीप्सयोः ' [८।१।४] इति सूत्रेण वीप्सायां गम्यमानायां द्विर्वचनस्य विहितत्वेन यज्ञशब्दे द्विर्वचनस्यावश्यं प्रयोज्यत्वात् । अन्यथा लक्षणप्राप्तद्विर्वचनाप्रयोगो दोषः स्यात् । ननु भाष्ये यज्ञशब्दमात्रस्य द्विर्वचनप्रकृतत्वात् प्रतिशब्दस्य द्विर्वचनं कृत्वाऽनुवृत्तेन यज्ञशब्देन संबन्धः किमर्थमभिप्रेतः इत्यत आह । **प्रातिरयामिति ।**

टीप- १ अत्र छलारीये हेतु. ज्ञायते ।

[४६-२] अयं प्रतिशब्दः वीप्सायां कर्मप्रवचनीयसंज्ञः । ततश्च यज्ञशब्दस्य द्विर्वचनम् । द्वाभ्यामपि यज्ञशब्दाभ्यां प्रतिशब्दसंबन्ध-विधुरे यज्ञशब्दे द्वितीया न स्यादिति द्योतयितुं प्रतिशब्दं द्विरुच्चार्य यज्ञशब्दमनुवर्त्य संबन्धः कृतइति भावः । अनेन वृक्षं वृक्षं प्रति सिंचतीत्याद्युदाहरणेषुप्रतिशब्दस्य प्रत्येकं संबन्धो विवक्षित इति द्योतितमितिबोध्यम् ॥ एतेन—यज्ञ शब्दएव द्विर्वचनस्य भाष्यत्वात् भाष्यकारीयं प्रतिशब्दे द्विर्वचनमनुपपन्नम् । प्रतिरयं वीप्सायां कर्मप्रवच-नीय इति ज्ञापनस्य यज्ञशब्दद्विर्वचनेनैव कर्तव्यत्वात्-इति परास्तम् । द्विरुच्यमानशब्दद्वयेऽपि कर्मप्रवचनीय संबधो विवक्षित इति ज्ञापनार्थत्वात् ॥ १ ॥

नहि ॥ मह इति । [४६-४] मह पूजायामित्यस्मात् अदन्तात् चुरादिण्यन्तात् 'एरच्' [३।३।५६] इति कर्मण्यच् प्रत्यये णिलोपे **मह** इति रूपम् ॥ २ ॥

ये महः ॥ महः महत इति । [४६-७] मह शब्दात् पञ्चम्याः 'सुपां सुलुक्' । [७।१।३९] इति स्वादेश इति भावेन मह इत्यनूद्य महत इति व्याख्यातमिति बोध्यम् ॥ ३ ॥

य उग्रा ॥ आनृचुरिति । [४६-९] अर्चपूजायामि-त्यस्माल्लिटि शेरुसि 'अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रित-माशीराशीर्ताः' [६।१।३६] इति निपातनात् अर् इत्यस्य अऋत्यादेशे द्वित्वे अभ्यासस्य उरदत्वे ('उरत्' इत्यनेन अकारे) 'अत आदेः' [७।४।७०] इति अकारस्य दीर्घे 'तस्मान्नुड् द्विहलः' [७।४।७१] इति नुडागमे च **आनृचुरिति** रूपमिति भावः ॥४॥

ये शुभ्रा ॥ रिशादस इति । [४६-१४] 'बहुलं ताणे' [महाभाष्ये] इति माशब्दस्य ह्रस्वत्वे **मरुत्** इति रूपम् ॥ ५ ॥ ३६ ॥

ये नाकस्य ॥ नाक इति । [४६-२०] 'न भ्राड्...' [६।३।७५] इत्यादिना प्रकृतिभावविधानात् नलोपोभावः । **दीव्यतेरिति ।** [४६-२१] दिव् इत्यतः डि प्रत्यये रूपमेतत् ॥ ६ ॥

य ईङ्खयन्ति ॥ मत्वर्थे त इति । [४६-२४] 'पर्वमरुद्भ्यांतन्' इत्यनेन मत्वर्थे तन् प्रत्यय इति भावः । ॥७॥

आ ये ॥ तन्वन्तीति । [४७-२] तनु विस्तार इत्यतः लटि उप्रत्यये झस्यान्तादेशे यणादेशे **तन्वन्तीति** रूपम् ॥८॥

आभि त्वा ॥ नि(र्मि)र्ममामीति । [४७-३] निर पूर्वकात् मानिनिर्माण इत्यस्मात् श्लौ द्वित्वे अभ्यासह्रस्वत्वे **निर्ममामीति** रूपम् ॥ ९ ॥ ३७ ॥ १९ ॥

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथ-यतिविरचिते ऋग्भाष्यटीकाप्रकाशे रूपावतारे प्रथमोऽध्यायः ।

टीप- १ 'तपूपर्वमरुद्भ्याम्' [वार्ति., सू. ५।२।१२१] पर्वतः मरुतः सि. कौमुद्यां छलारीयेच । रूपावतार इति । रूपाणां वेदगतशब्दस्वरूपाणां अवतारः प्रादुर्भावः सूत्रादिनिर्देशपूर्व तत्प्रक्रियाकथनादिना तन्निष्पत्तिः यस्मिन्सतथा अथवा रूपस्य शुद्धस्य टीका-ग्रन्थस्वरूपस्य अवतारः मूलकोशसंशोधनादिना निष्पत्तिर्यस्मिन्सः ग्रन्थः तस्मिन् ।

श्रीसत्यप्रमोदतीर्थानां द्वादशाब्दमहोत्सवे ।
अर्शूंशुधद् हयग्रीवः प्रीयतां गुरुराड् हरिः ।

॥ द्वितीयोऽध्यायः ॥

अयं देवाय ॥ ननु संप्रदानत्वाभावात् देवायेति जन्मन इति च चतुर्थ्यनुपपन्नेत्यत आह । **तादर्थ्य इति ।** [४९-६] चतुर्थीविधाने तादर्थ्य उपसंख्यानम् [वा] इति वचनात् चतुर्थी द्वयं तादर्थ्ये । ततश्च देवार्थमय स्तोमोऽकारीति श्रुत्यर्थ इति भावः । 'सुपां सुपो भवन्ती'ति वचनानुसारेणाह । **षष्ठ्यर्थे वेति ।** [४९-६] स्तोमस्यैकत्वात् कथं बहूनां कर्तृत्वोक्तिरित्यत आह । **ते चेति ।** [४९-६] एकस्यापि ते ऋषयोऽहम इत्युक्तत्वात् बहुवचनमुपपन्नमिति भावः । ननु भूते लुङो विधानात् स्तोमस्य चानादित्यवात् कथं लुङ्प्रयोग इत्यत आह । **अनादित्वादिति ।** [४९-६-७] लुङ् प्राचीनत्वं विनष्टत्वं च वक्ति । तत्र विनष्टत्वरूपार्थं परित्यज्य प्राचीनत्वमात्रविवक्षया अकारीति प्रयोग इति भावः ॥ १ ॥

य इन्द्राय ॥ ननु शमशब्दस्य यञन्तत्वेन पुल्लिङ्गत्वात्कथं स्त्रीत्वं तस्य छान्दसत्वान्नीकारेऽपि अदन्तत्वेन "अजाद्यतष्टाप्" [४।१।४] इति टापा भाव्यं कथं ङीत्यत आह । **स्त्रीलिङ्गमिति ।** [४९-११] अत्रस्त्रीत्वं छान्दसमित्युक्तौ ङीप्प्रत्ययो लक्षणप्राप्त इति बुध्या लक्षणगवेषणया शिष्याणां मनः खेदः स्यात् स मा भूदिति ङीप् (स्त्रीत्वं) छान्दसमित्युक्तम् । तावन्मात्रोक्तौ स्त्रीत्वं स्वाभाविकमिति भ्रमः स्यात् स मा भूदिति स्त्रीत्वं छान्दसमित्युक्तम् । **आशतेति ॥** [४९-११] अशेर्लङि छान्दसत्वात् विकरणलुकि झस्यादादेशे अडागमे **आशतेति** रूपम् । विष्णौ तुकथमिति ।

ङीप —१ तादर्थ्ये चतुर्थी वाच्या [वा, सू १।४।३४] सिद्धौ मुद्रि

[४९-१३] देवतान्तरे उपपद्यमानं हरिनिर्माणादिकं विष्णौ कथमित्यर्थः ॥ २ ॥

तक्षन् ॥ भाष्ये "परितो ज्मां यतश्चरेदि" ति परिज्माशब्दात् चरेदित्यर्थे डनिप्रत्ययः । ततश्च **परिज्मान्निति** नकारान्तशब्दसिद्धिरिति भावः । भाष्यगतज्मामितिशब्दार्थमाह **ज्मां भूमिमिति ।** [५०-६] इतः टीकायां श्रूयमाणं 'वृत्तौ क्रियाया अन्तर्भावाच्चरेदित्युक्तम्" इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेवं विज्ञेयम् । चरेदित्यस्य डनिप्रत्ययार्थत्वेन चरणप्रतिपादकाभावमाशङ्क्य समासवृत्तावन्तर्भूता चरणक्रिया भाष्यकृतोक्तेत्यभिधानायोगात् । समासवृत्तावेव चरणक्रियायाः अन्तर्भावः न तु तद्वाचको डनिरस्तीति पक्षे न परिज्मानमिति रूपासिद्धिरिति । **सशब्दस्त्विति ।** [५०-७] बधातोः कर्मणि रप्रत्ययः धातोः पूर्वं सकारश्चाऽऽगम इति भावः (सब्) । **तक्षान्निति ।** [५०-९] तक्ष धातोर्लाङि तदादेशझेरन्तादेशे छान्दसे अडभावे **तक्षान्निति** रूपम् ॥ ३ ॥

युवाना ॥ 'सुप आत्मन....[३।१।८]' इति[५०-१३-१४] सुबन्तादात्मन इच्छतीत्यर्थे क्यच् इति सूत्रार्थः । ततश्च ऋजून् आत्मने इच्छतीत्यर्थे क्याचि " अकृत्सार्वधातुकयोर्दीर्घः " । [७।४।२५] इति ऋजुशब्दोकारस्य दीर्घे " क्याच्छन्दसि " । [३।२।१७०] इति ताच्छीलिक उकारप्रत्यये जसि च **ऋजूयव** इति रूपम् । परस्य **पूर्वसवर्ण इति ।** [५०-१७] विष्टिशब्दात् द्वितीयैकवचनस्य पूर्वसवर्ण इत्यर्थः । **ऋतं कर्म भूतं सत्यमिति ।** [५०-२०] ते यत् असाध्यं कर्म कुर्वन्ति तत् सत्यमेव न तु ऐन्द्रजालिकमिति

भावः । पूर्ववदिति । [५०-२०] तद्यब्दलोपो भूशब्दस्य ह्रस्वत्वमिति भावः। भू प्राप्तावित्यस्येति । [५०-२२] अस्मात् क्विप्रत्यये भुशब्दनिष्पत्तिरिति भावः ॥ ४ ॥

सं वः ॥ समग्मतेति । [५८-२४] गमेर्लुङि " समो-गम्यृच्छिभ्याम् " । [१।३।२९] इत्यात्मने पदे " मन्त्रे घस ह्वर " । [२।४।८०] इति च्लिलुकि झस्यादादेशे " गमहन.. " [६।४।९८] इत्युपधालोपे समग्मतेति रूपम् ॥५॥१॥

उत त्यम् ॥ अक्रतेति । [५१-२] कृञ उविकरणस्य व्यत्ययेन श्नप्रत्यये यणादेशे अडागमे अक्रतेति भाष्ये रूपम् ॥६॥

ते नः ॥ स्वार्थिक इति । [५१-४] " तद्धिताः " । [४।१।७६] इति बहुवचनज्ञापितोऽञ्प्रत्ययः स्वार्थ इत्यर्थः । ननु अणञ्प्रत्यये ञ्प्रत्ययस्वरेण तस्याद्युदात्तत्वात् अनुदात्तं पदमेकवर्जम् [६।१।१५८] इति सप्तमशब्दस्याद्यनुदात्तत्वप्राप्त्या सप्तमशब्दस्याद्यु-दात्तत्वं न स्यादित्यत आह । छान्दसत्वादिति । [५१-४] न विरोध इति । [५१-५] वर्गार्थे अञ्प्रत्यये "ञ्नित्यादिर्नित्यम्" [६।१।१९७] इति आद्युदात्तत्वस्य न्यायप्राप्तत्वात् आद्युदात्तत्वश्रव-णेनास्य न विरोध इत्यर्थः । धत्तनेति । [५१-५] धाञो लोटि तस्य थादेशे तस्य " तस्थस्थमिपां " । [३।४।१०१] इतितादेशे तस्य " तप्तनप्तनथनाश्च " । [७।१।४५] इति तनादेशे शपः श्लौ " श्लौ " इति द्विर्वचने झार्धधातुकस्येत्वतः । [६।४।११२] इति आकारलोपे " खरि च" [८।४।५५] इति चकारस्य चर्त्वे धत्तनेति। रूपम् । चतुर इति । [५१-६] चत्वारो वेदाः पुराणपञ्चरात्रेति-

हासाश्चेति त्रय इत्येकं सप्तकमिति ज्ञेयम् । पञ्चवेदाः तर्को मीमांसा चेति अपरं सप्तकम् । गायत्र्यादीनि सप्तछन्दांसीत्यपरं सप्तकमिति ज्ञेयम् ॥७॥

अधारयन्त ॥ ननु वहतेर्धारणार्थकत्वमुपपन्नं भारं वहति गर्दभीति तदर्थकत्वस्य प्रसिद्धत्वात् स्थिरत्वार्थकत्वमनुपपन्नम् प्रसिध्यभावादित्यत आह । **अनेकार्थत्वादिति** । [५१-९] धृतौ स्थैर्येच वर्तत इत्यर्थः । यस्मात् जगदधारयन्त तस्माद्वह्नय इति श्रुतियोजनामभिप्रेत्य भाष्यं प्रकारान्तरेण योजयति **यद्वेति** । यथा विश्वस्य गतिः प्रवृत्तिर्भवति तथा धारकत्वेन वन्हय इत्यत्वयः । अस्मिन्व्याख्याने पौनरुक्त्यशङ्कैव नास्तीति नतत्परिहाराय प्रयतित व्यमिति भावः । **एवंचेति** । [५१-१३] धृधातोः स्थैर्यं धारकत्वं चेत्यर्थद्वयमुक्तं भवति । वह्निशब्दप्रवृत्तिनिमित्तद्वयस्य आधारयन्तेति पदेनोक्त्यङ्गीकारात् ॥ ८ ॥ २ ॥ १ ॥

इहेन्द्राग्नी ॥ उश्मसीति । [५१-१५] वशकान्तावित्यतो लडादेशमसः " इदं तो मसि " [७।१।४६] इति इकारान्तत्वे " ग्राहिज्या ..... " [६।१।१६] इति संप्रसारणे शपो लुकि उश्मसीति रूपम् ॥ १ ॥

ता यज्ञस्य ॥ शुम्भतेति । [५१-१७] लोटि शपि लोटः थादेशे तस्य तादेशे **शुम्भतेति** रूपम् ॥ २ ॥

ता मित्रस्य ॥ प्रशस्तय इति तादर्थ्ये चतुर्थीति भावेनाह **प्रशंसार्थाविति ।** [५१-२०] ॥ ३ ॥

उग्रा सन्ता ॥ उग्रत्वविशेषणं कथमाह्वानोपयोगीत्यत आह । **उग्रो क्रूरौ शत्रूणामिति ।** [५१-२१] ॥ ४ ॥

ता महान्ता ॥ भिन्नविषयतामिति । [५१-२३] उत्तरार्धस्य पूर्वार्धविषयादन्यविषयतां दर्शयतीत्यर्थः । तत्राहेति । [५१-२४] अत्रिण इत्येतस्य विशेषणान्तर सूचयितु भाष्यकारः 'रक्षोरक्ष्याः प्रजा' इत्याहेत्यर्थः । अनेन जनाइतिविशेष्यं सूचितमिति बोध्यम् । इतःपर टीकायां श्रूयमाणानि इदमुक्तं भवति । यद्यप्युत्तरार्धेऽपि रक्ष इत्येवानुवर्तते । तथापि तदीयाः प्रजास्तच्छब्देन लक्ष्यन्ते । उक्तानुपपत्तेरेव। रक्ष्यरक्षकभावसंबन्धस्य विद्यमानत्वादिति । रक्षोभिः रक्ष्याः रक्षोरक्ष्याः प्रजा उत्तरार्धे लक्ष्यन्त इति [५१-२४-२५] शेष वाक्यानि प्रक्षिप्तानि । न टीकावाक्यानि । अवश्यं चैतदेवं विज्ञेयम् लिङ्गवचनव्यत्यासानुपपत्त्यपरिहारेण रक्षःशब्दस्योत्तरत्रानुवृत्त्यङ्गीकारायोगात् यदपि रक्षःशब्दस्य प्रजालक्षकत्वेन समाधानं तदपिन । लाक्षणिकेष्वपि पदेषु विजातीयलिङ्गवचनविशेषकत्वाभावात् । अन्यथा गम्भीरायां नद्यां घोष इति न स्यात् । किंतु गम्भीरे नद्यां घोष इति स्यात् । जना इत्याध्याहारेणैव सामञ्जस्ये रक्षःशब्दानुवृत्तिमभिप्रेत्य लाक्षणिकत्वाभिधानायोगाच्च । तास्वत्रिण इति । [५१-२६] यद्यपि जनेषु अत्रिण इति व्याख्यातीति वक्तव्यम् । तथापि जना इत्यध्याहारसूचनाय प्रजा इति भाष्यकृता उक्तत्वात्तदनुसारेण तास्वित्युक्तम् । ननु प्रजा इति यदि विशेष्यं तर्हि वेदे अत्रिण इति प्रयोगोऽनुपपन्न इत्यत आह । वेदेत्विति । [५२-१] जना इति पुल्लिङ्गमेव विशेष्यम् । अतोऽत्रिण इति प्रयोगो नानुपपन्न इति भावः । एव तर्हि भाष्ये अभ्यः प्रजा इति अनुपपन्नं प्रामोतीत्यत आह । भाष्ये त्विति । [५२-१] । भाष्ये तु जना इति विशेष्यपदाध्याहारसूचनायैव प्रवृत्तम् ।

ननु अग्निण इति श्रौतलिङ्गानुसारेण विशेष्यपदकथनाय प्रवृत्तमिति भावः। डीविति । [५२-२] 'कृदिकारात् ' (गणसूत्र) इत्यनेन वार्तिकेनेत्यर्थः ॥ ॥५॥

तेन सत्येन ॥ लकारव्यत्ययेनेति । [५२-१०] लटः स्थाने व्यत्ययेन लोट् । ततश्च जागृतमित्यस्य न नियोगोऽर्थः । अपि तु स्वभावतएव भवन्तौ जागरणवन्तावित्यर्थ इति भावः ॥६॥ ३॥ २॥

प्रातर्युजा ॥ प्रात सवन इति [५२-१६] प्रातःशब्देन लक्षणया प्रातः सवनं गृह्यते । स्तुतत्वेनेति युजेरर्थाभिधाने प्रातः-शब्दोपपदात् युजेः क्विपि प्रातर्युगिति रूपम् । भगवति व्याख्यातीति [५२-१६] लक्षणयेतिशेषः । अतएव भाष्ये गम्यगमकभावो लक्षणा-बीजभूतः संबन्धो दर्शितः प्रातर्युभूगिति प्रोक्त इत्यर्थ इति [५२-१७] लक्षणयेति शेष । इत परं टीकायां श्रूयमाण उपायोपेय-योरभेदोपचारात् इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैत देव विज्ञेयम् । प्रातर्युक् इति शब्देन प्रातर्योगिगम्यस्य लक्षणया गृही तत्वात्तेन प्रातर्योगगम्येन परमेश्वरस्य मुख्याभेदस्यैवोक्तत्वेनाभेदोप-चाराभावात् । ऋत्विगादित इति [५२-२१] इतःपरं टीकायां श्रूयमाण हे होतः इति प्रक्षिप्तम् । अवश्यं चैतदेवं विज्ञेयम् । विबो-धयेति लोटः बुध्यत इति वर्तमानार्थकत्वस्याङ्गीकृतत्वान्नियोगार्थ-कत्वाभावेन हे होतरिति संबोधनस्यानपेक्षितत्वात् । विबुद्धावेववर्तेते इति [५२-२१] इतः परं टीकायां श्रूयमाण " तौप्रार्थयस्वेति यावत् " इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्य चैतदेव विज्ञेयम् । बोधयेति पदस्य बुध्यत इति वर्तमानार्थकत्वस्याङ्गीकृतत्वेन प्रार्थयस्वेति व्याख्यानायोगात् ॥ १॥

या सुरथा । रथितमावीति । [५२-२२] संहितायाम् 'अन्येषामपि दृश्यते' [६।३।१३७] इति दीर्घे रथीतमाविति रूपम् ॥२॥

यावां कशा ॥ मिमिक्षतामिति । [५३-२] अनेकार्थत्वात् धातूनां स्पर्शार्थात् मिहेःस्वार्थे सनि "सन्यङोः" [६-१-९] इति द्वित्वे "हो ढः" [८-२-३१] इति हकारस्य ढत्वे "षढोःकःसि" [८-२-४१] इति कत्वे सकारस्य षत्वे थसस्तमादेशे **मिमिक्षतमिति** रूपम् । भाष्ये तु मिहः औणादिके भावे सन्प्रत्ययेलघूपधगुणे ढत्वे कत्वे षत्वे नकारस्यणत्वे च **मेक्षणमिति** रूपम् ॥ ३ ॥ **नहि वाम् ॥ द्वितीयार्थ इति ।** [५३-३] यत्रेति सप्तमी द्वितीयार्थ इत्यर्थः । **नास्तिहीति** [५३-३] अयं पाठः प्रामादिकः । **न ह्यस्तीत्येव** पाठः प्रामाणिकः "न हि वामस्ति दूरके" इत्यत्र नहीत्यस्य एकपदत्वात् बहुपुस्तकेषु न ह्यस्तीत्येव पाठदर्शनाच्च ॥ ४ ॥

हिरण्यपाणिम् । आदेशादिकमिति । [५३-५] हितशब्दे तलोपः रमणीयशब्दस्य रण्यइत्यादेश इति ज्ञेयमित्यर्थः । **अत्र देवताशब्द इति ।** [५३-८] देवताशब्दो द्विविधः । एको देवशब्दपर्यायः अपरःअन्यप्रतिपाद्यत्ववचनः । एव चात्र देवताशब्द देवशब्दपर्याय इत्यर्थ ॥५॥ ॥४॥

अपां नपातम् ॥ ननु यदि पार्थिवे देहे व्यक्तस्तर्हि अपां न पुत्रःस्यात् कथं नप्तेत्यत आह । तदात्मकत्वादिति [५३-१४] इतः परं टीकायां श्रूयमाणं **देहोऽपि तत्र चेति** प्रक्षिप्तम् । **देहस्येत्युच्छिष्टम्** । ततश्चैवं योजना । देहस्य पृथिव्यात्मकत्वात् पार्थिवदेहे अभिव्यक्तः जनार्दनः पृथिवीपुत्र इति अपांनपादित्यर्थ इति । अवश्य

चैतदेवं विज्ञेयम् । देहोऽपीति पाठे देहोष्यपां पुत्र इत्यर्थप्रसङ्गेन अपां पुत्रे पार्थिवे देहे व्यक्तो जनार्दनः अपांनपादित्यर्थ इत्येव वक्तव्यत्वेन तत्रच पार्थिवदेहे व्यक्तत्वाज्जनार्दनः पृथिवीपुत्र इत्येवमपांनपादित्युक्त्ययोगात् । ॥ ६ ॥

विभक्तारम् ॥ वसुशब्दस्य नपुंसकलिङ्गत्वात् श्रुतौ पुल्लिङ्गत्वप्रयोगः छान्दस इत्यभिप्रेत्याह । **वसोः वसुनइति** । [५३-१७] ॥ ७ ॥

सखायः ॥ शुम्भतीति । [५३-२१] शुभशुम्भ शोभार्थ इति उक्तस्य तौतादिकस्य शुम्भ्धातोः शप्रत्यये " अनिदितां हल उपधायाःक्ङिति " [६-४-२४] इति नलोपे ' शे तृम्फादीनामिति वक्तव्यम् [वा. सू. ७।१।५९] इति नुमि तिपि **शुम्भतीति** रूपम् ॥ ८ ॥

अग्नेःपत्नीः । उशतीरिति । [५३-२४] वश कान्तावित्यतः शतृप्रत्यये शपो लुकि ग्रहि ज्या..... ' [६-१-१६] इति संप्रसारणे " उगितश्च " [४-१-६] इति ङीपि **उशतीति** रूपम् ॥ ९ ॥

आ माः ॥ माशब्द इति । [५४-२] " ज्ञातृनेतृत्वतौ हरिः " [भाष्य] इत्यनेन व्याख्यात इत्यर्थः । ननु यज्ञसंयोगाभावात् " पत्युर्नो यज्ञसंयोगे " [४-१-३३] इति नान्तादेशोऽनुपपन्नइत्यत आह । **यज्ञसंयोग इतीति** । [५४-३] अतएव-वृषलपत्नीत्यादिप्रयोगः । **उभयत्रेति** [५४-६] वायुपत्नीपरतया एकव्याख्यानं विष्णुपरतया चापरं व्याख्यानं इत्युभयत्रापि ह्वयतेः त्रप्रत्ययः । " बहुलं छन्दसि " [६।१।६४] इति संप्रसारणम् ।

आद्यव्याख्याने करणे अः द्वितीयव्याख्याने कर्मणीति विवेकः । ॥ १० ॥ ५ ॥

आभि नः ॥ अवसेति । [५४-९] अवतेः कर्तर्यसुन्-प्रत्यये टापि **अवसेति** रूपम् । ॥ ११ ॥

इहेन्द्राणी ॥ इन्द्राणीमिति । [५४-१२] " इन्द्र-वरुण " [४-१-४९] इति सूत्रेण ङीपि आनुमागमे च सति **इन्द्राणीमिति** रूपम् । एवं **वरुणानी** मित्यपि द्रष्टव्यम् । **अग्नायीमिति ।** [५४-१३] 'षपाकप्यग्नि. ' [४-१-३७] इति सूत्रेण ङीपि अग्निशब्देकारस्य उदात्तैकारादेशे च सति तत आयादेशे अग्नायीमिति रूपम् । ॥ १२ ॥

महीद्यौः । महीति । [५४-१४] महच्छब्दात् " पितृश्वशुरादिभ्यश्च " [४-१-४१] इति ङीपि **महीति** रूपम् । **पिपृतामिति ।** [५४-१५] पृधातोर्लोटस्तसस्तामादेशे शपः श्लौ द्विर्वचने " अर्तिपिपर्त्योश्च " [७।४।७७] इति अभ्यासस्येत्वे **पिपृतामिति** रूपम् । ॥ १३ ॥

तयोरित् ॥ उपपदस्य गंभाव इति । [५४-२३] । उपलक्षणमेतत् । आद्यधातोर्गुणः । द्वितीयस्य टिलोपः इत्यपि द्रष्टव्यम् । (गन्धर्व) ॥ १४ ॥

स्योना पृथिवी ॥ स्योनेत्यनेन पौनरुक्त्यपरिहाराय शर्मेति व्याचष्टे । **शर्म गृहमिति ।** [५५-४] ॥ १५ ॥

अतो देवाः ॥ [५५-५] श्रुतौ सप्तेति पदं लुप्ततृतीयाबहुवचनम् । अतः धामभिरित्येतद्विशेषणत्वमुपपन्नमिति बोध्यम् ॥१६॥

इदं विष्णुर्विचक्रमे ॥ वहते रूपमिति [५५-१२] संपूर्वाद्वहेः क्तप्रत्यये यजादित्वात्संप्रसारणे ' होढः ' [८।२।३१] इतिढत्वे झषस्तथोर्धोधः [८।२।४०] इति तस्य धत्वष्टुत्वे " ढो ढे लोपः" [८।३।१३] । इति ढलोपे " ढ्रलोपे पूर्वस्य दीर्घोऽणः " [६।३।१११] इति दीर्घे **समूढमिति** रूपम् । ' वर्णागमो वर्णविपर्ययश्चेति वचनात् ढकारस्य व्हादेशे **समूळ्हमिति** छान्दसं रूपम् । ॥ १७ ॥

त्रीणि पदा ॥ निवारणीय इति । [५५-१९] । इतः परं टीकायां **पोरदुपधादितीति** प्राक्षिप्तम् । अवश्यं चैतदेवं विज्ञेयम् । ' पोरदुपधात् ' [३।१।९८] इति सूत्रस्य यत्प्रत्ययविधायकत्वेन ण्यद्विधायकत्वाभावात् । न चानेन सूत्रेण यति प्राप्ते ' लपिदभिभ्यांचइति वार्तिकेन ण्यङ्भवतीति व्याख्याने सर्वं समंजसं भवतीति वाच्यम् । वार्तिकमनुदाहृत्यानुपयोगिनः सूत्रस्योदाहरणायोगात् । लपिदभिभ्यां चेति उच्छिन्नम् । तस्यार्थः । दभेः धातोः लपि दभिभ्यां चेति वार्तिकेन ण्यत्प्रत्ययो भवतीति । दभिः प्रकृत्यन्तरम् । तेनोपधावृद्धौ **अदाभ्य** इति रूपम् । एतेन दम्भेरनुस्वारलोपप्रापकाभावात् अदाभ्य इति रूपमनुपपन्नमिति परास्तम् । ॥ १८ ॥

विष्णोः कर्माणि पश्यत ॥ चशब्दादिति । [५५-२२] "सर्वदैवचे"ति भाष्यस्थचशब्दादित्यर्थः । श्रौतेन 'पस्पश' इति शब्देन विष्णोर्ज्ञातत्वमज्ञातत्वं च साक्षादेवोक्तं भाष्ये " यतो जातान्यविज्ञात " इति अविज्ञातत्वं कण्ठत एवोक्त्वा " सर्वदैव चेति चशब्देन ज्ञातत्वमुक्तमिति विवेकः । ॥ १९ ॥

तद्विष्णोः परमम् ॥ ते ह्येति [५६-७] मुख्यतस्सूरित्वस्य संसारविमुक्तधर्मत्वादिति भावः ॥ २० ॥

तद्विप्रासः जागृवांस इति । [५६-९] जागृधातोः लिटि तस्य क्रस्वादेशे " छन्दसि वेति वक्तव्यम् " [वा. सू ६।१।१] इति वचनात् द्विर्वचनाभावे जसि जागृवांस इति रूपम् । ततो युरिति । [५६-१०] युप्रत्ययस्य " युवोरनाकौ " [७।१।१] इत्यनादेशाभावो बाहुलिकः । एतदर्थ इति [५६-१०] विष्णोः सर्वोत्तमत्वरूपोऽर्थः " तद्विष्णोः परमं पदम् " इति पूर्वस्यां ऋचि उक्त एवेत्यर्थः । ॥ २१ ॥ ७ ॥ ३ ॥

तीव्राः सोमासः ॥ प्रस्थितनामकानीति [५६-१५] सोमानामुत्तरवेदिं प्रति नीतत्वात् प्रस्थितनामकत्वमितिभावः ॥ १ ॥

उभा देवा ॥ दीव्यतेरिति [५६-१६] क्विप्प्रत्ययेरूपामिति भावः ॥ २ ॥

इन्द्रवायू ॥ धियस्पती इतीति [५६-२२] " षष्ठ्याः पति .." [८।३।५३] इत्यनेन सूत्रेण संहितायां षष्ठीविसर्गस्य सकारे धियस्पती इति भवति ॥ ३ ॥

मित्रम् ॥ पूतदक्षसाविति [५६-२४] दक्षेति प्रातिपदिकस्य सुगागमे पूतदक्षसाविति रूपम् ॥ ४ ॥

ऋतेन यौ ॥ प्रकाशत्वादिति [५७-३] द्युत्धातोः " द्युतेरिसिन्नादेशश्च ज " [उ २७५] इति इसिन्प्रत्यये आदेश्च जत्वे गुणे ज्योतिःशब्दनिष्पत्तेरिति भावः ॥ ५ ॥ ८ ॥

वरुणः ॥ भुवदिति [५७-५] । भूधातोर्लेटि अडागमे " भूसुवोस्तिङि " [७।३।८८] इति गुणनिषेधेन उवङादेशे भुवदितिरूपम् । **करतामिति ।** [५७-५] कविकल्पद्रुमे कृञ्कृतौंइति पठिताद्धौवादिकात् कृञो लोडादेशे तसस्तामसादेशे शपि गुणे करतामितिरूपम् ॥६॥

मरुत्वन्तम् ॥ सजूरिति ॥ [५७-७] सहशब्दस्य सजूरित्यादेशे **सजूरिति** रूपम् [समानपूर्वाज्जुषेः क्विपि "समानस्य छन्दसि" [६।३।८४] इति समानस्य सादेशे ससजुषोरुः [८।२।६६] इतिरुत्वे " वोरुपधाया " [८।२।७६] इति दीर्घे च **सजूरिति** रूपम्] (छलारीये ११४) **तृम्पत्विति ।** [५७-७] तृप तृप्तावित्यस्मात् शप्रत्यये " शेमुचादीनाम् " [७।१।५९] इतिसूत्रवार्तिकेन " शे तृपादीनामिति वक्तव्यम् " इत्यनेननुमि तृम्पत्विति रूपम् ॥७॥

इन्द्रज्येष्ठाः ॥ ननुगणस्यैकत्वात् कथं गणा इति बहुवचनमित्यत आह । **सप्तसप्तका इति ।** [५७-९] महागणस्यैकत्वेऽपि अवान्तरगणानां सप्तसंख्याकत्वात् तद्विवक्षया बहुवचनमिति भावः । **श्रुतेति** [५७-९] विकरणस्य छान्दसत्वेनाभावे **श्रुतेति** रूपम् ॥८॥

हतवृत्रम् ॥ ताच्छीलिको नुरिति [५७-१०] दाण् दान इत्यतः " दाभाभ्यां नुः " [उ० ३१९] इति नुप्रत्यये जसि च दानव इति रूपम् । **ईशतेति ।** [५७-१२] ईशेर्लिङि शपो "बहुलं छन्दसि" [२।४।७३] इति लुगभावे आगमशासनस्यानित्यत्वात् सीयुडभावे च **ईशतेति** रूपम् । ॥९॥

टीपः—१ महाभाष्यपाठः

LIBRARY ACADEMY OF SANSKRIT RESEARCH MELKOTE-571431

विश्वान् ॥ उग्रत्वं च न सर्वान्प्रतीत्याह । अप्रसह्याः शत्रुभिरिति । [५७-१७] ॥१०॥ ॥९॥

जयतामिव ॥ याथनेति [५७-१८] । यातेर्लङादेशे "तप्तनप्तनथनाश्च" [७।१।४५] इति सूत्रेण थनादेशे याथनेति रूपम् ॥११॥

हस्काराद् ॥ स्वेन सहेति । [५७-२१] सहशब्दोपपदात्करोतेरौणादिकेऽणि वृद्धौ च "वोपसर्जनस्य" [६।३।८२] इति सहशब्दस्य सादेशे अकारलोपे च स्कार इति रूपम् ॥१२॥

आपूषन् ॥ इदं रूपमिति । [५८-१] "वृंहेर्नलोपश्च" [उ ५७४] इति इसिप्रत्यये नलोपे च बर्हिरिति रूपम् । लोटि रूपमिति [५८-२] अजेर्लेटि तदादेशशेर्बादेशे "अतो हेः" [६।४।१०५] इति तस्य लुकि अइत्यनेन संबन्धे अजोति रूपम् । धरुणमिति । [५८-२] धृधातोरुनन्प्रत्यये णत्वे च धरुणमिति रूपम् । गतमिति । [५८-३] देशान्तरमिति शेषः । लिडन्तमिति । [५८-३] । अजेर्लिटि "अजेर्व्यघञपोः" [२।४।५६] इति छान्दसत्वाद्वीत्यादेशाभावे द्वित्वाभावे च अजेति रूपम् । अस्मिन्पक्षे ऋग्योजना । हे आघृणे पूषन् त्वं नः अस्मदर्थमेव चित्रबर्हिषं दिवो धरुणं च प्राप्तवानसि । यथा नष्टं देशान्तरगतं गां आदरेण प्राप्नुवन्ति एवमिति । ॥१३॥

पूषा ॥ श्रुतावपगूळ्हामिति [५८-४] गूढशब्दढकारस्य ळ्हकारादेशे अपगूळ्हमिति रूपम् ॥१४॥

उतोसः॥ साधयामासेति । [५८-६] इतः परं टीकायां-श्रूयमाणं "**अनुदात्तत्वं छान्दसम्**" इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अवश्यं चैतदेवं विज्ञेयम् । गतिव्यतिरिक्तेसेषिधदिति-पदे "अभ्यस्तानामादिः" [६।१।१८९] इत्यनेन आदेरुदात्तत्वात् उत्तरयोः क्रमेण स्वरितप्रचयत्वात् । गतेश्च "तिङि चोदात्तवति" [८।१।७१] इति सूत्रेणानुदात्तत्वस्य प्राप्तत्वेन तदनुदात्तत्वस्य छान्दसत्वाभावात् । न च "तिङ्ङ तिङः" [८।१।२८] इतितिङ-न्तस्य निघाते सति "तिङि चोदात्तवति [८।१।७१] इति सूत्रं न प्रवर्तत इति वाच्यम् । "चादिलोपे विभाषा" [८।१।६३] इत्य-नेन सूत्रेण प्रथमतिङः अनुदात्तत्वनिषेधेन "तिङ्ङतिङः [८।१।२८] इति सूत्रस्याप्रवृत्तेः । **यङ्लुगन्तादिति** । [५८-६] कृञो यङितस्य लुकि द्वित्वे उरदत्वे "रुग्रिकौच लुकि" [७।४।९१] इति अभ्या-सस्य रुगागमे लेटि "सिब्बहुलं लेटि" [३।१।३४] इति सिपि अडागमे "बहुलं छन्दसि । [?] इतिधातोर्गुणाभावे **चर्कृषदिति** रूपम् । **गोर्भिर्वार्भिरिति** [५८-७] यथा उदक सेचनेन यवं कुर्वन्ति साधयन्ति च तथेति भावः । ॥१५॥ ॥१०॥

अम्बयः॥ अध्वरियच्छब्द इति । [५८-१२] अध्वर-शब्दात् "सुप आत्मनः क्यच्" [३।१।८] इति इच्छायां क्यचि क्यचि च" [७।४।३३] इति ईत्वे क्यजन्ताच्छटः शत्रादेशे **अध्वरीय-दिति रूपम्** । **पृञ्चतीरिति** । [५८-१४] सोमे पयसि उदक-संपर्कोऽस्तीतिभावः । ॥१६॥

टीप—१ उरत् इतिसूत्रेण ऋकारस्य अकारे।

अमूर्याः ॥ अन्योन्यसाहित्योक्तेरिति । [५८-१६] ऋचि अपां सूर्यस्य च साहित्योक्तेरित्यर्थः । भाष्ये सहिता इति नैकं पदं किन्तु सः,हि ताः इति पदत्रयमिति भावेनाह । **यद्वेति ।** [५८-१६] । सहिता अपीति भाष्यं याभिर्वा सूर्यः सहेति श्रुतिखण्डस्यव्याख्यानमिति । ॥ १७ ॥

अपोदेवीः ॥ कर्त्वमिति । [५८-१९] कृञो त्वन्प्रत्यये गुणे **कर्त्वमिति** रूपम् । ॥ १८ ॥

अप्स्वन्तः ॥ पुरुषव्यत्यय इति । [५८-२२-२३] भवतेति मध्यमपुरुषबहुवचनस्य सन्त्विति प्रथमपुरुषबहुवचनान्तेन व्याख्यानं अस्यां ऋचि अपां देवतात्वं न अन्येषां देवतात्वमिति ज्ञापनार्थमित्यर्थः ॥ १९ ॥

अप्सु मे सोमो अब्रवीत् ॥ प्रमाणोपन्यासेति । [५८।२५] आप्तस्य सोमस्य वचनं प्रमाणत्वयोपन्यस्यत इति भावः । **केवलेति** [५९-१] 'केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च' [४।१।३०] केवलादिभ्यः प्रातिपदिकेभ्यः संज्ञायां छन्दसिविषये स्त्रियां ङीप्प्रत्ययो भवतीति सूत्रार्थः ॥ २० ॥ ११ ॥

आपः पृणीत ॥ कर्मणि क इति । [५९-३] औणादिक कप्रत्ययः उपपदेकारलोपश्चेति भावः । **तद्धितो य इति ।** [५९-३] यस्येति च [६।४।१४८] इति इकारलोपे सूर्य इति रूपम् । **दृशे विख्येच** [३।४।११] **"इत्यव्ययमिति"** [५९-५] दृशे विख्ये च इति सूत्रेण दृशे इत्येतस्य केप्रत्ययान्तस्य निपातनात्

"कृन्मेजन्तः" [१।१।३९] इति सूत्रेणाव्ययमिति ज्ञायत इति भावः ॥ २१ ॥

इदमापः ॥ अभिदुद्रोहेति । [५९-७] दुह् जिघांसायामित्यतः लिटि तदादेशभिपो णालि द्वित्वादौ दुद्रोहेतिरूपम् ॥२२॥

आपो अद्य ॥ समगस्महीति बहुवचनानुसारेण अन्वचारिषमित्येकवचनं बहुवचनार्थं व्याख्येयमित्याह **एकवचनामिति ।** [५९-९] **समगम्महीति ।** [५९-९] संपूर्वात् गमेः 'समोम्यूच्छिभ्याम्' [१।३।२९] इत्यात्मनेपदे तस्य महिङि सिचि "वा गम" [१।२।१३] इति सूत्रेण सिचः कित्वात् "अनुदात्तोपदेश"... [६।४।३७] इति मकारलोपे अडागमे च **समगस्महीति** रूपम् । **हे अग्न इति** [५९-९] इतः परं टीकायां श्रूयमाणं "**अग्निंच विश्वशम्भुवम्**" इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अनपेक्षितत्वात् । असंगतत्वाच्च ॥ २३ ॥

संमाग्ने ॥ अन्तर्णीतेति [५९-१२] अनेन विद्युरित्यस्य वेदयेयुरित्यर्थ उक्तो भवति । **इन्द्रे अश्विनोरिति ।** [?] इन्द्रे स्तुते अश्विनोःस्तुतयोः उषसि च स्तुतायामित्यर्थः ॥ २४ ॥ ॥ १२ ॥ ४ ॥ ५ ॥

कस्य नूनम् ॥ करोतेर्ड इति [६०-१] । कर्तरीति शेपः । **उच्चारणाद्यर्थ इति** [६०-२] आदिशब्देन स्मरणं ध्यानं च ग्राह्यम् । आवृत्त्या सर्वेषामर्थानामिह बोधक इति भावः । **दादिति ।** [६०-३] दाञो लिङि तिपि इकारलोपे यासुटा विकरणस्य च छान्दसत्वादडभावे **दादिति** रूपम् **दृशेयामिति** [६०-३] । दृशेर्लिङि

मिपो मादेशे " दृशेरगूवक्तव्यम् [र्व्यः] " [वा. सू. ३।१।८६] इति अक्प्रत्यये कित्त्वाद्गुणाभावेयासुटि इयादेशे दृशेयमिति रूपम् । दोऽवखण्डन इति [६०-६] अस्मात् क्तिनि " आदेच्च उपदेशेऽशिति " [६।१।४५] इत्यात्वे " थास्यतिमास्थामित्तिकिति " [७।४।४०] इति आकारस्येकारादेशे नञ्समासे अदितिरिति रूपम् । जग्ध्यादेशाभाव इति । [६०-१०] " अदोजग्धिर्ल्यपि किति " [२।४।३६] इति सूत्रप्राप्तजग्ध्यादेशाभाव इत्यर्थः । चतुर्थ्यर्थ इति । [६०-१६] " विशेषदेशप्राप्तित " [भा १८-२१] इति तसिः चतुर्थ्यर्थ इत्यर्थः ॥ १ ॥

अग्नेर्वयम् ॥ "यज्ञेशोहूयत" इत्यनेन 'तदधीनत्वादर्थवत्' [म १।४।३] इति न्यायेन तत्तच्छब्दवाच्यत्वं सूचितमिति भावः । हेतुरिति । [६०।२१] । उक्त इति शेषः तदयुक्तामिति । [६०-२१] नामस्मरणादिकमुक्त्वा तत्फलत्वेन भगवतः स्थानविशेषप्राप्तिप्रार्थनमयुक्तामित्याशयः । ॥ २ ॥

अभि त्वा ॥ वरणीयत्वत इति । [६१।१] इतःपरं टीकायां श्रूयमाणं " अवद्यपण्येत्युपाधेरविवक्षितत्वाद्दहलोपर्यादिति भवत्येवेति हेरर्थः ॥ " [६१।१] इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । अयञ्च चैतदेवं विशेयम् " वर्येति स्त्रियां निपात्यते । अनिरोधश्चेक्रवति । अनिरोधोऽप्रतिबन्धः । शतेन वर्या कन्या । स्त्रीलिङ्गनिर्देशः किमर्थः । " वार्या ऋत्विजः " इति काशिकोक्तेः ' अवद्यपण्य ' [३।१।१०१] इति सूत्रेस्त्रियामेव वार्येति

टीप—१ सि को पा

निपातस्य विहितत्वेन प्रकृते स्त्रीत्वाभावात्। अनिरोधरूपोपाधेरविवक्षि तत्वात् निपातो न भवति अपि तुष्य देव भवतीत्यस्य हिशब्दार्थत्व कथनात्। **अवन्नित्येकवचनादिति** [६१-३] अवान्नित्येकवचना दीमह इत्येकवचनार्थ इत्यर्थः। ॥ ३ ॥

याश्रिद्धि ॥ तवाऽनामयं रूपमिति [६१।८] ऐश्व र्यादिरूपो विग्रहः तव रूप स्वरूपम्। न तु देवतादीनां परिदृश्यमान विग्रहवत् भिन्न इति भावः। **निद इत्यव्ययं क्वचिदिति** [६१।९] अत्र क्वचिदिति प्रक्षिप्तम्। ततश्चैवं टीकावाक्यपाठः। नि इत्यव्ययं सामीप्ये व्याख्यातं। **निदस्तस्य समीपगा इतीति** [६१।९] ननु विरुद्धार्थद्वयाभिधावित्यनुपपन्नम्। 'आतोऽनुपसर्गे कः' [३।२।३] इति सूत्रे अनुपसर्ग इति श्रवणात् प्रकृते चोपसर्ग सद्भावादित्यत आह। **मूलविभुजादित्वादिति।** [६१।१० 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् [वा. सू. ३।२।५] इति वचनात् कप्रत्यय इति भावः। नामैकदेशग्रहणामिति भावेनाह। **नाममहोदधिनामक इति।** [६१।११]॥ ४ ॥

भगभक्तस्य ॥ राय इति पञ्चमीति भावेनाह। **रायो मूर्धा-नामिति।** [६१-१६] अशेमेति। [६१।१७] अश भोजन इत्यस्माल्लिङि मसि व्यत्ययेन शपि यासुटि तस्येयादेशे **अशेमेति** रूपम्। **अश्नीम इति।** [६१-१७] अशधातोर्लेटो मसिश्नाप्रत्यये 'ईहल्यघोः' [६।४।११३] इति ईत्वे **अश्नीम** इति रूपम्। ॥ ५ ॥ १३ ॥

न हिते ॥ वयमिति विशब्दस्य बहुवचने रूपमित्यभिप्रेत्याह। **विशब्द इति।** [६१।२१] **मनु अवबोधनइति।** [६१।२२]

अस्मात् युप्रत्यये छान्दसे अनादेशाभावे मन्युमिति रूपम् । द्वेधा व्याख्यातीति । [६२।१] गङ्गादिनदीपरत्वेनैकं व्याख्यानम् । वायूत्पत्तिज्ञातृदेवपरत्वेनापरं व्याख्यानमिति द्रष्टव्यम् । ॥ ६ ॥

अबुध्ने राजा ॥ नञः परनिपातादिति । [६२।५] आदिशब्देनानव्ययत्व ग्राह्यम् । नीचीना इति । [६२-७] । नीचशब्दात् सप्तम्यन्तात् तिष्ठतीत्यर्थे 'तद्धिताः' [४।१।७६] इति बहुवचनग्रहणे खप्रत्यये खस्येनादेशे नीचीना इति रूपम् । अथ च बुध्नशब्दः अबुध्नशब्दान्तर्गतबुध्नशब्दात् भिन्न इत्याभिप्रेत्यार्थमाह । बुध्न अधो भाग इति [६२-८-९] । शेआदेशइति । [६२-१३] आमः " सुपां सुलुक्.. " [७-१-३९] । इति शे इत्यादेश इत्यर्थः । ॥ ७ ॥

उरुं हि राजा ॥ धातव इति । [६२-२०] ' धातु-गतिशुद्धयोरित्यस्मात् ' तुमर्थे सेसेनस ' इति तवेमप्रत्यये ' लोपो व्योर्वलि ' [६-१-७६] इति वलोपे धातव इति रूपम् । विकरणोति । [६२-२१] । कृञो लडि तिपि विकरणलोपे कृञो गुणे अडागमे अकरिति रूपम् । आकारलोपश्छान्दस इति । [६२।२४] । अत्र छान्दस इति प्रश्लिष्टम् । विपूर्वात् धाञः विधि निष्पन्नात् विधाशब्दात् षष्ठ्यैकवचने " आतो धातोः " [६।४।१४०] इत्याकारलोपे सोमप इत्यादिवत् हृदयविध इतिरूपसमवेनाकारलोपस्य छान्दसत्वाभिधानायोगात् ॥ ८ ॥

शतं ते ॥ मुमुग्धीति । [६३-४] । मुचःधुरादित्वेऽपि छान्दसे णिजभावे लोटः सिपः ' सेर्ह्यपिच्च ' [३।४।८७] इति

(१ इस ओष् आम्,)

ह्यादेशे शपः श्लौ " श्लौ " [६।१।१०] इति द्विर्वचने ' हुझल्भ्यो हेर्धिः ' [६-४-१०१] इतिधित्वे **सुमुग्धीति** रूपम् ॥ ९ ॥

अमीये ॥ इरयोर इति । [६३-५] दृशेः झस्य " लिटस्त-झयोरेशिरेच् " [३।४।८१] इति इरेजादेशे तस्य रे इत्यादेशः तस्य ऋादिनियमादनिटोऽपीडागमे सति पुनः इरे इति श्रवणं प्राप्तं तत्परिहाराय सेट्कस्यापि रेइत्यादेशस्य पुनः रे इत्यादेशः । ततश्च पुनरिडागमो न भवति । लिट्प्रयुक्तद्वित्वादौ ददृश इतिरूपम् । ततश्च इरयो रे [६।४।७६] इतिसूत्रस्य छन्दसि द्वयोरियो रे आदेशो भवतीत्यर्थो ज्ञेयः (ददृश्रे) **कर्तरिल्युडिति ।** [६३-११] अनेन त्वदाज्ञाकरणा [भा. १९-१९] । इत्येतस्य त्वदाज्ञायाः कर्तारइत्यर्थो ज्ञेयः । ॥१०॥ ॥१४॥

तत्त्वा यामि ॥ बोधीति । [६३-१६] । बुधेर्णिचि लोटि तस्यसिपि सेः हीत्यादेशे हेर्लुकि ' बहुलं छन्दसि ' [२।४।७३] इति शब्लुकि **बोध्रीति** छान्दसं रूपम् । **मा प्रमोषीरिति ।** [६३-१६] मुषेः ' माङि लुङि ' [३।३।१७५] इति लुङि ' न माङ्योगे ' [६।४।७६] इत्यडभावे च्लेः सिचि इडागमे ' अस्ति सिचोऽपृक्ते ' [७।३।९६] ' इति ईटि ' ' इट ईटि ' [६।२।२८] इति सिचो लोपे रुत्वविसर्गयोः **मा प्रमोषीरिति** रूपम् । ॥११॥

तादित् ॥ ननु हार्द इति भवितव्यं कथं हृद इति इत्यत आह । **अणीति ।** [६३-१८] **प्रत्ययान्तरमिति ।** [६३-१९] अच्-प्रत्यय इत्यर्थः । **गृभीत इति ।** [६३-२०] हृग्रहोर्भश्छन्दसि [वा. सू. ३।१।८४] इति भत्वमूह्यम् । **मुमोक्तु इति ।** [६३-२१]

मुचेः छान्दसे णिजभावे शपः श्लौ द्विर्वचने तिप एरुत्वे गुणे च मुमोक्त्विति रूपम् । ॥१२॥

शुनःशेपो ह्यह्ववत् ॥ गृभीत इति रूपसिद्धिसूत्रं स्मारयति । ह्वग्रहोरिति । [६३-२२] योगविभागादिति । [६३-२५] प्रामाणिकप्रयोगसिद्ध्यर्थं योगविभागः कार्य इति भावः । अह्ववदिति [६४-५] ह्वेञः लुङि 'आदेच्च उपदेशेऽशिति' [६।१।४५] इत्यात्वे 'लिपि सिचि ह्वश्च' [३।१।५२] इतिच्लेरङि 'आतो लोप इटि च' [६।४।६४] इत्याकारलोपे अह्वदिति रूपम् । अव ससृज्यादिति । [६४-५] सृजेर्लिङि शपः श्लौद्विर्वचने यासुटि ससृज्यादिति रूपम् । ॥१३॥

अव ते हेळः ॥ छान्दसश्चङिति । [६४-११] अन्य विमोचन-प्रतिहर्षयोरित्यतो लुङि सिपि प्यन्तत्वाभावेन छान्दसेश्चङादेशे अभ्यासाकारस्य इत्वे अडभावे सिपो रुत्वे विसर्गे शिश्रथ इति रूप-मिति भावः । असुशब्दोपपदात् रमेरौणादिकेडप्रत्यये असुरेति रूपम् ॥१४॥

उदुत्तमम् ॥ मिश्रं पापमिति । [६४-१६] स्वफल भोगावसरे पुण्यफलभोगावकाशदं पापं मिश्रमित्युच्यते । एतेन संसार दशायां विद्यमानपुण्यपापमात्रस्य मिश्रत्वाद्विभागेनोक्तिरयुक्तेतिपरास्तम् विवक्षाभेदेन विभागसंभवात् । परेश इत्यादिनेति । [६४-१८] "आदित्योऽसावादिसंस्थः परेशो वारीशान्तः संस्थितः स्तूयतेऽग्रे" त्यनेनोक्तं ईश्वरस्यैव ऋग्भिशेषप्रतिपाद्यत्वमित्यर्थः । "पतिः सोमो वरुणस्ये"त्याधाचार्योक्तेः प्रयोजनमाह । अत्र सोमो वरुणस्येति

[६४-२०] यस्मात् सोमो वरुणस्य पतिरित्युक्त्या " विचाकशच्चन्द्रमा नक्तमेती" ति वर्णनयोग्यमिति लभ्यते । तस्मादिदमुक्तमित्यर्थः । एवमुत्तरत्राप्येपेक्षितपदाध्याहारेण योजना द्रष्टव्या । ॥ १५ ॥ १५ ॥

यच्चित् । वैदिको [ऽय] धातुरिति । [६५-१] । धातुपाठे मीञ् हिंसायामिति पठ्यते अय च तद्भिन्नः वैदिको ह्रस्वो धातुरित्यर्थः । मिधातोः श्नाप्रत्यये " ईहल्यघोः " [६।४।११३] । इतीत्व 'इदतो मसि' [७।१।४६] इति मस्प्रत्ययेस्येदन्तत्वे मिनीमसीति रूपम् । ॥ १ ॥

मानो वधाय ॥ हत्नव इति । (६५-१) । हन्तेः क्त्नुप्रत्यये अनुदात्तोपदेश (६।४।३७) इति नकारलोपे चतुर्थ्यैकवचने हत्नव इति रूपम् । जिहीळानस्येति । [६५-२] । हिळतेः श्नानाचि श्लौ द्विर्वचने छान्दसे धातोदीर्घे षष्ठ्यैकवचने जिहीळानस्येतिरूपम् । जहातेर्वेति । (६५-३) ओहाक् इत्यस्मात् लटः श्नानाचि श्लौ धातोरीकारादेशे द्वित्वे अभ्यासस्य ह्रस्वत्वे लुगागमे षष्ठ्यैकवचने जिहीळानस्येतिरूपम् । मा रीरध इति ॥ [६५-३] । राध संसिद्धावित्यतो णिजन्तात् माङ्योगात् लोडर्थे लुङि ' जिभि (३।१।४८) इति च्लेरङि ' णौचङ्युपधाया ह्रस्व (७।४।१) इति ह्रस्वत्वे द्वित्वादौ (सन्वल्लघुनि [७।४।१३] । इति सन्वद्भावे " सन्यतः " [७।४।७९] इतीत्वे) ' दीर्घो लघोः ' [७।४।९४] । इति अभ्यासस्य दीर्घे च मा रीरध इति रूपम् । व्यत्ययेनेति [६५-४] हधातोः लटः श्नानाचि श्नाप्रत्यये हृणानस्येति रूपम् ॥२॥

विमृळीकाय ॥ सीमहीति । [६५-५] षिञः महिङि छन्दसे विकरणाभावे धातोदीर्घे टेरेत्वाभावे च सीमहीति रूपम् ।

रथीरिति । [६५-६] रथशब्दात् अस्यास्तीत्यर्थे इनिप्रत्यये नकारस्येकारे सवर्णदीर्घे सो रुत्वे तस्य विसर्गे च रथीरिति रूपम् । भावेप्रत्यय इति । [६५-८-९] ईकक्प्रत्यय इत्यर्थः (मूलीकाय) ॥३॥

परा हि ॥ वस्यसश्शब्द इति । [६५-१०] वस आच्छादन इत्यस्मात् औणादिके यसुप्रत्यये वस्यस् शब्दः सकारान्त इति बोध्यम् पतन्तीति । [६५-११] पतन्तीति हेतोरहं आत्यन्तिक-सुखासाधने तत्साधनत्वभ्रमवानित्यर्थः । दूरत इति । [६५-१४] दूरत्वाभिमित्वात् न विपतन्तीत्यर्थः ॥ ४ ॥

कदा ॥ करामह इति । [६५-१८] कृञ् कृतावित्य-स्माद्धौवादिकात् शप्रत्यये गुणे महिङि टेरेत्वे करामहे इति रूपम् । ॥ ५ ॥ १६ ॥

तदित् । वेनन्ताविति । [६५-१९] वेनधातोः शतृप्रत्यये प्रथमाद्विवचने नुमि च वेनन्ताविति । विभ्रष्टमिति शेष इति । [६५-२२] कुरुत इति भाष्ये विभ्रष्टमिति शेष इत्यर्थः । ऋचि तु प्रयच्छत इत्यनेनैव तस्यार्थस्य लाभात् ॥६॥

वेदायः ॥ विवक्षाभेदेनेति । [६५-२५] ' विवक्षातः कारकाणि भवन्ति ' इत्युक्तेः विवक्षावशादधिकरणस्य च करणत्व-मिति भावः । समुद्रिय इति रूपसिद्धिं स्फोरयितुं सूत्रमुदाहरति । समुद्राभ्रादिति । [६५-२६] 'समुद्राभ्रादुघः' [४।४।११८] इत्येव पाठः । समुद्राभ्रादुघन् इति पाठस्तु प्रामादिकः । समुद्राभ्रादुघन इति सूत्रस्यादर्शनात् । समुद्रशब्दात् 'समुद्राभ्रादुघ' [४।४।११८] । इति घप्रत्यये आयनेयी... [७।१।२] इति सूत्रेण इयादेशे समुद्रिय

ऽति रूपम् । तदिति पूर्वेणसंबन्ध इति । [६६-१] । तदिन्स मानमासात इतिपूर्वेणतच्छब्देन सबन्ध इत्यर्थः ॥७।

वेद मासः ॥ पत्रादय' पृथक्शब्दा इत्येके मन्यन्ते तन्मतानुसारेणाह । मासशब्देति । [६६-४] । एतेन—पद्दन'. [६।१।६३] इति सूत्रेणमासशब्दस्य मासूइत्यादेशनिधानात् पर्यायत्वकथनमयुक्तमिति—परास्तम् ॥ ८ ॥

वेद वातस्य ॥ पदान्यध्यासत इति । [६६-१२] अत्र ' अधिशीङ्स्थासाकर्म ' [१।४।४६] । इति आधारस्य कर्मसञ्ज्ञायां पदानीति द्वितीयोपपन्ना ॥ ९ ॥

निषसाद ॥ पस्त्यासुप्रजास्विति । [६६-१३] पस्त्याशब्दस्य प्रजासु बहुल प्रयोगादितिभावः ॥ १० ॥ १७ ॥

अतो विश्वानि ॥ चिकित्वानिति । [६६-१५] सितधातोः लिटः कसवादेशे द्वित्वेचनादौ " उगितश्चाम् " [७।१।७०] इति नुमि चिकित्वानिति प्रथमैकवचने रूपम् ॥ १ ।

सनः ॥ विश्वाहेति । [६६।१७] । विश्वानि च तान्यहानि चेति समासे ' राजाह' सखिभ्यष्टच् " [५।४।९५] । इति टचि ' अह्नष्टखोरेव ' . ६।४।१४५] इति टिलोपे सुपा सुलुक् [७।१.३१] इति शस. आकारादेशे विश्वाहेति रूपम् । कर्दिति । [६६-१८। कृञो लेटि तिपि इतो लोपे लोटो 'लेटोऽडाटौ [३।४।९४] इति अडागमे गुणे च करदिति रूपम् । तारिषदिति । [६६-१८] तरतेः लेट् ' सिब्बहुल लेटि ' [३।१।३४]। इति सिपि इडागमे " सिब्बहुल णिश्चिश्च्यम् (च्य')' [वार्तिकं, सू०

३।४।९४] इति णित्वाद्वृद्धौ तारिषदिति रूपम् । इदं प्रार्थनमिति । [६६-१८] मुक्तौ मुख्यतः सफलम् । अन्यत्र तु सफलमात्रमिति भावः ॥ १२ ॥

बिभ्रत् ॥ " दाण्डिनायन [६।४।१७४] इति सूत्रे हिरण्मयेति निपातनात् कथं हिरण्ययेतीत्यत आह । निपातनादिति । [६६-२०] ' ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि ' [६।४।१७५] इति छन्दसि निपातनादयं प्रयोगः साधुरिति भावः । ननु भृज्रः यदि श्नपः श्लुः तदा अभिभरिति भवेत् यदि शप् तदा द्विर्वचनं नस्यादित्यत आह । विकरणव्यत्यास इति । (६६-२१) शविकरणत्व द्विर्वचनं च छान्दसमित्यर्थः । भृज्रः लडि तिपि इकारलोपे शविकरणे छान्दसे द्विर्वचने अभ्यासेत्वे गुणाभावे च बिभ्रदिति रूपम् । वचनेति । [६६-२१] । तिपो व्यत्यासेन शिप्रत्यये श्लौ द्विर्वचने " सर्वे विधयश्छन्दसि विकल्प्यन्ते " इति वचनात् ' सिजभ्यस्तविदिभ्यश्च ' इतिजुसादेशाभावे ' अदभ्यस्तात् ' [७।१।४] इति अदादेशे 'भृज्रामित्' [७।४।७६] इति अभ्यासेत्वे बिभ्रदिति रूपम् । ' वचनव्यत्यासो वेति ' वाक्यं प्रक्षिप्तम् । मूलकोशेष्वदर्शनादिति विद्याधीशस्वामिन आहुरिति संप्रदायविदः । अबिभरिति [६६-२१] मूलस्तिपि इतोलोपे श्लौद्विर्वचने अडागमे धातोर्गुणे ' हल् ङ्याब्.. ' [६।१।६८] इति तिलोपेऽबिभरिति रूपम् । ॥ १३ ॥

न यम् ॥ दिप्सन्तीति । [६७-१] दम्भेःसनि द्वित्वे झिप्रत्यये अन्तादेशे ' दम्भ इच्च ' [७।४।५६] इति इकारे अत्र लोपोऽभ्यासस्य [७।४।५८] इति अभ्यासलोपे ' अनिदितां . ' [६।४।२४] इति धातुनकारलोपे चर्त्वे दिप्सन्तीति रूपम् ।

पूर्वेण परेणवेति । [६७-४] त वरुण परितोनिषेदिर इति पूर्वेण वा त सर्वज्ञमदर्शमित्युत्तरेण वा सबन्ध इत्यर्थः ॥ १४ ॥

उतयः ॥ आद्यश्चशब्द इति 'असम च यच्चक्र' इति भाष्यस्थ चशब्द इत्यर्थः ॥ १५ ॥ १८ ॥

परा मे ॥ विनापि शेष योजनामाह । तमेवेच्छन्त्य इति । [६७।१०।१६] ॥ १६ ॥

संनुवोचावहै ॥ वोचावहै इति । [६७-१३] वचेर्लेटो वस्मादेशे "आडुत्तमस्य पिच्च" [३।४।९२] इत्याडागमे । 'एतऐ' [३।४।९३] इत्यैकारादेशे अदादित्वात् शपो लुकि छान्दसे उमागमे वोचावहै इति रूपम् । ॥ १७ ॥

दर्शं नु ॥ दर्शमिति । [६७-१४] दृशेर्लुङि 'इरितो वा' [२।४।७७] इतिच्लेरङादेशे 'अ दृशोऽङि गुण' [७।४।१६] । इति गुणे छान्दसे अडभावे मिपो मादेशे दर्शमिति रूपम् अद्राक्षमिति । [६७-१४] दृशेर्लुङि च्लेः सिचि 'सृजि दृशोर्झल्यमकिति' [६।१।५८] इत्यमागमे यणादेशे "वद व्रज [७।२।३] इति वृद्धौ" व्रश्च [८।२।३६] इति षत्वे "षढो क. सि [८।२।४१] इति कत्वे" "आदेशप्रत्यययोः" [८।३।५९] इति सिच. षत्वे मिपोऽमादेशे अडागमे अद्राक्षमिति रूपम्। क्षमामधिकृत्येति । [६७-१४] इतः परं टीकायां श्रूयमाण 'तृतीयोऽतिशये' [६७-१४] इति वाक्य प्रक्षिप्तम् । न टीकावाक्यम् । अवश्य चैतदेवं विज्ञेयम् । अधिक्षमीत्यनयोर्मिलितपदत्वेनाव्ययीभावसमासाभावात् "अव्ययीभावश्च" [२।४।१८] । इति नपुंसकत्वाभावेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य' [१।२।४७] । इति ह्रस्वत्वाभावात् इकारस्य

तृतीयत्वाभावेन 'तृतीयोऽतिशय' इत्युक्त्ययोगात्। क्षमामित्याकारस्य छान्दस इकारे "सुपांसुलुक्" [२७।१।३९] इति अमो लुकि क्षमीति रूपम्। जुषतेति। [६७-१५] परस्मैपदं मध्यमपुरुषो बहुवचनं चेतित्रयं छान्दसमितिद्रष्टव्यम्। जुषत इति भाष्येतु परस्मैपदमात्रं छान्दसमित्यूह्यम् ॥ १८ ॥

इमं मे॥ क्यजन्तस्येति। [६७-१६] अवस्शब्दात् "सुप आत्मनः क्यच्" [३।१।८] इति क्यचि 'क्याच्छन्दसि' [३।२।१७०] इति उप्रत्यये अतो लोपे अवस्युरिति रूपम्। आचके इति। [६७-१७] आङ्पूर्वात् चकेर्लट इटि 'टित आत्मनेपदानां टेरे' [३।४।७९] इति एत्वे आचक इति रूपम् ॥१९॥

त्वं विश्वस्य॥ मत्वर्थे इर इति। [६७-१७] मेधाशब्दाकारलोपश्चेति शेषः। आकारलोप इति। [६७-१८] ग्माशब्दाकारलोप इत्यर्थः। राजसि। [६७-१९]। राजा भवसि। क्षोभमानत्वं राज्ञोऽसाधारणोधर्म इति भावः। एवमुत्तरत्रापि द्रष्टव्यम् ॥२०॥

उद्वृत्तमम्॥ एतेन-पुण्यादीनामेव सुहृदः साधु कृत्यामित्यादिना दानस्य प्रमाणसिद्धत्वात् सत्वादिगुणानां दानाभिधानमयुक्तमितिपरास्तम्। अवपूर्वात् वृती हिंसाग्रन्थनयोरितिधातोः तुदादौ पठितात् लेटि शे सिपो हित्वे "अतो हेः" [६।४।१०५] इति लुकि, अवचृतेति रूपम्। ॥ २१ ॥ १९ ॥ ६ ॥

वसिष्व॥ वसिष्वेति ऋचः 'सर्वं देवानां पूजायै प्रोद्यतो भावनि' [भा २१-११] त्यादिकं व्याख्यानमित्यभिप्रेत्य भाष्यं

१, २ अत्र ग्रन्थपातः।

३ अत्र ग्रन्थपातोऽस्ति कलारीयंवृष्ट्वा पूरितम्।

प्रतीकत उपादत्ते । सर्वदेवानामिति । [६७-२४] अनेन भाष्य-स्थाग्निगतेन रूपेण सर्वं देवानां पूजायै प्रोद्यतो भवान् त्वमुत्तमवस्त्राणि वसिष्वेति योजनामभिप्रैतीति द्रष्टव्यम् सर्वं देवानां पूजायै प्रोद्यतो भवान् शुनःशेपः अग्निनामान स्तौतीति भाष्ययोजनान्तरमभिप्रेत्याह । यद्वेति । [६७-२४] मेध्येति भवितव्ये यत् मियेध्येति अधिक शब्दरूप तस्यार्थमाह । नित्यमेध्येति । [६७-२४] स्वस्मै नो अध्वर य नेति भवितव्य कथ स्वस्मिन्निर्तात्यत आह । संप्रदानस्येति । [६८-४] अधिकरणत्वविवक्षा कृतेति शेषः । ननु नो अध्वरमिति प्रकृतिभावो न युक्तः प्रापकाभावादित्यत आह । नो अध्वर-मितीति । [६८-४] अनुकरणस्य अनुकार्याधीनत्वात् प्रकृति-भाव' । पूर्वं स्वस्मिन्नो अध्वर यजेत्येतत् अस्मदीय मखं यजेति स्ववाक्यविषरणमिति व्याख्यातम् । इदानीं तच्चेद च मिलित्वा एकमेव वाक्यमिति भावेनाह । यद्वेति । [६८-५] ॥ १ ॥

निनो होता ॥ तनोतेर्डमत्वाविति । [६८-७] दिवीति सप्तम्यन्तोपपदात् तनोतेर्डप्रत्यये सप्तम्या अलुकि दिवित्मतीति रूपम् । ॥ २ ॥

आहिष्मा ॥ कर्मणीकार इति । [६८-१२] आप्लृ व्याप्ता-वित्यतः कर्मणि इकारप्रत्यये आपिरिति रूपम् । ॥ ३ ॥

आनः ॥ सीदन्त्विति । [६८-१४] । षद्लृविशरणगत्यव-सादनेष्विति धातो' लोटि शेरिकारस्य उत्वे झप्रत्यये 'प्राघ्राध्मा' [७।३।७८] इति सीदादेशे शेरन्तादेशे सीदन्त्विति रूपम् । मनुष इति । [६८-१४] मनेरसि प्रत्यये जसि च मनुषः इति रूपम् । ॥ ४ ॥

पूर्व्य होतः ॥ मन्दस्वेति । [६८-१५] हर्षार्थान्मदेर्लोटि शपिधासः से आदेशे सवाभ्यां वामौ [३।४।९१] । इति एकारस्य-वत्वे नुमागमे मन्दस्वेति रूपम् । ॥ ५ ॥ ॥ २० ॥

यच्चित ॥ शश्वतेति । [६८-१८] शश्वच्छब्दादाकारागमे शाश्वतेति । छान्दसं रूपम् । तनेति । [६८-१८] तनोतेः पचाद्यचि सप्तमीबहुवचनस्य आकारादेशः ततश्च तनेति । रूपम् । सर्वे वयं यजमाना इति । [६८-१९] सर्वेषु देशेषु कालेषु वर्तमानाः सर्वे वयं यजमानाः यँदा देवान् यजामह इत्यन्वयो बोध्यः । एतेन कालवाचकेन शश्वतेत्यनेन गतार्थत्वात् यदेत्यर्थकं यदिति पदं व्यर्थमिति-परास्तम् । ॥ ६ ॥

प्रियोनः ॥ असामेति । [६८-२१] अस्तेर्लोङुत्तमपुरुषे मसि शपो लुकि ' आडुत्तमस्य पिच्च ' [३।४।९२] इत्याडागमे लोटो लङ्वाङ्भावेन सलोपे असामेति रूपम् । ॥ ७ ॥

स्वमयः ॥ मनामह इति । [६८-२२] मन्यतेर्विकरणव्यत्ययेन शपि मनामह इति रूपम् ॥ ८ ॥

अथानः प्रशास्तय इति । [६८-२४] प्रपूर्वात् शंसुकथन इत्यतः क्तिनि " अनिदितां " [६।४।२४] इति नलोपे जासि प्रशास्तयः इति रूपम् । ॥ ९ ॥

विश्वेभिः ॥ धा इति [६९-१] धात्वः लोडर्थे लुङि ' गातिस्था.. ' [३।१।५७] इति सिचो लुकि अङभावे धा इति रूपम् ।

श्रुतिरिति । [६९-३] सहश्चन्दस्य वायुवाचित्वे प्रमाणमिति शेषः । पठित इति । अतोऽपत्यवाची यहुश्चन्द इति शेषः ॥ १० ॥ २१ ॥ ७॥

अश्व न त्वा ॥ उत्तमपुरुषार्थे ध्याइति ॥ [६-९-६] वदेः छान्दसत्वाद्ध्यैप्रत्यये धातोर्नुमागमे वन्दध्या इति रूपम् । यद्धेति । [६९-६] वदेः अध्यैप्रत्यये नुमागमे वन्दध्या इति रूपमिति भावः । अश्वं त्वामिवेति तस्यैव दृष्टान्तत्वोक्तेः प्रयोजनमाह । नहीति । [६९-६] हि यस्मात् अन्यमश्वमिवत्वां स्तोतुं नोचित तस्मात् अश्वं त्वामिव वाखन्तं त्वां वन्दध्यै इति पूर्वेण सबन्धः । ॥१॥

सधानाः ॥ भाष्ये सुशेवकृदिति प्रतिबिम्बव्याख्यातम् । सुखकृदिति स्वपदविवरणमिति भावेन सुशेवकृदित्यस्य व्याख्येय पदमुपादाय भाष्यस्य तद्व्याख्यानत्वसिद्धये विग्रहमाह । सुशेव इत्यादिना । [६९-८] एतेन-श्रुतौ सुशेवकृदिति पदाभावात् सुशेवकृदित्यनूद्य व्याख्यानमनुपपन्नमिति-परास्तम् । छान्दसमिति । [६९-९] उपलक्षणमेतत् । आशीर्लिङ् व्यत्ययश्च छान्दस इति द्रष्टव्यम् । प्रार्थनालिङो भाव्यत्वात् । कथं विष्णोरिति । [६९-१०] पूर्वमुक्तं वायुसूनुत्वमिदानीमुच्यमान ऋषिसूनुत्व च कथमित्यर्थः ॥२॥

स नः ॥ सच वीप्सायामिति । [६९-१३] । प्रतेर्वीप्सायां कर्मप्रवचनीयत्वात् तद्युक्तसदःशब्दे द्विर्वचनं, द्वाभ्यामपि सदःशब्दाभ्यां प्रतेर्योगः । अन्यथा एकत्रैव द्वितीया स्यादपरत्र न स्यादिति सूचयितु भाष्ये प्रति प्रति सद इति प्रतिशब्दोद्विरुच्चारित इति द्रष्टव्यम् । एतेन-नानाभूतार्थवाचिनां यानि वाच्यानि तेषां गुणक्रियाभ्यां

व्याप्तीच्छा वीप्सा तस्यां विहितं द्विर्वचनं ग्रामो ग्रामो रमणीय इत्यादौ ग्रामादीनामेव वीप्साविषयत्वेन ग्रामादिशब्द एव द्विरुक्तमिति इहापि सदः शब्दवाच्येष्वेव सदःस्वप्रयोक्तुः रक्षणक्रियया व्याप्तुमिच्छासद्भावेन इच्छाविषयवाचकसदःशब्द एव द्विर्वचनस्यभाव्यत्वेन भाष्यकारीयं प्रतिशब्दद्विर्वचनमनुपपन्नमिति परास्तम् । इच्छुन्दोवेति । [६९-१३] अस्मिन्पक्षेसदमितिद्वितीया छन्दस्त्वाद्वा अघार्थायो-रिति । [६९-१५] अनेन अघाय आयुर्यस्येति व्यधिकरण-बहुव्रीहिरिति सूचितमिति बोध्यम् । समानाधिकरणएव बहुव्रीहिरिति भावेनाह । यद्वेति । [६९-१५] गमनमिति । [६९-१५] अयधातोर्गत्यर्थत्वात् गमनमायुश्शब्दवाच्यमित्यर्थः । गमनस्यायुश्श-ब्दार्थत्वं व्युत्पाद्य बहुव्रीहेः सामानाधिकरण्यसिद्ध्यर्थं गमनस्याघशब्द-वाच्यत्वमप्याह । तादर्थ्यादिति । [६९-१५] अघार्थत्वात् गमनस्याघशब्दवाच्यत्वमित्यर्थः । अनेननाघमायुर्यस्येति समानाधिक-रणो बहुव्रीहिः सूचित इतिभावः । (अत्र ग्रंथपातोवर्तते) । ॥३॥१४॥ वसुशब्दात् ङसि ' इकोऽचि विभक्तौ ' [७।१।७३] इति नुमागमशासनस्यानित्यत्वादप्रवृत्तेः ' धेर्ङिति ' [७।३।१११] इति गुणस्य संज्ञापूर्वकविधेरनित्यत्वेनाभावात् यणादेशे वस्व इति रूपम् । आतो नुपसर्गेक इति । [६९-२४] नेदं कप्रत्यय विधायकसूत्रोदाहरण अन्तमस्येत्यस्य कर्मोपपदत्वाभावात् । किं तु ' सुपिस्थः ' [३।२।४] इति सूत्रे योगविभागेनोक्तस्य सुपि उपपदे आदन्तात् कप्रत्ययस्य स्फोरकं स्ववाक्यमित्यूह्यम् । ॥५॥ ॥२२॥

विभक्तासि ॥ क्षरसीति । [६९-२६] दानार्थात् क्षरतेः क्षपि सिपि क्षरसीति रूपम् । ॥ ६ ॥

यमभे ॥ अवा इति । [७०-२] । अवतेर्लोटः सिपि इतो लोपे 'लेटोऽडाटौ' [३।४।९४] इत्याडागमेरुन्धे निसर्गे च **अवाः** इति रूपम् । **जुनगताविति** । [७०-२] अस्माल्लेटः सिपि इतो लोपे आडागमे च **जुनाः** इति रूपम् । ॥७॥

न किरस्य ॥ मुमागम इति । [७०-६] सलोपश्चेत्यपि ग्राह्यम् । **नेत्रास्तीति** । [७०-८] अस्मिन्नो न भवतीत्यर्थः । लोकेहि स्वाश्रितेभ्यः प्रभुणा प्रतिदिनं दीयमान नान्त्य स्वल्पत्वात् । किं तु श्रवणीय बहुलं चित्त दीयते चत् तद्धितमन्य भवति । तत्प्राप्य नन्तरमाश्रिता ग्रहं विहाय स्वदेशं गच्छन्तीति दर्शनात् । प्रकृते च श्रवणीयं बहुल त्वया दीयमानमपि मत्तुस्यान्तिम दान न भवतीति माव. । **दित्ससीति** । [७०-९] दान स्वार्थे सनि सिपि ङित्व 'अत्रलोपोऽभ्यासस्य' [७।४।५८] इति अभ्यासलोपे 'सनि मीमाघुरभलभरायकपतपदामच इस्' [७।४।४१] इति अकारान्तस्य इसादेशे सःस्यार्धधातुके' [७।४।४१] इति सकारस्य तकारे **दित्ससीति** रूपम् । ॥८॥

स वाजम् ॥ तरुतोति । [७०-१२] तरतेस्तृन्प्रत्यये इडागमेगुणे 'ग्रामितस्कमितस्तमितोत्तमितचत्तावित्कस्तावित्रुस्तृशास्तृतरुत्वतरूतवरुत्वरुत्वरुत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च' [७।२।३४] इति सूत्रेण तरुत् इत्यस्य निपातनात् इकारस्योकारादेशे **तरुतोति** रूपम् । **वाजं तरुतोति** । [७०-१२] " न लोकाव्यय " [२।३।६९] इति षष्ठीनिषेधात् कर्मणि वाजमिति द्वितीयेतिभाव. । ॥ ९ ॥

जराबोध ॥ विविक्षीति । [७०-१९] विपूर्वात् विदे. लाटः सिपो ङित्वे शपोलुकि 'हुझल्भ्योहेर्धि.' [६।४।१०१] इति हुर्धीन्यादेशे छान्दसे धकारस्य ढकारे हुत्वे **विविक्षीति** रूपम् । ॥१०॥ ॥२३॥

सनः ॥ यद्यपीति । [७०-२६] नीतिशब्दो मानमित्यनेन समस्त इति मातीत्यर्थः । सामर्थ्यात् । [७१-१] नञ् विशेषेण बोधकत्वसामर्थ्यादित्यर्थः । अत्र न विद्यते नितरां मानो यस्येति-नविग्रहः । किंतु नितरां न विद्यते मानो यस्येति विग्रहः । नीत्यस्य परनिपातः छान्दस इति भावः । च शब्द इति [७१-३] 'पुरुस्तुखश्च स' इति भाष्यस्थः चशब्द इत्यर्थः । तच्छील्येमइत्यस्मात सूत्रादिति । [७१-४] ताच्छील्येम इति महाव्याकरणसूत्रस्य ताच्छील्यविशिष्टे मप्रत्ययोभवतीत्यर्थ इति भावः । ॥११॥

स रेवान् ॥ विश्पतिरिवेति । [७१-७] यद्यपि रेवानिवेति एकमेव षाकल्यदृष्टं पदं तथापि रेवान् इवेति पदद्वयमपि भवति । एवं च इवशब्दस्य विश्पतिरित्यनेन संबन्ध इति भावेन भाष्यकृता विश्पतिर्यथेत्युक्तम् । तज्ज्ञापनाय टीकाकृता विश्पतिरेवेत्युक्तमिति बोध्यम् । ॥१२॥

नमः ॥ प्रकारभेदेनेति । [७१-१३] अवान्तरपित्रादिसंबन्धप्रसिद्धिशून्यत्वत्तत्प्रसिद्धिमत्त्वरूपप्रकारभेदेनेत्यर्थः। ओ व्रश्चूछेदनइत्यस्येदं रूपमिति । [७१-२०] वृश्चतेर्माङ्योगाल्लुङि व्यत्ययेनोत्तमपुरुषैकवचने इटि ष्लेः सिचि उदित्वेन वेट्त्वादिडभावे काश्लोपे 'व्रश्चेति' चस्य षत्वे' "षढोः कः सि" [८।२।४१] इति कत्वे 'आदेशप्रत्ययोः' [८।३।५९] इति सिचः षत्वे संप्रसारणे वृक्षीति रूपम् ॥१३॥ ॥२४॥ ॥८॥

यत्र ग्रावा ॥ उभयत्रापीति । [७२-३] जरगुरइत्यत्रापीत्यर्थः ॥ ।

यत्र द्वाविव ॥ द्वौ जघनाविवेति । [७२-७] यद्यपि द्वाविवेति शाकल्यदृष्टमेकमेव पदम् । तथापि पदद्वयमपि भवतीत्यभिप्रेत्य जघनाविवेति व्याख्यातमिति द्रष्टव्यम् ॥२॥

यत्र नारी ॥ उलूखल इति वक्तव्यइति । [७२-१३-१४] अध्यात्मं उलूखलशब्दवाच्यस्य दर्शनीयत्वात् देहः उलूखल इति वक्तव्य इत्यर्थः । बहोरिति । [७२-१४] परव्याख्याने ऊर्ध्वशब्दोकारस्य ह्रस्वादेशः ध्वशब्दस्य लुप्तभावः खशब्दस्य लगागम इति बहोरलाक्षणिकस्य कार्यस्याङ्गीकार्यत्वं प्रसज्यत इति भावः । अन्यथेति । [७२-१५] (अर्थशब्दस्येति) अर्थशब्दाध्याहारामाव इत्यर्थः । नन्वोष्ठशब्दस्य पुल्लिङ्गत्वादोष्ठमिति भाष्येप्रयोगः कथमित्यत आह । अर्धर्चादित्वादिति । [७२-१६-१७] ॥३॥

यत्र मन्याम् ॥ श्रौतं मन्यामिति पदमुपलक्षणमिति भावेन भाष्यकृता अस्वरश्रुतीत्युक्तमित्याह । यथावेति । ॥४॥

यच्चिद्धि ॥ औलूखल्याविति । [७२-१९] उलूखलशब्दात् देवतार्थे अणि स्त्रीपि द्विवचने यणादेशे च औलूखल्याविति रूपम् । दुन्दुभिवदिति । [७२-२१] यद्यपि शाकल्यदृष्टं जयतामिक्येकं पदं तथापि पदद्वयमपि भवतीत्यभिप्रेत्य दुन्दुभिवदिति व्याख्यातमिति द्रष्टव्यम् । वनस्पते इत्येतदिति । (७२-२३) उलूखलस्य वनस्पते इति संबोधनमुपपादितं भवतीत्यर्थः । तेन वनस्पती इत्यपीति । (७२-२६) तानो अद्य वनस्पतीइत्युक्तत्रापि वनस्पती इति द्विवचनं सोमक्रयमात्रविषयमिति व्याख्यातं भवतीत्यर्थः ॥५॥२५॥

उतस्म ते ॥ एतद्घटनार्थं चेति । (७३-४) ते अग्रमित् इत्येतद्घटनार्थं उलूखलदेवस्य वृक्षदेवत्वमुक्तम् । ततश्च त्वदमिमत-

वृद्धाग्रे वायुर्वातीत्यर्थो लभ्यत इति भावः। कर्मण्यकार इति। (७३-५) पारस्करादित्वात्सुडित्यपि द्रष्टव्यम्। ॥६॥

आयजी ॥ वाजसेति रूपसिद्धिं स्मारयति। जन सनेति (७३-९) वाजशब्दोपपदात् षण् लाभ इत्यस्मात् विट्प्रत्यये तस्य सर्वापहारिलोपे 'विड्वनोरनुनासिकस्यात्' (६-४-४१) इति नकारस्यात्वे सवर्णदीर्घे वाजसेति रूपमिति ज्ञेयम्। बहुलग्रहणादिति (७३-११) 'व्यत्ययो बहुलम्' (३-१-८५) इत्यत्र बहुलग्रहणात् विकरणस्य श्नकारादेशेऽक्ते विजभृत इति रूपमिति भावः ॥७॥

ता नः ॥ सुतमिति। (७३-१५) विकरणस्य श्नुप्रत्ययस्य छान्दसे लोपे सुतमिति रूपम्। ॥८॥

उच्छिष्टम् ॥ अधित्वचीस्य त्वच उपरीत्यर्थे उक्तचर्मण उपरीत्यर्थो लभ्यत इति मावेनाह। चर्मण उपरीति। (७३-१९) यद्यपीति (७३-२०) अत्र अस्यां ऋचि। एतमिति द्रोणोपरीति च नास्तीति [७३-२०] सोमं पवित्रे आसृजेत्येव व्याख्यानं कर्तव्यमिति भावः। सोमस्य देवतात्वं ब्राह्मणवाक्यपर्यालोचनयापि सिद्धमित्याह। तेनापीति (७३-२१) उपलक्षणमेतदिति। (७३-२२) मरेत्यात्मानमेवाहेति भाष्यस्थं मरेति पदमुपलक्षणम्। आसृज निधेहीत्यपि ग्राह्यम्। ततश्च मरेत्यात्मनमेवाह। आसृजेत्यात्मानमेवाह निधेहीत्यात्मानमेवाहेति भाष्ययोजनेति भावः। आत्मनमाहेति कुतः कल्प्यत इत्यत आह अन्यस्योति। (७३-२२) संबोध्यस्येति शेषः स्थित इति शेष इति [७३-२५] एतेष्वाधारेषुस्थिते विष्णावि मनो धार्यमिति भाष्ययोजनेति भावः। अस्मिन्पक्ष इति।

[७३-२५] अध्यात्मपक्षे ऋजीषाभावात् सोमनिभेहीत्येवश्रुतियोजनेति भावः। वेदतुल्यत्वमिति। [७३-२६] यत्सोममिन्द्रविष्णवीति वेति प्रयोगदर्शनादिति भावः ॥९॥२६॥ ॥ ९ ॥

यच्चिद्धि सत्य ॥ अनाशस्ता इवेति [७४-२] इवशब्दप्रयोगस्य प्रयोजनमाह अत्यन्ताप्रशस्तानिति। [७४-२] अप्रशस्तेन्द्रियादिमतः समीयोग्यान् ईश्वरोऽपि प्रशस्तेन्द्रियादिमतः करोतीति हेतोः स्वस्य तमोयोग्यत्वं वारयितुं इवशब्दः प्रयुक्त इति भावः ॥१॥

शिप्रिन् ॥ शचीवारिति। [७४-६] शचीशब्दात् मत्वा 'छन्दसीरः' [८-२-१५] इति मस्यवत्वे 'मतु वसोः' [८-३-१] इति रुत्वे विसर्गे च शचीवरिति रूपम् ॥२॥

निष्वापय ॥ सस्तामिति। (७४-९) वसः लोटस्तस स्तामादेशे अदादित्वात् शपो लुकि सस्तामिति रूपम् ॥ ३ ॥

ससन्तु ॥ ननु अरातिशब्दस्य पुल्लिङ्गत्वात् कथं तद्विशेषणस्त्या इत्यस्य स्त्रीलिङ्गत्वमित्यत आह। व्यत्ययेनेति। (७४-१०) त्या इत्यस्य स्त्रीलिङ्गत्वं व्यत्ययेनेत्यर्थः। त्या इति न लिङ्गव्यत्ययेन किं तु स्त्र्यर्थवाचकत्वात् न्यायप्राप्तमेव स्त्रीत्वमित्याशयेनाह। स्वार्थमेव वेति। (७४-१२) एतस्य स्त्रीलिङ्गत्वं न्यायप्राप्तमेवेत्यत्र भाष्यकारसमतिमाह। इति ज्ञापनायेति। (७४-१२) अस्मिन्पक्षे अरात्यः त्याः प्रसिद्धाः प्रजाः ससन्तु इति ऋग्योजना द्रष्टव्या ॥४॥

सामिन्द्र ॥ मृणोति। (७४-१४) मृण हिंसायामित्यस्मात् लोटि शप्रत्यये लोटः सेर्हि इत्यादेशे 'अतो हेः' (६।४।१०५) इति हेर्लुकि मृणोति रूपम् ॥ ५ ॥

पतातीति ॥ अन्तर्णीतेति । [७४-१९] पतेरन्तर्णीत-ण्यर्थाल्लेटि तिपि लेट आडागमे इतो लोपाग्रवृत्तौ पतातीति रूपम् । वनमित्युच्यते इति । [७४-२०] वनतेः कर्तर्यकारप्रत्यये वनमिति रूपम् । ननु तम एव कुण्ड्रृणाचीत्युच्यत इत्येव वक्तव्यम् । उल्बणा वेदनेति किमर्थमुक्तमित्यत आह । स्त्रीलिङ्गत्वेति । [७४-२१] कुण्ड्रृणाचीशब्दस्य स्त्रीलिङ्गत्वघटनाय उल्बणा वेदनेति स्त्रीलिङ्गविशेष्यमुक्तमित्यर्थः । अनेनैव तम एवोल्बणा वेदनेत्युच्यते सोल्बणा वेदना कुण्ड्रृणाचीति सप्रत्ययोक्तेति भाष्ययोजनाप्युक्ता भवति । अन्यथा संप्रोक्तमिति स्यात् । ऋकार उच्यत इति । [७४-२४] गौण्या वृत्त्येति शेषः । ॥ ६ ॥

सर्वं परिक्रोशम् ॥ परितः क्रोशो यस्मादिति विग्रहं मनसि निधायाह । परिक्रोशकरमिति । (७४-२५) ॥७॥ २७॥१०॥

आव इन्द्रम् ॥ वाजयन्त इति रूपसिद्धिं स्मारयति । तत्करोतीति । (७५-२) वाजशब्दात् तत्करोतीति णिचि टिलोपे वाजि इति रूपम् । ततो लटि तस्य शत्रादेशे गुणे अयादेशे जसि वाजयन्त इति रूपम् । अनेकव्यत्ययापत्तेरिति । (७५-४) परव्याख्याने बहुवचनं अहमित्यस्य व इत्यादेशश्चेत्यनेकव्यत्ययः । अस्मद्व्याख्याने तु आमन्त्रिताद्युदात्तत्वाभाव एक एव छान्दस इति अस्मद्व्याख्यानमेवादरणीयमिति भावः । करोतेः किविरिति । [७५-६] कृ इवि इति स्थिते यणादेशे द्वितीयैकवचने च किविरिति रूपम् । ॥१॥

शत वा ॥ पातालइवेति । (२५-१०) यथा पाताले न पूर्तिरेवमेवेत्यर्थः । नेत्युभयत्रेति । (७५-१०) क्रियया संबन्धो निषेधार्थः । निम्नशब्दसंबन्धस्तु इवार्थ इति भावः । ॥ २ ॥

संयन्मदाय ॥ संबन्धप्रकारमाह । सप्रकृतिकानीति । [७५-१६] ॥३॥

अयमुते॥ चशब्दादिति। [७५-१७] भाष्यकृताचशब्दात् प्रकृतिरिति शेषः सूचित इत्यर्थः । संप्रसारणं छान्दसमिति । [७५-१९] वहेःधासि तस्य से आदेशे शपि छान्दसे संप्रसारणे 'पुगन्तलघूपधस्य च' [७।३।८६] इति गुणे ओहस इति रूपम् । ॥ ४ ॥

स्तोत्रम् ॥ ह्रस्वश्छान्दस इति । [७५-२१] णीर्ह्रस्व इतिशेषः । लक्षणयोच्यत इति । [७५-२४] विभूतिशब्देन विभूतिप्रतिपादकत्वमादौ लक्ष्यते तत्राप्यनुपपत्तिदर्शनेन फलदानं लक्ष्यत इति लक्षितलक्षणयेत्यर्थः । ॥ ५ ॥ २८ ॥

ऊर्ध्वः ॥ ब्रवावहा इति । [७६-१] मुख्यव्यक्तायवाचीत्यतः लोटि तस्य वहीत्यादेशे टेरेत्वे तस्यैकारादेशे आडागमे गुणे अवादेशे ब्रवावहै इति रूपम् । ॥ ६ ॥

योगे योगे ॥ अन्तर्णीतोति [७६-१] मतुवर्थस्यान्तर्णीत्यादिनिप्रत्यस्याश्रवणमिति भावः । ॥ ७ ॥

आघ ॥ श्रवदिति । [७६-४] शृणोतेर्लिङर्थे लेटि तिपि तस्य 'इतश्च लोपः ' [३।४।९७] इति इकारलोपे 'लेटोऽडाटौ' [३।४।९४] इत्यडागमे गुणे अवादेशे श्रवदिति रूपम् । सहस्रीणीभिरिति [७६-४] सहस्रशब्दात् 'अत इति ठनौ' [५।२।११५] इति इनिप्रत्यये नान्तत्वात् ङीपि तृतीयाबहुवचने सहस्रीणीभिरिति रूपम् । गमदिति [७६-६] गमेर्लेटि तिपि इतो लोपे अडागमे गमदिति रूपम् ॥ ८ ॥

अनुप्रत्नस्य ॥ ततोमहानिति । [७६-८] । व्याख्यानमनुपपन्नमिति शेषः । असतीति । [७६-९] क्रियावचनादावसति कर्तृकर्मादिसहितां क्रियामाहुः । अतः प्रतीत्युपसर्गोऽपि क्रियावचनादेरभावात् सर्वान्वैरिणः प्रतितिष्ठतीति ससाधनां क्रियामाहेति भावः । ननु भाष्ये प्रतिप्रतिस्य इति वीप्सायांद्विर्वचनेन श्रौतप्रतिशब्दस्य कर्मप्रवचनीयसंज्ञायाअ [अन]ङ्गीकारात् कर्मप्रवचनसंज्ञाया उपसर्गसंज्ञयाबाधेन प्रतीत्यस्योपसर्गत्वाभावात् उपसर्गत्वमङ्गीकृत्य ससाधनक्रियावाचित्वं कथमुक्तमित्यत आह । द्विर्वचनंत्विति । [७६-९] भाष्यकारीयं प्रतिप्रतिस्य इति द्विर्वचनं श्रौतप्रतिशब्दाभिप्रायमात्रेण न तु प्रतीत्यस्य वीप्सार्थकत्वाभिप्रायेण ततः कर्मप्रवचनीयसंज्ञाभावेन प्रतीत्यस्योपसर्गत्वे बाधकाभावात् ससाधनक्रियावाचित्वं युक्तमेवेति भावः । हुवइति । [७६-११] ह्वेञःलिटि तदादेशप्रतिशब्दस्य णौ संप्रसारणे द्वित्वाभवे उवङादेशे च हुवे इति रूपम् ॥९॥

तं त्वा ॥ विंश्ववारेति । [७६-१२] विश्वशब्दोपपदात् वृञो घञि वृद्धौ विश्ववारेति रूपम् ॥१०॥२९॥

अस्माकम् ॥ ननुशिप्रणीनामित्यस्य स्त्रीलिङ्गत्वात्सुखिनामिति व्याख्यानमनुपपन्नमित्यत आह । स्त्रीलिङ्गव्यत्ययेनेति । [७६-१४] श्रुतौ लिङ्गव्यत्ययस्याङ्गीकारेणेत्यर्थः ॥११॥

तथा तत् ॥ उश्मसीति [७६-१६] वसेर्मसि श्नपोलुकि ' इदं तोमसि ' [७-१-४६] इति मस इकारान्तत्वे ' ग्रहिज्यावयिव्यधिवष्टि ' [६-१-१६] इति संप्रसारणे उश्मसीति रूपम् ॥१२॥

रेवतीः ॥ कुतः पशवो रेवत्य इत्यत आह । प्रोक्ता इति । [७६-१९] ' पशवो वै रेवत्य ' इत्यादौ रेवतीशब्दस्य मादृशब्देपरे

'सधमादस्थयोश्छन्दसि [६।३।९६] इति सूत्रेण सभादेशविधानात् मादेन साहित् इति कुतो न व्याख्यातमित्यत आह। सधमादस्थयो-रिति। [७६-२१] गुणगुणिनोर्भेदाभावेन साहित्यानुपपत्ते' साध-मादस्थयोश्छन्दसि ' [६।३।९६] इति सूत्रप्राप्तं व्याख्यानं नाश्रित-मित्यर्थः। विशेषबलेन साहित्यव्युत्पादनमगतिका गतिरिति भावः। 'श्रुमन्तो यामिमदेमे'त्यत्र यामिरिति श्रवणात् 'तृविवाजा' इ येतत् स्त्रीलिङ्गमित्यधायाह। स्त्रीलिङ्गामिति। [७६-२१] क्षुशब्द इत्यस्येति। [७६-२३] क्षु शब्दे इति धातो रूपं मन्वाव्याकुर्वन्त इतिभाव'। धातोरिति। [७६-२३] क्षुधातोः क्षुदूपनासिकाजन्य शब्दार्थकत्वेन शब्दसामान्यार्थकत्वाभावादिति भावः ॥१३॥

आघ ॥ मन्त्रेष्विति। [७७-१] आङिति टा सञ्ज्ञा। आङि परे मन्त्रेषु आत्मन आदेराकारस्यलोपः स्यादिति सूत्रार्थः। इणो गताविति स्येति। [७७-३] इणः लट् तस्य शानचि शपो लुकि इयङादेशे इयान् इति रूपमिति भाव। दार्ष्टान्तिक इति। [७७-४] दृष्टान्तदार्ष्टान्तिकयो शब्दवत्वेन साम्यव्युत्पादनाय ऋणो-रिति विशेषणमिति भावः। ॥१४॥

आयत ॥ दुद्देश्छन्दसीति। [७७-६] दुदेर्लेटि सिपि इतो लोपे अडागमे दकारस्य व्यत्ययेन यकारे दुद्य इति रूपमिति भावः ॥१५॥ ॥३०॥

शश्वदिन्द्र ॥ शुन शेपस्येन्द्रप्रसादो जात इति ज्ञापयितुं ब्राह्मणवाक्य पठति। तस्मा इन्द्र इति। [७७-९] शुनःशेपेन एवमुक्तप्रकारेण ऋग्भिःस्तूयमान इन्द्रस्तस्मै हिरण्यरथं मनसा स्वेच्छया परप्रेरणां विनैवेति यावत्। ददौ दत्तवान्। तदनन्तरं शुनःशेपः

'शश्वदिन्द्र' इत्येतया ऋचा तमिन्द्रं प्रतीयाय तुष्टावेति ब्राह्मण वाक्यार्थः । इदं रूपमिति । [७७-१०] प्रथेर्यङि लुकि उपधायाः व्यत्ययेन उकारे द्विर्वचने 'गुणो यङ्लुकोः' [७।४।८२] इति गुणे हलादिशेषे शतरि मिसि च पोप्रुथद्भिरिति रूपम् । नानदद्भिरिति । [७७-१०] नदेरतिशये पौनः प्रुन्ये वा यङि तस्य लुकि द्विर्वचने 'दीर्घोऽकितः' [७।४।८३] इति दीर्घे शतरि मिसि च नानदद्भिरिति रूपम् । शाश्वसद्भिरिति । [७७-११] श्वसेर्यङि तस्य लुकि द्विर्वचने अभ्यासदीर्घे शतरि मिसि च रूपम् ॥१६॥

आश्विना ॥ इदंरूपमिति । [७७ १८] ईषेः किपित्वे उपधाह्रस्वत्वे टाप्रत्यये इषेति रूपम् । माध्ये वीर्यमिति । [७७-१८] वीरेति प्रातिपदिकानुवादः । वीर्यमित्यर्थकथनमिति विवेकः । नाम्नाउच्यन्त इति [७७-१८] स्वानि अधनान्नाउच्यन्त इत्यर्थः ॥ १७ ॥

समानयोजनः ॥ स्वरूपदेहविवक्षयाह । चित्सुखत्वादिति [७७-२१] ॥ १८ ॥

न्या१घ्न्यस्य ॥ अघ्न्यस्येति। ७७-२३] 'अघ्न्यादयश्च' [उ ५६१] इति निपातना दघ्न्यशब्दसिद्धिः । अः विष्णुरिति । [७८-१] विष्णुवाचका (अ) शब्दोपपदात् हन्तेःकर्मणि यप्रत्यये अल्लोपे हकारस्य घत्वे षष्ठ्यैकवचने अघ्नस्येति रूपसिद्धिरिति भावः । येमथुरिति । [७८-१] यमेरथुसि द्विर्वचने 'अत एकहल्मध्येऽनादेशादेर्लिटि' [६।४।१२०] इति एत्वाभ्यासलोपयोर्येमथुरिति ॥ १९ ॥

कस्ते ॥ मर्त इति । [७८-३] मृङः शसिमृग्रिणवामि-लूपधृविभ्यस्तन् [उ. ३७३] इति तन्प्रत्यये गुणे मर्त इति रूपम् । वृणोतेरकार इति । [७८-८] रप्रत्यय इत्यर्थः । ईकार इति । ७८-८] ' टिड्ढाणञ् [४।१।१५] इति ङीषित्यर्थः । २०॥

वयं हि ते ॥ जात्यश्ववदिति । [७८-९] जात्यश्ववत् विद्यमान इत्यर्थः । नन्वश्वशब्दे कथ सप्तमीद्विः । तस्योपमानवाचकत्वादित्यत आह । इवादियुक्तमिति । [७८-९] इवादियुक्तोपमानवाचकः शब्दः उपमेयवाचीनि हेतोः अश्वेनेत्यस्याश्ववद्विद्यमाने इत्येव रूपेण संबोध्यवाचकान् अश्व इति सप्तमीद्विर्येक्तेति भावः । पञ्चम्यर्थे षष्ठीति । [७८-११] ' पञ्चम्यपाङ्परिभिः ' [२।३।१०] इत्युपपदविभक्तेः कर्मेत्ववाचकत्वात् (अत्र ग्रन्थपात) पञ्चम्यर्थ इति । [७८-११] तथा च आह योगेऽपि षष्ठी शेषे [२।३।५०] इत्युक्ते ' पञ्चम्यपाङ्परिभिः ' [२।३।१०] इति पञ्चम्यर्थे षष्ठीति भावः । (छलागि टिप्पणी १५१-१२) ॥२१॥ त्यत्येभिः ॥ ॥२२॥ ।३१॥११॥६॥

त्वमग्ने प्रथम । ष्टुस्तुताविति यस्मात् " उणादयो बहुलम् [३।३।१] इत्युक्तेः डूपप्रत्यये ' छ टि ' टिलोपे स्तूप इति रूपम् . त्वमग्ने प्रथमो अङ्गिरा ऋषिः ॥ अङ्गिरा इति । [७८-२३] अङ्गरसशब्दस्य अन्त्यसकारलोपे अङ्गशब्दाकारस्य इकारे अङ्गिरा इति रूपम् । विश्वनापस इति । [७९-१] अलुक्समासोऽयम् । ॥१॥

त्वममे प्रथमो अङ्गिरस्तमः अङ्गिरस्तम इति ॥ [७९-४] अङ्गिरस् शब्दः पूर्ववत् । ततस्तमप् । इरो मतुबर्थ इति । [७९-५] मेधाशब्दात् इरप्रत्यये आकारलोपे मेधिर इति रूपम् । मतुबर्थानाह । भूमेति । [७९-५] शयुरिति । [७९-६] शेतेः " मृसृघीतृचरित्सरितनिधनिमिमस्जिभ्यउः " [उ, ७] इति उप्रत्यये गुणे अयादेशे शयुरिति रूपम् । शयितेति । [७९-६] शेतेति [७९-६] पाठः प्रामादिकः । शेतेः सेट्कत्वेन इटोऽवश्य भाव्यत्वात् । आत्मा [मा] शय इति । [७९-७] अत्र यथा शेतिः स्थानार्थः तथा शयुः इत्यत्रापि स्थानार्थ इत्यर्थः । अत्र स्थानेति वाडवाग्नेः समुद्रस्थानकत्वात् समुद्रस्थातेति अर्थ इति भावः । ॥२॥

त्वममे प्रथमो मातरिश्वने ॥ ननु त्वमिति श्रवणात् मध्यमपुरुषेण भाव्यं कथं भाव्ये आविर्भूतेति प्रथमपुरुषयोग इत्यत आह । युष्मद्युपपदेऽपीति । [७९-९] प्रथमपुरुषप्रयोगः छान्दस इति भावः । तादिच्छासुक्रतूयेति । [७९-१२] सुक्रतुशब्दात् ' सुप आत्मनः क्यच् ' [६।१।८] इति क्यचि ' अकृत्सार्वधातुकयोर्दीर्घः [७।४।३५] इति दीर्घे ' अ प्रत्ययात् ' [३।३।१०२] इति अकारप्रत्यये टापि सुक्रतूयेति रूपम् । तृतीयायाइति । [७९-१२] ' सुपां सुलुक् ' [७।१।३९] इति तृतीयाया आकारादेश इत्यर्थः । मतुबिति । [७९-१३] ' मादुपधायाश्च मतोर्वोऽयवादिभ्यः ' [८।२।९] इति मकारस्य वकारादेश इति द्रष्टव्यम् अरेजेतामिति । [७९-१४] रेजतेर्लङि आताामित्यादेशे शपि ' आतो ङितः' [७।२।८१] इति आकारस्य इय् आदेशे ' लोपो

व्योर्वलि ' [६।१।६६] इति यकारलोपे आदगुणे अडागमे च **अरेजे तामिति** रूपम्। **राजतेर्वेति**। [७९-१४] राजतेर्लङि व्यत्ययेन उपधायाः एत्वम्। अन्यत्समानम्। **होतृवूर्येइति**। [७९-१५] वृङः ' अवद्यपण्यवर्या ' [३।१।१०१] इति निपातनात् यप्रत्यये गुणे टापि होतृवर्या इति रूपम्। वर्णव्ययत्येन वकारस्याकारस्य ऊत्वे द्विवचने **होतृवूर्ये** इति रूपम्। ननु वूर्ये असध्नोरित्यत्र ' ईदूदेद् द्विवचनं प्रगृह्यम् ' [१।१।११] इति प्रगृह्यसंज्ञायां ' प्लुतप्रगृह्या अचि ' [६।१।१२५] इत्यनेन प्रकृतिभावः स्यादित्यत आह। **प्रगृह्यत्वाभाव इति**। [७९-१६] **वक्ष्यमाणेन संबन्ध इति**। [७९-२१] ' वसुर्मवानसी ' त्यत्रत्येनासीत्यनेन सबन्ध इत्यर्थः। मवानित्यस्य व्याख्ययं दर्शयति॥ **सबुद्धीति**। [७९-२२] ननु असीत्यस्य मवानित्यनेन संबन्धो नोचितः। शेषप्रथमपुरुषस्य माध्यत्वादित्यत आह। **असीत्यस्येति** [७९-२२] त्वमित्यनेनैव सबन्धो न मवानित्यनेनेति मावः॥ ३ ॥

त्वमग्ने मनवे॥ अवबोधनइति। [७९ २३] मनेरुप्रत्यये **मनव** इति रूपम्। **अवाशाय इति**। [७९-२५] वाशतेर्णिचिलङि सिपि शपि गुणे अयादेशे अडागमे च **अवाशाय** इति रूपम्। वाशनमिदं भ्रान्त्या न भवतीत्याह। **अयथावाशनमिति**। [८०-३] **सांहित इति** [८०-५] अन्येषामपि दृश्यते इति सहितायां दीर्घ इति मावः। **श्वाकर्णादिवदिति**। [८०-९] ' शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु ' इत्यत्र श्वाग्रशब्दस्योपसंख्येयत्वादनेनाग्रापि दीर्घ इति मावः। ॥४॥ [वा सू ६।३।१३०]

त्वमग्ने वृषभः ॥ श्रवाय्य इति । [८०-१३] श्रुदक्षि-स्पृहिग्राहिभ्य आय्य [उ० ३८३] इति आय्यप्रत्यये गुणेऽवादेशे श्रवाय्य इति रूपम् । आहुतिमिति । [८०-१४] आङ् पूर्वात् हूयतेः औणादिके कर्मणि क्तिनि ' वचिस्वपि ' [६।१।१५] इति संप्रसारणे आहुतिमिति रूपम् । ननु विशां वासाधिकरणत्वाद्विट्सु इति सप्तम्या भाव्यं कथं द्वितीयेत्यत आह उपान्वध्याङ्वस इति । [८०-१५] ॥५॥ ॥३२॥

त्वमग्ने वृजिन । पिपर्षीति । [८०-२१] पॄ पालन-पूरणयोः इत्यस्तः लटि सिपि शपः श्लौ द्वित्वे ' अर्तिपिपर्त्योश्च ' [७।४।७७] इत्यभ्यासस्येत्वे गुणे पिपर्षीति रूपम् । यज्ञसामान्य-वाचकेन विदथशब्देन ज्ञानयज्ञो ग्राह्य इति भावेनाह । सद्विद्याख्य इति । [८०-२२] परितक्म्ये इति । [८०-२४] परिपूर्वात् तकेर्यप्रत्यये प्रत्ययस्य मुडागमे परितक्म्ये । इति रूपम् । ॥६॥

त्वंतमग्ने ॥ मर्तमिति । [८१-२] मृङः ' इसिमृग्रि-ण्वामिदमिलूपधुविभ्यस्तन् [उ० ३७३] इति तन् प्रत्यये मर्तमिति रूपम् । तातृषाण इति । [८१-३] तृषेर्लिटः कानचि द्वित्वे अभ्यासस्य छान्दसे संहितायां दीर्घे तातृषाण इति संहितायां रूपम् । प्रय इति । [८१-५] तृतीयोऽतिशय इति इकारस्याकारे प्रय इति भवति । सूरये तु आविशेषात्ततृषाण इति । [८१-७] इतः परं प्रयः कृणोषीत्येव पाठः । [८१-७] ननु मयः कृणो-षीति । [८१-७] अन्यथास्मिन्व्याख्याने प्रयइति व्यर्थं स्यात् । ॥ ७ ॥

त्वंनो अग्ने ॥ अत एवेति । [८१-१२] ज्ञानिनि विद्वत्तूढेः सद्भावादेव विश्वकर्मा इन्द्रो वेत्याह । अन्यथा कारुः कुलाल इत्यवक्ष्यत् इत्यर्थः । पुनरुक्तिप्रसंगादिति । [८१-१२] कारु शब्दस्य ज्ञान्यर्थकत्वे ' सनये धनानामि ' त्यनेन ज्ञानस्योक्तत्वात् पौनरुक्त्यं स्यादित्यर्थः । ॥८॥

त्वंनो अग्ने पित्रोः ॥ ओपिष इति । [८१-२९] आह् पूर्वात् वपः (वप धातोः) लिटः थासि इडागमे थासः सभावे ' वचि स्वपिः ' इति [६।१।१५] संप्रसारणे द्वित्वे सवर्णदीर्घे आडः आद्गुणे पत्वे च ओपिष इति रूपम् । ॥९॥

त्वमग्ने प्रमतिः ॥ शतिन इति । [८१-२४] इतः पर टीकायां शतसंख्यावत्य इति प्रक्षिप्तम् । तथा सहस्रिण इत्यतःपर सहस्रसंख्यावत्य इत्यपि प्रक्षिप्तम् । श्रुतौ स्त्रीलिङ्गस्य विशेष्यस्याभावेन पदद्वयस्यलिङ्गव्यत्ययनिरूपणप्रयोजनाभावात् । ततश्चैव टीकावाक्यपाठः । शतिनः शतसंख्यावन्तः रायः संयन्ति सहस्रिणः सहस्रसंख्यावन्तश्च रायः संयन्तीति । ॥१०॥ ॥३३॥

त्वामग्ने ॥ राज्ञ इति भाष्यस्थं पदमनूद्य राजाविशेषपरत्वेन स्वयं व्याख्याय भाष्यपदस्य आयोरित्येतत् व्याख्येयमिति दर्शयति । राज्ञ इति । [८२-१] आयोरायुरित्यनेन षष्ठ्याः साधुत्वमायुः शब्दवाच्यत्वं चेति द्वयं प्रतिज्ञायत इति भ्रम वारयति । आयोरायुरित्यनेनापीति । [८२-२] कुत इत्यत आह तत्समाधानस्येति । [८२-२] आयुशब्दवाच्यत्वं कथमित्याशङ्कासमाधानस्याप्यनुक्तत्वादित्यर्थः । वक्ष्यमाणत्वाच्चेति [८२-२-३] तस्य ' य

नामान्तर्यामिणो जीवगं च ' इत्यनेन वक्ष्यमाणत्वाच्चेत्यर्थः । संबन्धस्योक्तत्वादिति । [८२।१२] षष्ठ्या सामान्येनोक्तस्यसंबन्धस्य विशेषतत्वादित्यर्थः । आग्नेयत्वानुपपत्तिरिति । [८२-१२] इतः परं द्वितीय इति [८२-१२] ' प्रक्षिप्तम् । आद्य इत्युच्छिन्नम् । ततश्चैवं टीकावाक्यपाठः । ' आद्ये कथमीश्वरस्येळात्वमिति ' । अवश्यं चैतदेवं विज्ञेयम् । नेति चेदाग्नेयत्वानुपपत्तिरित्यनेनैव द्वितीयपक्षस्य दूषितत्वेनाद्यपक्षस्यैव दूषणीयत्वात् । ' छन्दसीण ' [उ० २] इति सूत्रमर्थतोऽनुवदति । इणःश्छन्दसीति [८२-१६] इणः उणि वृद्धौ आयादेशे आयुरिति रूपम् । ॥ ११ ॥

त्वं नो अग्ने ॥ अस्य पुत्रस्य सूनोरिति । [८३-५] पौत्रस्येत्यर्थः । ॥ १२ ॥

त्वमग्ने यज्यवे ॥ यज्यव इति । [८३-१४] यजे ' यजिमनिशुधिदासिजनिभ्यो युच् ' इति युच्प्रत्यये उणादेशे बाहुलिकत्वात् ' युवोरनाकौ ' [७।१।१] इत्यनादेशाप्रवृत्तौ चतुर्थ्येकवचने यज्यव इति रूपम् । यष्टुरिति । [८३-१४] यजेस्तृचि " ग्रह " [८-२-३६] इति षत्वे षष्ठ्येकवचने यष्टुरिति रूपम् । पायुरिति । [८३-१४] पातेरुणि ' आतो युक् ' [७।३।३३] इति युकि पायुरिति रूपम् । इध्यस इति । [८३-१६-१७] इन्धीदीप्तावित्यतः कर्मणि लटि थास सेभावे यकि "अनिदिताम् ." [६-४-२४] इति नकारलोपे इध्यस इति रूपम् । प्राणिविशेषस्येति । [८३-१९] श्वापदस्येत्यर्थः । तस्येति । [८३-१४] गौणस्य वृकशब्दस्येत्यर्थः । भावे असुनीति । [८३-२०] ' आदे

च उपदेशिति' [६।१।४५] इत्यात्वे छान्दसे युगागमे चतुर्थ्येकवचने घायस इति रूपम । कीरेरिति । [८३–२१] कृञः 'अचइः' [उ ५८८] इति इकारप्रत्यये धातुऋकारस्य ईकारे रपरत्वे षष्ठ्येकवचने कीरेरिति रूपम् । ॥ १३ ॥

त्वमग्न उरु शंसाय ॥ महास्तोत्रायेति । [८३–२३] शिष्यकृतमहास्तोत्रविषयायेत्यर्थ । वाघत इति । [८३–२३] वहेः शप्रत्यन्तस्य छान्दस उपधादीर्घे दकारस्य घकारे चतुर्थ्येकवचने वाघते इति रूपम् । आध्रस्येति । [८३–२४] आङ्पूर्वात् धृङ्त्येतस्मादर्णादिके कप्रत्यये यणादेशेषष्ठ्येकवचने आध्रस्योति रूपम् । सामान्यमिति । [८४–३] अखिलोपदेशकत्वात्सामान्यपरिपक्काधिकारोपदेशकत्वे विशेषे हेतुरित्यर्थः । अखिलमित्येतदुभयत्र संबध्यत इति भावेनाह । अतएवाखिलमिति । [८३–३] अखिलमिति प्रतीकधारणम् । प्रदिश इति कृद्योगात् षष्ठ्या भाव्यमिति द्योतनाय अखिलस्येति प्रतिपदग्रहणमिति विवेकः । तृनन्तत्वादिति [८४–४] 'न लोकाव्यय निष्ठ' [६।३।६९] इति द्वितीयापवादकषष्ठीनिषेधेन 'कर्मणि द्वितीया' [२।३।२] इत्यनेन द्वितीयेति भाव ॥ १४ ॥

त्वमग्ने प्रयत ॥ ककारागमेनेति । [८४ ६] सदेर्मनिन् प्रत्यये धातोः कुडागमे 'आदेशप्रत्यययोः' [८।३।५९] इति धात्वादेः सस्य षत्वे क्षद्मेति रूपम् इति भावः । देहे सत्येवेति [८४-१२] अस्मिन्नेव देहे क्षमालाभार्थं ज्ञानमार्गवसत्यर्थं वेदोक्तं कर्मणि कृते अस्मिन्नेव देहे या क्षमा या च ज्ञानमार्गे वसतिर्लभ्यते तदुभयं वेदोक्तकर्मणा दिवः प्राप्तिर्भवतीति । निश्चयायोपमा भवतीति

भवः । स्त्रीलिङ्गेनेति । [८४-१३] पदकाले स इति पुल्लिङ्गतया श्रूयमाणं पद सेति स्त्रीलिङ्गतया विपरिणम्य उपमाशब्देनान्वेतव्यमिति भावः ॥ १५ ॥ ३४ ॥

इमामग्ने ॥ शरणिमिति । [८४-१५] तृतीयोऽतिशय इत्युक्तेरकारस्य इकारः । मीमृष इति । [८४-१५] चुरादिण्यन्तात् मृषेर्लुङि सिपि च्लेश्चङादेशे च लीति द्विर्वचने 'उरत्' [७।४।६६] इति अभ्यासऋवर्णस्य अकारादेशे 'सन्वल्लघुनि' [७।४।९३] इति सन्वद्भावे 'सन्यतः' [७।४।७९] इति इत्वे "दीर्घो लघोः" [७।४।९४] इति दीर्घे णिलोपादौ 'बहुलं छन्दस्यमाङ् योगेऽपि' [६-४-७५] इति अडभावे मीमृष इति रूपम् । व्यत्ययेनेति । [८४-१५] लोडर्थे लुङो जातत्वात् मर्षस्वेति व्याख्यानमुपपन्नमिति भावः । सूत्रोच्चारणेन सोम्यशब्दसिद्धिं स्मारयति । सोममर्हति यः [४।४।१३७] इति । [८४-१८] सोमशब्दात् द्वितीयासमर्थात् अर्हतीत्यर्थे यप्रत्ययो भवतीति सूत्रार्थः । भ्रामिरिति । [८४-१९] 'भ्रमेः संप्रसारणं च' [५७०-उ०] इति सूत्रेण भ्रमेरिन् प्रत्यये संप्रसारणे भ्रामिरिति रूपम् ॥ १६ ॥

मनुष्वत् ॥ मनुष्वदिति । [८४,२०] मनुशब्दपर्यायान्मनु शब्दाद्वतिप्रत्यये सस्य षत्वे मनुष्वदिति रूपम् । ननु मनुष्वदित्यादिव्याख्यानाय भाष्ये मनोरपत्यमो यथातँरिति षष्ठी प्रयोक्तव्या । 'तत्र तस्येव' [५।१।११६] इति सूत्रेण षष्ठी सत्यपम्यन्ताभ्यामेव वतेर्विधानात् कथं प्रथमान्तशब्दप्रयोग इत्यत आह । तात्पर्यत इति । [८४-२१] अच्छेत्यभेरर्थ इति

च उपदेशिति' [६।१।४५] इत्यात्वे छान्दसे युगागमे चतुर्थ्येकवचने धायस इति रूपम । कीरेरिति । [८३–२१] कृञः 'अचइः' [उ ५८८] इति इकारप्रत्यये धातुऋकारस्य ईकारे रपरत्वे षष्ठ्येकवचने कीरेरिति रूपम् । ॥ १३ ॥

त्वमग्न उरु शंसाय ॥ महास्तोत्रायेति । [८३–२३] शिष्यकृतमहास्तोत्रविषयायेत्यर्थ । वाघत इति । [८३–२३] वदेः शत्रन्तस्य छान्दस उपधादीर्घे दकारस्य धकारे चतुर्थ्येकवचने वाघते इति रूपम् । आध्रस्येति । [८३–२४] आङ्पूर्वात् धृङ्इत्येतस्मादौणादिके कप्रत्यये यणादेशेषष्ठ्येकवचने आध्रस्येति रूपम् । सामान्यमिति । [८४–३] अखिलोपदेशकत्वात्सामान्यपरिपक्काधिकारोपदेशकत्वे विशेषे हेतुरित्यर्थ. । अखिलमित्येतदुभयत्र संबध्यत इति भावनाह । अतएवाखिलमिति । [८३–३] अखिलमिति प्रतीकधारणम् । प्रदिश इति कृधोगात् षष्ठ्या भाव्यमिति द्योतनाय अखिलस्येति प्रतिपदग्रहणमिति विवेकः । तृनन्तत्वादिति [८४–४] 'न लोकाव्यय निष्ठ' [६।३।६९] इति द्वितीयापवादकषष्ठीनिषेधेन 'कर्मणि द्वितीया' [२।३।२] इत्यनेन द्वितीयेति भाव ॥ १४ ॥

त्वमग्ने प्रयत ॥ ककारागमेनेति । [८४ ६] सदेर्मनिन् प्रत्यये धातोः कुत्वागमे 'आदेशप्रत्यययोः' [८।३।५९] इति षात्वादेः सस्य षत्वे क्षत्त्रेति रूपम् इति भावः । देहे सत्येवेति [८४-१२] अस्मिन्नेव देहे क्षमालाभार्थं ज्ञानमार्गवसत्यर्थं वेदोक्ते कर्मणि कृते अस्मिन्नेव देहे या क्षमा या च ज्ञानमार्गे वसतिर्लभ्यते तदुभयं वेदोक्तकर्मणा विषः प्राप्तिर्भवतीति । निश्चयायोपमा भवतीति

भवः । स्त्रीलिङ्गेनेति । [८४-१३] पदकाले स इति पुल्लिङ्गतया श्रूयमाणं पदं सेति स्त्रीलिङ्गतया विपरिणम्य उपमाशब्देनान्वेतव्यमिति भावः ॥ १५ ॥ ३४ ॥

इमामग्ने ॥ शरणिमिति । [८४-१५] तृतीयोऽतिशय इत्युक्तेरेकारस्य इकारः । मीमृष इति । [८४-१५] चुरादिण्यन्तात् मृषेर्लुङि सिपि च्लेश्चङादेशे च ङीति द्विर्वचने 'उरत्' [७।४।६६] इति अभ्यासऋवर्णस्य अकारादेशे ' सन्वल्लघुनि ' [७।४।९३] इति सन्वद्भावे ' सन्यतः ' [७।४।७९] इति इत्वे " दीर्घो लघोः " [७।४।९४] इति दीर्घे णिलोपादौ ' बहुलं छन्दस्यमाङ् योगेऽपि ' [६-४-७५] इति अडभावे मीमृष इति रूपम् । व्यत्ययेनेति । [८४-१५] लोडर्थे लुङो जातत्वात् मर्षस्वेति व्याख्यानमुपपन्नमिति भावः । सूत्रोच्चारणेन सोम्यशब्दसिद्धिं स्मारयति । सोममर्हति यः [४।४।१३७] इति । [८४-१८] सोमशब्दात् द्वितीयासमर्थात् अर्हतीत्यर्थे यप्रत्ययो भवतीति सूत्रार्थः । भ्रूमिरिति । [८४-१९] ' भ्रमेः संप्रसारणं च ' [५७०-उ०] इति सूत्रेण भ्रमेरिन् प्रत्यये संप्रसारणे भ्रूमिरिति रूपम् ॥ १६ ॥

मनुष्वत् ॥ मनुष्वदिति । [८४,२०] मनुशब्दपर्यायान्मनु शब्दाद्वतिप्रत्यये सस्य षत्वे मनुष्वदिति रूपम् । ननु मनुष्वदित्यादिव्याख्यानाय भाष्ये मनोरज्ञिरसो ययातेरिति षष्ठी प्रयोक्तव्या । ' तत्र तस्येव ' [५।१।११६] इति सूत्रेण षष्ठी सत्पम्यन्ताभ्यामेव वतेर्विधानात् कथं प्रथमान्तशब्दप्रयोग इत्यत आह । तात्पर्यत इति । [८४-२१] अच्छेत्यभेरर्थ इति

[८४–२२] इतःपरं टीकायां श्रूयमाणं अत्र **अच्छगत्यथवदे-ष्विति गतिरिति** [८४–२२] वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् गतिसंज्ञाप्रदर्शनप्रयोजनाभावात् । **यक्षीति** [८४–२४] यजेः सिपि तस्य हीत्यादेशाभावे शपो लुकि ' व्रश्च ' [८।२।३६] इति षत्वे ' षढोः कः सि ' [८।२।४१] इति कत्वे ' आदेशप्रत्यययोः ' [८।३।५९] इति सिपः सकारस्य षत्वे **यक्षीति** रूपम् । ॥ १७ ॥

एतेनाग्ने ॥ वावृधस्वेति । [८४–२६] वृधेर्लोटि थासः सेभावे ' सवाभ्यां ' [३।४।९१] इत्येकारस्य वत्वे व्यत्ययेन शविकरणे छान्दसे द्विर्वचने उरदत्वे छान्दसे अभ्यासस्य दीर्घे **वावृधस्वेति** रूपम् । **यदिति नपुंसकमिति** [८५-२] यत्ते चक्रमेत्यत्र यदिति नपुंसकमित्यर्थः । **यामितिवेति ।** [८५-२] । यां वेदवाचं चक्रम इत्यर्थ इति भावः । **प्रणेषीति** । [८५-३] । प्रपूर्वान्नयतेः लटः सिपि श्लुक्गुणे षत्वे **प्रणेषीति** रूपम् ।

॥ १८ ॥ ३५ ॥ १२ ॥

इन्द्रस्यनु ॥ लडर्थेलुडिति । [८५-७] वच परिभाषण इत्यतः परिभाषणवाचिनः वचेःलडर्थे लुडि तदादेशसिपोमादेशे च्लिप्रत्यये ' अस्यसि वक्ति ख्यातिभ्योऽङ् ' [३।१।५२] इति अङादेशे ' वच उम् ' [७।४।२०] इति उमागमे ' आदृगुणः ' [६।१।८७] इति गुणे छान्दसे अडभावे **अवोचमिति** रूपम् इति भावः अडागमे **अहन्निति** [८५–९] हन्तेर्लङि तिपि इतोलोपे श्नपोर्लुकि तकारलोपे **अहन्निति** रूपम् । नन्वपामन्विति भवितव्यम् । खननकर्मत्वा-

भावेन द्वितीयाप्राप्त्यभावादित्यत आह । लक्षणेति । [८५-१०] 'कर्मप्रवचनीययुक्ते द्वितीया' [२।३।८] इति सूत्रेण द्वितीयेति भावः । नन्वस्मिन्पक्षे अन्वप इत्यत्र अन्वित्यस्य हेत्वर्थकत्वेन लक्षणार्थकत्वाभावात् कथ द्वितीयेत्यत आह । अनुर्लक्षण [१।४।८४] इतीति । [८५-१३] अस्मिन्सूत्रे लक्षणशब्दस्य हेतुवाचकत्वादिति भावः । उक्तं च काशिकायाम् । 'किमर्थमुच्यते यावता लक्षणेत्थभूताख्यान ' [१।४।९०] इत्यनेन सिद्धौवाऽनोः कर्मप्रवचनीयसंज्ञा हेत्वर्थं तु वचनम् । हेतौ तृतीयां बाधित्वा द्वितीया यथा स्यादिति । अस्मात्करण इति । [८५-१५] वहेः(हः)सन्प्रत्यये 'होढः' [८।२।३१] इतिढत्वे 'ढ्रोः कः सि' [८।२।४१] इति कत्वे 'आदेशप्रत्यययोः' [८।३।५९] इति षत्वे टापि वक्षणेति रूपम् । वचपरिभाषण इत्यत इति । [८५-१७] इतिव्याख्यातात्वचेः सन्प्रत्यय इत्यर्थः । ॥१॥

अहान्नहिम् ॥ कानजन्तामिति । [८५-१९] श्रयते लिंटः कानजादेशे द्वित्वे इयङादेशे शिश्रियाणामिति रूपमिति भावः त्वष्टेति । [८५-२०] 'त्विषेर्देवयामकारश्चोपधाया अनिट्त्वं च' इत्यनेन वार्तिकेन तृन् प्रत्यये उपधेकारस्याकारे इडभावे त्वष्टेति रूपम् । स्वृ शब्दोपतापयोरिति । [८५-२३] अस्मात् 'उणादयो बहुलम्' [३।३।१] इति बहुलग्रहणादौणादिके यत्प्रत्यये गुणे स्वर्यमिति रूपमिति भावः । ऐन्द्रत्वसिद्धय इति । [८५-२५] उत्तरार्धस्यैन्द्रत्वसिद्धय इत्यर्थः ॥२॥

वृषायमाणः॥ अवृणीतेति । [८६-२] वृञः लिङि श्नामत्यये 'इहल्यघोः' [६।४।११३] इति ईत्वे अडागमे लङः

नादेशे अवृणीतेति रूपम् । कदुकत्वमिति । [८६-५] । कदशब्दोपपदात् स्वार्थे तो' क्तप्रत्यये तकारस्य ककारे कदुकमिति रूपम् । पोन्तकर्मणीति । [८६-८] अरमात् घञ्प्रत्यये धातुषकारस्य सत्वं 'आदेश्च उपदेशेऽशिति [६।१।४५] इत्यात्वे 'आतो युक् चिण्कृतो' [७।३।३३] इति युगागमे सायशब्दो भवति । तस्मिन्नुपपदे करोतेर्डप्रत्यये सायङ्कमिति रूपसिद्धिर्भवतीति द्रष्टव्यम् । प्रथमजामितिरूपसिद्धिं स्मारयति । जनसनेति विडिति । [८६-११-१२] जनेर्विटि 'विड्वनोरनुनासिकस्यात्' [६।४।४१] इति आत्वे अमि च प्रथमजामिति रूपम् । हि गताविति । [८६-१३] इतः परं टीकायां श्रूयमाणं ततः किरिति [६६-१३] वाक्यं प्रक्षिप्तम् । ततोडिरिति वाक्यमुच्छिष्टम् । अवश्यं चैतदेवं विज्ञेयम् । हि गतावित्यस्मात्किप्रत्ययाङ्गीकारे ककारलोपे सवर्णदीर्घे आहीति दीर्घान्तरूपप्रसङ्गात् । ॥३।

यदिन्द्राहन् ॥ प्रामिणा इति । [८६-१५] मी धातोः श्नाप्रत्ययमिपि सत्वे विसर्गेत्व 'मीनातेर्निगम [७।३।७१] इति धातोर्ह्रस्वत्वे " हिनुमीना " [८।४।१५] इति णत्वे अडागमे प्रामिणा इति रूपम् । तादीत्नेति [८६-१८] तावच्छब्दस्य वतुपः तृषोदरादित्वादीत्नादेशे तादीत्नेति रूपम् । विदूलाभ इति । [८६-१९] अस्मात् लडादेशस्य घासः से भावे छान्दसे शप श्लौ द्वित्वे विवत्स इति रूपम् । ॥४।

अहन् ॥ ननु वृत्रशब्दस्य रूढत्वात् कथं तस्मात् तरप्तुत्पत्तिरित्यत आह । वृत्रशब्द इति । [८६-२३] वृञ. बाहुलिकेन

ष्ट्रन प्रत्यये वृत्रेति रूपम् । अतो घृत्रशब्द आवरकत्ववाचीति भावः । व्यंसशब्दाविति । [८६-२४] विपूर्वात् संवादवाचकादमेर्बाहुलिके सप्रत्यये कृते विसंवादवाची व्यंसशब्दो निष्पन्नो भवतीति भावः विवृक्णेति । [८६-२५] विपूर्वात् वृश्चतेः क्तप्रत्यये ऊदित्वेन वेट्त्वात् " यस्य विभाषा " [७।२।१५] इति इडभावे ' चोः कुः ' [८।२।३०] इति कुत्वे " ओदितश्च " [८।२।४५] इति निष्ठातकारस्य नत्वे ' ग्रहिज्या ' [६।१।१६] संप्रसारणे ' स्कोः संयोगाद्योरन्ते च ' [८।२।२६] इति सलोपे नकारस्य णत्वे जसः " सुपां सुलुक् " [७।१।३६] इति आकारादेशे विवृक्णेति रूपम् । पूर्ववदेकवचनमिति । [८७-१] उपपृगित्यस्य अहिशब्दविशेषणत्वात् तस्य एकवचनान्तत्वात् एतस्यापि एकवचनान्तत्वम् । अहिशब्देनोपलक्षणया अहिवृत्रवृत्रतराणां ग्रहणेन अहिशब्दगतैकवचनस्य बहुवचनार्थकत्ववत् अस्यापि बहुवचनार्थकत्वमिति भावः । शायत इति । (८७-१) शीङो व्यत्ययेन लङर्थे लटि शपः छन्दसे लुगभावे गुणे अयादेशे टेरेत्वे शायत इति रूपम् । अशेरतेति । (८७।१।२) शीङोलङ् तस्य झादेशे ' आत्मनेपदेष्वनत ' (७।१।५) इति तस्यात् इत्यादेशे ' शीङः सार्वधातुके गुणः ' (७।४।२१) इति धातोर्गुणे ' शीङोरुट् ' (७।१।६) इति रुडागमे धातोरडागमे अशेरतेति रूपम् । निर्वचन स्फुटमिति । (८७-३) पृथुत्वाद्बुद्धिः पृथिवीति निर्वचनस्फुटमित्यर्थः । ॥ ५ ॥ ३६ ॥

---

१ दीप—स्रस् च इत्येवमूलधातु चकारत्वयोगात् सकारत्वमापन्न । तस्य क्रुत्वेतु निमित्तापाये ' नैमित्तिकस्याप्यपाय ' इतिन्यायेन सकारापाये सकार एवावतिष्ठते ।

अयोधेव । आजुह्व इति(८७-८) ह्वयो लिटि तदादेश तशब्दस्य 'लिटस्तझयोः '(३।४।८१) इति एत्वे द्वित्वात् पूर्वं सम्प्रसारण पश्चात् द्वित्वे उवङादेशषाधेन छान्दसे यणादेशे जुह्वे इति रूपम् । रुजाना इति (८७-११) रोगवाचकरुक्शब्दात् युक्ता इत्यर्थे 'तद्वितीयाः' [४।१।७६] इति बहुवचनापिते आनप्रत्यये कृते रुजाना इति रूपम्। भाष्ये चिरंतनं सूत्रमर्थत उदाहृतमिति भावेनाह । पुंसोः पुल्लिङ्गयोरिति । [८७।१४।१५] नवनीतमित्यत्र णु स्तुताविस्यस्मात् 'ऋदोरप्' [३।३।५७] इत्यप्प्रत्यये गुणे अवादेशे 'णोन.' [६।१।६५] इति नत्वे नवशब्दो निष्पन्नो भवति । तत्र धातुस्वरेण धातुरन्तोदात्तः । " अनुदात्तौ सुप्पितौ ' [३।१।४] इति प्रत्ययोऽनुदात्तः ततश्चोदात्तादनुदात्तस्य स्वरित इति नवशब्दः स्वरितान्तः । तस्य [प्र] क्रान्तेन नीतशब्देन कर्मधारयः ततश्च ' कर्मधारयेऽनिष्ठा ' [६।२।४६] इति सूत्रेण अनिष्ठान्तस्य पूर्वपदस्य प्रकृतिस्वरत्वविधानेन नवनीतमिति कर्मधारयप्रातिपदिके पूर्वपदान्तस्य स्वरितत्वे विद्यमानेऽपि बहुव्रीहित्वाभावात् व्यभिचार इति शङ्कावारणाय पुंसोरिति समस्यमानपदयोर्विशेषणम् । ननु यवपालशब्दे पूर्वपदं स्वरितान्तम् । यवशब्दस्य युधातोः " ऋदोरप् " [३।३।५७] इति अपि निष्पन्नत्वात् अप्प्रत्ययस्य चानुदात्तत्वेन धातोरुदात्तत्वेन ' उदात्तानुदात्तस्य स्वरितः ' [८।४।६६] इति स्वरितत्वस्य सूत्रप्राप्तत्वात् । न च यवानां पाल इति विगृह्य समासे समासान्तोदात्तत्वं भविष्यतीति वाच्यम् । ' गोतन्ति यवं पाले ' [६।२।७८] इति सूत्रेण यवशब्दस्य पालशब्दे परे आद्युदात्तत्व विधानेन यकारस्याकारस्योदात्तत्वात् वकारस्थाकारस्यानुदात्तत्वेन " उदात्तानुदात्तस्य

स्वस्ति [८।४।६६] इति स्वरितत्वविधानेन पूर्वपदान्तस्वरित त्वस्यावश्यं वक्तव्यत्वात् । एव चात्र पूर्वपदान्तस्वरितत्वे विद्यमानेऽपि बहुव्रीहित्वाभावाद्वयमिचार इति चेन्न । यत्र पूर्वपदान्तस्वरितत्वं तत्र बहुव्रीहित्वमिति व्याप्तेरौत्सर्गिकत्वात् । इन्द्रशत्रुशब्दस्य पूर्वपदान्तस्व-रितत्वेन बहुव्रीहित्व सेत्स्यतीत्यत्र ज्ञापकमाह । तथाचेति । [८७-१६] लौकिकव्याकरणाभिज्ञानां बुध्यारोहाय सूत्रस्यार्थान्तरमाह । पूर्व-पदेति । [८७-१६] पूर्वान्तस्वरितपद पूर्वपदप्रकृतिस्वरस्योपलक्षणम् । ततश्च पूर्वपदस्य प्रकृतिस्वरत्वं यत्र तत्र बहुव्रीहित्वं ज्ञातव्यमिति चिरं-तनसूत्रार्थः । ॥ ६ ॥

अपात् ॥ पुरुत्रेति । [८७-२३] पुरुशब्दात् 'देवमनुष्य पुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ' [५।४।५६] इति त्राप्रत्यये पुरुत्रेति रूपम् । ॥ ७ ॥

नदंन ॥ महिनेति । [८८-१] छान्दसे मकारलोपे महिनेति रूपम् । तसिरिति प्रत्यय एव नतु सप्तम्यादेश इति भावेनाह । सप्तम्यलोप इति । [८८-४] ॥८॥

नीचावयः ॥ उत्तरवाक्येनेति । [८८-७] या सूत्रपुत्रा-दानुः नीचावया अभवत् सा दानुः शय इति उत्तरार्धेन एकवाक्यता-सिद्धय इत्यर्थः । उत्तरार्धस्य व्याख्यानमिति । [८८-७] उत्तरार्धस्थपदव्याख्यानमित्यर्थः । संबन्धस्तूत्तरेति । [८८-९] नीचस्थान इत्यादिपूर्वभाष्यस्य 'वधं तस्या आहरदि' [मा २७-८] त्युत्तरभाष्येण संबन्ध इत्यर्थः । वृत्रमातेति व्याख्यानं कथ-मिति [८८-१२] पुत्रशब्दस्य सुतार्थकत्वात् मातृवाचकतया कथ व्याख्यानमित्यर्थः । भाष्ये ' वृत्रः पुत्रोऽस्या ' इति ।

[भा २७-८] नास्माभिर्वृत्रमातेत्यनेन पुत्रशब्दार्थ उक्तः। किं तु बहुव्रीहिलभ्यस्यान्यपदार्थस्य स्वरूपमुक्तमिति भाव। **जभारेति**। [८८-१३]हृञः लिटि तिपि तस्य णलादेशे द्वित्वे वृद्धौ 'हृग्रहोर्भच्छन्दसि' [वा सू ३।१।८४]इतिभत्वे **जभारेति** रूपम्। ऋच अध्यात्मार्थसूचनाय एकेन वाशब्देन भाव्य तत् कथं प्रकृतिर्वा ईशितावेति वाशब्दद्वय-मित्यत आह। **भिन्नवाक्यत्वादिति**। [८८-१४] प्रकृतिर्वा-वृत्रमातेत्यस्य ईशितावेत्यस्य भिन्नवाक्यत्वात् वाशब्दद्वयमित्यर्थः। न केवल वृत्रमाता दनुः किंतु प्रकृतिरध्यात्मवृत्रमातेति बाह्याध्यात्मयोजन योरभेद सूचयितुमेको वाशब्दः। न केवलमिन्द्रो वधं जभार किं तु ईशितेति बाह्याध्यात्मयोजनयोरर्थभेद सूचयितुं द्वितीयवाशब्द इति भावः। **दो अवखण्डन इत्यत इति**। [८८-२२] 'आदे च उपदेशे' [६।१।४५] इति धातोरात्वे 'दाभाभ्यां नुः' [उ ३१९] इति नुप्रत्यये **दानुरिति** रूपम्। ॥९॥

अतिष्ठन्तीनाम्॥ (मिति) **अशू व्याप्तावित्यस्येति**। [८९-३]। ण्यन्तादेशे लङि तस्य तिपि शपि गुणे अयादेशे **अशाय-दिति** रूपम्। ॥१०॥ ॥३७॥

दासपत्नीः॥ अन्येति। [८९-६] पूर्वार्धे वृत्रग्रहणा-भाव इत्यर्थः। अन्यस्यापराधमुक्त्वा अन्यवधाभिधानस्यायुक्तत्वादिति भावः। **अत एवेति**। [८९-६] असगतिवारणार्थं शेषपूरणस्य कर्तव्यत्वादेवेत्यर्थः। **अनायासेनेति**। [८९-८] अनायासेनाहि वधस्य कृतत्वेन महिमातिशयलाभादहिवधः कण्ठतो नोक्त इति भावः। **पत्न्य इवेति**। [८९-१०] शुभानि पत्नीस्थाने विवक्षितामीति। ॥११॥

अश्व्यः । तदा परामुङ्खतयेति । [८९-१४] अनेन-अश्व्योवारोभव ' इत्यस्य पराञ्चानां पराङ्मुखतया वाहकोऽभव इत्यर्थः सूचितः । अत एवेति । [८९-१६] 'प्रत्यङ्स्वांयदिस्मे'त्यत्र किलार्थः स्मशब्दः ' " नैव कश्चिद्धि तस्मात् " इत्यत्र हिशब्द इत्यर्थः । ॥१२॥

नास्मै ॥ अकिरदिति । [८९-२०] विक्षेपार्थकात् किरतेर्लङि तस्य तिपि इकारलोपे शप्रत्यये अडागमे 'ऋत इद्धातोः' । [७।१।१००] इति ईत्वे रपरत्वे चाकिरदिति रूपम् । ॥१३॥

अहेर्यातारम् ॥ स्तनतेरिति । [९०-७] अस्मात् यतुच्-प्रत्यये आदिसकारलोपे तन्यतुरिति रूपम् । ननु मिद् (ह्) शब्दस्य-हकारान्तत्वात् मिहेत्युक्तेति भाष्यं कथमिहेत्युक्तेति भाष्ये प्रयोग इत्यत आह । अकार उच्चारणार्थ इति । [९०-७-८] ननु-मिहेः सेचनार्थत्वात् वक्तृत्वशक्तिः कथ मिहशब्दार्थतया व्याख्यातेत्यत आह । शक्त्याहीति । [९०-८] मिह्यते सिच्यते वागनयेति मिद् शक्तिरिति भावः । तामेव शक्तिं दर्शयति । जन्मान्तरवास-नेति । [९०-८] द्रादुनिरिति । [९०-८] द्रादतेरुनिप्रत्यये द्रादुनिरिति रूपम् । असंगत्तीति । [९०-१५] उत्तरार्धस्य पूर्वार्धे-नासंगतिपरिहारायेत्यर्थः । हतौ शतृप्रत्यय इति । [९०-१५] अर्जयन्वसतीत्यत्रेव, फले शतृप्रत्यय इत्यर्थः ॥१४॥

इन्द्र ॥ अत्रैवशब्देनेति । [९१-२३] अस्मत्कृत-व्याख्यानपर्यालोचनायां इय ऋक् ईश्वरविषयैव । बहिर्विषयतया व्याख्यानं शिल्पैरेवोह्यतामिति द्योतयतीत्यर्थः ॥ १५ ॥

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथयति-विरचिते ऋग्भाष्यटीकाविवरणे रूपावतारे प्रथमाष्टके द्वितीयोऽध्यायः ॥

श्रीकृष्णार्पणमस्तु ॥

श्री सत्यप्रमोदतीर्थांघ्रिचरणासक्तोऽनुजः]
अशोधयद् हयग्रीवः मूलरामः प्रसीदतु ॥

॥ तृतीयोऽध्यायः ॥

एतायाम ॥ ये सख्याय इत्यादीनामध्याहारे निमित्तमाह । **इतेति मध्यमेति ।** [९३-२] **अधिकमपीति ।** [९३-६] गा इच्छन्त इत्यर्थमविहायैव इन्द्रवशत्वरूपमतिशयितमप्यर्थं दर्शयितु पशुवच्चश्चस्या इत्यादि भाष्यमित्यर्थः । **यातेर्लङीति ।** [९३-७] यातेर्लङि लङः मसादेशे सकारलोपे अडागमे विकरणस्य लुकि **अयामेति रूपम् ।** न चात्रेति [९३-७] शरणप्राप्तेर्वर्तमानत्वेन भूतत्वार्थकलङ्प्रयोगो न संभवतीति भावः । **अयतेरिति ।** [९३-८] अयतेर्लोटो मसादेशे ' आडुत्तमस्य पिच्च ' [३।४।९२] इत्यडागमे **अयामेति रूपम् ।**

वावृधातीति । [९३-९-१०] वृधेरन्तर्ण्यर्थात् यङि ङित्त्वे छान्दसत्वात् ' रीगृदुपधस्य च ' [७।४।९०] इति रीगागमस्याप्रवृत्तौ लेटि तस्य तिपि लेटः अडागमे 'दीर्घोऽकितः' [७।४।८३] इति दीर्घे **वावृधातीति** संहितायां रूपम् । पदकाले तु ' दीर्घोऽकितः ' [७।४।८३] इत्यस्याप्रवृत्तेः **ववृधातीति** रूपम् । **यङर्थ एवेति** [९३-१०] मृज्ञार्थकत्वमेवशब्दोक्तमित्यर्थः । ॥१॥

उपेत ॥ उपमशब्द इति । [९४-१] । सादृश्यात् उपमाशब्दात् मत्वर्थे ' अर्श आदिभ्योऽच् ' [५।२।१२७] इति अच्प्रत्यये कृते निष्पन्न उपमशब्दः सादृश्यार्थ इत्यर्थः । ॥ २ ॥

नि सर्वसेनः ॥ न्यषक्तेति । [९४-४] षञ्जेर्लुङि व्यत्ययेनात्मनेपदे ' झलो झलि ' [८।२।२४] इति सिज्लोपे ' अनिदितां ' [६।४।२६] इति न लोपे अडागमे न्यषक्त इति रूपम् । ननु श्रुतौ न्यषक्तेति लुङन्तपदश्रवणात् भाष्ये वावृधेत्येव प्रतिपदं देयम् । वक्ष्यतीति

लङन्तपददानं कथमित्यत आह । वृष्टीति श्रवणादिति । [९४-५] अशेषतः शत्रून् हन्तुमिति अध्याहार इति भावेन व्याख्याय प्रकारान्तरेण व्याख्याति । यद्वेति । [९४-५] अत्राध्याहारणेति [९४-५] प्रक्षिप्तम् । लाभ इति भावेनेत्युच्छिन्नम् । ततश्चैवं टीकावाक्यपाठः । यद्वा नीत्युपसर्गश्रवणात् ससाधनक्रियालाभ इति भावेनोक्तमिति । अवश्यं चैतदेवं विज्ञेयम् । पूर्वमध्याहारस्योक्तत्वेन पुनस्तदभिधानायोगात् । उपसर्गाणां क्रियावाचनाभावे ससाधनक्रियावाचित्वेन नीत्युपसर्गस्य ससाधनक्रियाध्याहारज्ञापकत्वायोगाच्च । अदोष इतीति । [९४-९] इह स्वामित्वरूपार्थस्य विवक्षितत्वात् अर्य इति रूपमुपपन्नमिति भावः चोष्कूयमाण इति । [९४-१२] धातूना नेकार्थत्वात् दानार्थकात् च्कुञः यकि तस्य द्वित्वे 'गुणो यङ्लुकोः' [७।४।८२] इति अभ्यासस्य गुणे लटि तस्य शानचि 'आने मुक्' [७।२।८२] इति मुकि चोष्कूयमाण इति रूपम । अधिशब्दः अधिकृत्येत्यर्थकः । तस्य सकर्मकत्वात् अस्मानिति वक्तव्यम् । अस्मादिति पञ्चमी कथमित्यत आह । द्वितीयार्थ इति । [९४।१२] अनेन "अस्मदधी"त्यस्यास्मा नधिकृत्येत्यर्थ उक्तो भवति । अस्मदधीत्यस्य तात्पर्यार्थमाह । ' अस्मान्प्रतीति । [९४-१२] 'अस्मदधी'त्यस्य महातात्पर्यमाह । महतेति । [९४।१३] ॥३॥

वधीर्हि ॥ अयज्युं चापीति । [९४-१६] इति ग्राह्यमिति शेषः अघन्तेति । [९४-१७] हन्तेर्लिटि सिपि तस्य थलि द्वित्वे ' अभ्यासाच्च ' [७।३।५५] इति हकारस्य झत्वे नकारस्यानुस्वारे जघंथेति रूपम् । धिनोते रूपामिति । [९४-१८]

धिनुपुष्टावित्यत उप्रत्यये इकारस्याकारे षष्ठ्येकवचने धनोरिति रूपम् ॥ ४ ॥

पराचित ॥ निरधम इति । [९५-२] निःपूर्वाद्धमेर्लङि सिपि अडागमे निरधम इति रूपम् । ॥ ५ ॥ ॥ ॥ १ ॥

अयुयुत्सन् ॥ अयुयुत्सन्निति । [९५-५] युध संप्रसार इत्यतः सनि द्वित्वे धकारस्य 'खरि च' [८।४।५५] इति चर्त्वे लङो झस्यान्तादेशे अडागमे शपि 'अतो गुणे' [६।१।९७] इति पररूपे अयुयुत्सन्निति रूपम् । क्विबन्त इति । [९५-८] वेदे युधेः क्विपि तस्य लोपे वृषऽयुध इति हलन्तः शब्दः भाष्ये तु योधेति अकारान्तः शब्द इत्युक्तम् । निरष्टा इति । [९५-९] अशेः-प्रत्यये 'ग्रश. ' [८।२ ३६] इति षत्वे ष्टुत्वे निरा योगे निरष्टा इति रूपम् । ॥ ६ ॥

त्वमेतान् ॥ अयोधय इति । [९५-१३] युधेर्ण्यन्ताल्लङि सिपि शपि अडागमे अयोधय इति रूपम् । ॥ ७ ॥

चक्राणासः ॥ नहिवृतीत्यादिनेति । [९५-२०] 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' [६।३।११६] इति सूत्रम् । तस्यार्थः । नहिवृतिवृषिव्यधिरुचिसहितानि इत्येतेषु उत्तरपदेषु पूर्वपदस्य दीर्घो भवतीति । (परीणहम्) चक्राणास इति [९५-२०] कृञः लिटि तस्य कानजादेशे जसि 'आज्जसेरसुक्' [७।१।५०] इति असुगागमे चक्राणास इति रूपम् । हिन्वानास इति । [९५-२२-२३] हिगतावित्यस्मात् लटि तस्य शानजादेशे श्नुप्रत्यये 'हु श्नुवोः सार्वधातुके' [६।४।८७] इति यणादेशे जसि 'आज्जसेरसुक्' [७।१।५०]

इत्यङ्गागमे हिन्वानास इति रूपम्। ननु परस्परेणेति तृतीया कथमित्यत आह। परस्परेणेति। [९५-२३] विभक्तिप्रतिरूपकमव्ययमित्यर्थः। तितिरुरिति। [९५-२४] तॄच्छवनस्तरणयोरित्यतः लिटि तदादेशप्रक्रियायां छान्दसे "ऋच्छत्यृताम्" [७।४।११] इति गुणाभावे 'ऋत इद्धातोः' [७।१।१००] इति इत्वे द्विर्वचने तितिरुरिति रूपम्। ॥८॥

परियत्॥ ननु भुजेर्लुङि(च्लेः)सिचि(तिङः) ईडागमे सिचः इडागमे च इट ईटि [८।२।२८] इति सिचो लोपे अङ्गागमे च भोजीरिति भाव्यम्। कथं द्विर्वचनमित्यत आह। छान्दसमिति। [अधुभोजीः] [९६-३] ॥९॥

नये दिवः॥ यच्छ्रुतेः सिद्धेनेति। [९६-७] यत्तदोर्नित्यसंबन्धात् यच्छब्दश्रवणेनावश्यवक्तव्यतया सिद्धेन तत्पदेनेत्यर्थः। स्वयं विशेषतो व्याख्यास्यति। दिवः स्वर्गस्येति। [९६-९] अधुक्षदिति [९६-१३] दुहेर्लुङि च्लिप्रत्यये तस्य 'शल इगुपधादनिटः क्सः' [३।१।४५] इति क्सादेशे 'दादेर्धातोर्घः' [८।२-३२] इति हस्य घत्वे 'एकाचो बशोभष् झषन्तस्य स्ध्वोः' [८।२।३७] इति भष्भावे "खरि च' [८।४।५५] इति चर्त्वे 'आदेशप्रत्यययोः' [८।३।५९] इति सस्य षत्वे अङ्गागमे अधुक्षदिति रूपम् ॥१०॥२॥

अनुस्वधाम्॥ एकवाक्यतासिद्धय इति [९६-१६] अध्याहाराभावे अस्य कर्माणि सौख्यमेवाधारयन्निति एकवाक्यम् इन्द्रः योवर्धत तमहन्नित्यपरं वाक्यमिति वाक्यभेदः स्यात् यस्येत्यध्याहारे तु यस्येन्द्रस्य कर्माणि सौख्यमधारयन् स इन्द्र इति एकवाक्यता स्यादिति

भावः । नौ वयोधर्मेत्यादिनेति । [९६-२१] 'नौवयोधर्मविष-मूलमूल्यसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाभ्यसमसमितसम्मितेषु ' [४ ४-९१] इति सूत्रम् । तस्यार्थः । नावादिभ्योऽष्टभ्यः सूत्रेभ्यः अष्टस्वेव तार्यादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवतीति ॥ ११ ॥

न्याविध्यत् ॥ इगुपधलक्षणः कः इति । [९६-२५] 'इगुपधाज्ञाप्रीकिरः कः' [३-१-१३५] इति कप्रत्यय इति भावः । शुषेर्नागीति । [९७-१] 'तृषिशुषिरसिभ्यः कित्' [उ० २९९] इति अनेन सूत्रेण शुषेर्नक्प्रत्यये कित्त्वाद्गुणाभावे शुष्णामीति रूपमिति भावः । यावदवधारण इति । [९७-६-७] स्मरणादिति । [९७-७] 'यावदवधारणे' [२-८] इति सूत्रेण यावच्छब्दस्य सामस्त्यरूपावधारणार्थे अव्ययीभावसमासविधानात् यावदिति भिन्नपदस्यापि सामस्त्यरूपार्थो वक्तुं शक्य इति भाव ॥१२॥

अभि ॥ ननु यजतेर्लङि शपिगुणे अयादेशे अडागमे अनयदिति भाष्यम् अजिगादिति कथमित्यत आह । अलाक्षणिकमिति (९७-११) गागमः शबभावश्चेत्येतत् छान्दसमित्यर्थः वृषभेणेति । (९७,११) 'ऋषिवृषिभ्यां कित्' (उ० ४१०) इत्यौणादिकसूत्रेण वृषेरमच्प्रत्यये कित्त्वाद्गुणाभावे तृतीयैकवचने वृषभेणेति रूपम् । व्यत्ययेनेति । (९७।१६) अदेरकारस्यादिशकारात्परत्वेन दकारस्थाकारस्य दीर्घत्वेन चेत्यर्थः । (शाशदानः) ॥ १३ ॥

आवः ॥ ननु कृञः शतरि कुर्वाणमिति भवेत् चाकन्निति कथमित्यत आह । करोतेरिति । [९७-२०] कृञः शतरि छान्दसे द्विर्वचने अभ्यासस्य दीर्घे चुत्वे शकारस्यलोपे चाकन्निति रूपम् । चाकन्निति लाक्षणिकोऽयं प्रयोग इति मत्वेन शब्दसंबन्धं दर्शयति ।

कुर्वन्निति । [९७-२०] युक्तामिति । [९७-२१] चाकभितस्य स्वतन्त्र इति व्याख्यानं युक्तमित्यर्थः । चाकन् कुर्वन् इति । [९७-२१] अत्र चाकन् स्वतन्त्र इत्येव टीकावाक्यपाठः । ननु कुर्वन्निति । भाष्यकृता चाकभित्यस्य स्वतन्त्र इत्यर्थाभिधानात् । प्रागव्याख्यातत्वादिति । [९७-२३] प्रागव्याख्यातत्वादनुवाद्व्याजेन व्याख्यानं कृतामिति भावः । ढगिति । [९७-२५] ढस्य ' आयनेयी ' [७।१।२] इति सूत्रेण एयादेशेः ' किति च ' [७।२।११८] इति वृद्धि श्रीति द्रष्टव्यम् (शैत्रेय) वक्ष्यत इति । [९७-२५] रमणाद् रेफ उक्त इत्यत्रेति शेषः । भावे कृत्य इति । [९७-२६] भावेण्यर्थादित्यर्थः । (ण्यत्प्रत्यय इत्यर्थः) (छ मं. मंजरी) उभयत्रेति । [९८-१] नञ्ततत्स्थाविल्युभयत्र सबन्ध इत्यर्थः । ननु आत्मानमधिकृत्येति विग्रह समासे ' अनश्च ' [५।४।१०८] इति टचि 'नस्तद्धित' [६।४।१४४] इति टिलोपे अध्यात्मशब्दस्याकारान्तत्वात् ' नाव्ययीभावादतोऽमृत्वपञ्चम्याः [२।४।८३] इति विभक्तेरमादेशेन भाष्यमित्यत आह । तृतीया सप्तम्योरिति । [९८-२] ॥१४॥

आवः शमम् ॥ कथं संततिरिति । [९८-११] कथं संततिस्तुग्व्याख्येत्याशङ्कापरिहारार्थं दीर्घकालेत्युक्तामिति भावः ' तुग्राद्घन ' [४।४।११५] इति घनिति । [९८-१२] ' आयनेयी. ' [७।१।२] इत्यादिसूत्रेण घस्येयादेशे इकारस्यलोपे " यस्येतिच " [६।४।१४८] इति अकारस्य लोपे तुग्व्याख्विति छन्दसि रूपामिति भावः । पररूपमिति । [९८-१६] सप्तकहारस्य टेः पररूपमित्यर्थः । अत्रापीति । [९८-१७] [illegible]

पररूपमित्यर्थः अपत्यार्थे घ इति (मंत्रार्थमंजरी पाठोप्येवम् मुद्रित पुस्तके तु अपत्य मित्यर्थेष्यः इति) [९८-१७] घस्येयादेशे इकारलोपे श्वित्र्यमिति रूपम् । शत्रुवदाचरतामित्युक्तेः प्रयोजनमाह । नहीति । [९८-१९] अकरिति । [९८-२०] कृञो लङि तस्य सिपि अडागमे उविकरणलोपे विसर्गे अकरिति रूपम् । ॥१५॥ ॥३॥ ॥१॥

त्रिश्चित् ॥ ननु 'न लोपो नञ' [६।३।७३] इति न लोपेन भाष्यमित्यत आह । न भ्राण्नपाद् [६।३।७५] इति [९८-२५] यन्त्र नियमनामिति । [९९-२] नियमनसाधनमित्यर्थः ॥१॥

त्रयः ॥ प्रकारान्तरेणायुधत्रयस्य पविशब्दार्थत्वमाह । अत्र वज्र इतीति । [९९-९] ननु त्रिवेणव इत्यत्र त्रयो वेणवः समाहृता इतिविगृह्य 'तद्धितार्थोत्तरपदसमाहारे च' [२-१-५१] इति समासे 'संख्यापूर्वो द्विगुः' [२-१-५२] इति द्विगुसञ्ज्ञायां 'द्विगुरेकवचनम्' [२-४-१] इत्येकवद्भावे 'स नपुंसकम्' [२-४-१७] इति नपुंसकत्वे च त्रिवेणु इति भाष्यं त्रिवेणव इति कथमित्यत आह । त्रयश्चत इति [९९-१०] न प्रत्यय इति । [९९-१३] वी धातोर्नप्रत्यये गुणे टापि च वेनामिति रूपम् । आरम इति शब्द मकारान्तप्रातिपदिकात् चतुर्थ्येकवचने निष्पन्न इति भावेनाह । सपदादीति । [९९-१४] ॥२॥

समाने ॥ दोषा इति । [९९-२१] विभक्तिप्रतिरूपकमव्ययं द्रोषेति अव्ययपर्यायं इति भावेनाह दोषा रात्राविति । [९९-२५] ॥३॥ ४ ॥

त्रिर्वर्तिः ॥ शिक्षतम् शिक्षयथ इति । [१००-२] लोडर्थासंभवात् लटा व्याख्यातमिति वोच्यम्। धातोश्चुरादित्वात् ण्यन्तप्रयोगः ॥ ४ ॥

त्रिर्नो रयिम् ॥ सूरेः सूर्यस्येति । [१००-९] सूरिशब्दः सूर्यशब्दपर्यायः तस्य षष्ठ्येकवचने गुणे षष्ठ्याः लुकि सूरे इति रूपम् ॥ ५ ॥

त्रिर्नो अश्विना ॥ शुभस्पती इति । [१००-१५] षष्ठ्येकवचनान्तस्य भकारान्तस्य शुभ्शब्दस्य व्याख्यानं शुभस्पेति । इतः परं टीकायां श्रूयमाणं पारस्करादित्वात्सुट् इति वाक्यं प्रक्षिप्तम् । न टीकावाक्यम् । शुभःपती इत्यस्य पदद्वयत्वेन ' षष्ठ्याः पति ' [१०३।५३] इत्यनेन विसर्गस्य सकारस्य विहितत्वात् सुडागमाभिधानायोगात् । ननु 'तवममौ ङसि' [७।२।९६] इतिषष्ठ्येकवचने ममादेशविधानात् कथ चतुर्थ्येकवचने ममादेश इत्यत आह । अस्मद इति । [१००-१६] ननु अस्मच्छब्दादपत्यार्थे अणि ममकादेशे आदिवृद्धौ मामकायेति भवेत् ममकायेति कथमित्यत आह । अणीति [१००-१९] ॥६॥४॥

त्रिर्नो अश्विना ॥ यजतेति । [१००-२१] यजेरतच्-प्रत्यये औकारस्याकारादेशे यजतेति रूपम् । सितनिगमीति । [१००-२२] सितनिगमिमसिसच्यविधाञ्कृधिम्यस्तुन् [उ. ७२] इति तुन्प्रत्यये कृते निष्पन्नो धातुशब्दः धत्त इति हेतोः कालवाचीत्यर्थः । अशायतमिति । [१०-२२] शीङो ण्यन्तात् लङादेशथसः तमादेशे अडागमे छान्दसे णिलोपे अशायतमिति रूपम् । ॥७॥

त्रिरश्विना ॥ सप्तमातृभिरिति । [१००-२४] ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेन्द्राणी चामुण्डा

सप्तमातर इत्युक्तसरस्वत्यादिमातृभिरित्यर्थः । वेद्युत्तरेयुत्का इति । 'वेद्युत्तरासदश्चैव प्राग्वंशो योनय' स्मृता' इति भाष्ये उत्तरावेदि सदो मण्टपः प्राग्वंशो [प्राग्वशाख्यः छ.] हविर्गृहात्प्राग्भाग इत्युक्ताः तिस्रः पृथिवीरित्यर्थः । ॥८॥

क्का ॥ चक्रा इत्यत्र जस अकारादेश इति भावेनाह । चक्राणीति । [१०१-२] ॥९॥

अनासत्या ॥ व्यत्ययेनेति । [१०१-५] उष' शब्दात् परा विभक्ति. सवितृशब्दाज्ज्ञेया । सवितृशब्दात्परा विभक्तिः उषस्शब्दात् ज्ञेयेति भावः । ॥१०॥

अनासत्या त्रिभिः ॥ तारिष्टमिति । [१०१-८] तृधातोर्लुङि थमस्तमादेशे सिचि तस्येडागमे वृद्धौ सिचः सस्य षत्वे छान्दसं अडभावे तारिष्टमिति रूपम् । ॥११॥

आनः ॥ जोहवीमीति । [१०१-१०] ह्वेञो यङ्लुगन्तस्य 'अभ्यस्तस्य च' [६-१-३३] इति संप्रसारणे द्वित्वे अभ्यासगुणे 'यङोवा' [७।३।९४] इति सूत्रेण ईडागमे धातोर्गुणे अवादेशे जोहवीमीति रूपम् । ॥१२॥५॥२॥

द्वयाम्यग्निम् ॥ रातेःष्ट्रू इति । [१०१-१३] 'रातेःष्ट्रू' [ ] इति रातेःष्ट्रूप्रत्यये पित्वात् ङीपि रात्रीति रूपम् । रमे ष्ट्रोडिच्चेति । [१०१-१४] उपलक्षणमेतत् । रेफात् पर आकारागमश्चेत्यपि द्रष्टव्यम् । ॥१॥

आकृष्णेन ॥ देवानितीति । [१०१-१८] इतःपरं टीकायां श्रूयमाणं अथवेतिपूर्वेणसबन्ध [१०१-१८] इति वाक्यं

प्रक्षिप्तम् । न टीकावाक्यम् । यथास्थाने संबन्धसंभवेन पूर्वेण संबन्धाभिधानायोगात् । ॥२॥

याति देवः ॥ यतत्पदमिति । [१०१-२४] आयातीति पदं ' एविगोजनार्दन ' इति पूर्वभाष्येणापि संबध्यत इत्यर्थः । पूर्वपदाकारेति । [१०१–२५–२६] भकारस्याकारलोप इत्यर्थः (शुभ्) । एतच्चाति । [१०२–३] भाष्यस्थं नित्यमिति पदं आयातीति लट् क्रियासातत्य इति ज्ञापनार्थमित्यर्थः ॥३॥

अभीवृतम् ॥ यजत इति । [१०२–६] यजेरतच्प्रत्यये यजत इत्यकारान्तं रूपम् । आस्थादिति । [१०२–८] आङ्–पूर्वात् स्थाधातोर्लुङि सिचि ' गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ' [२–४–७७] इति सिचो लुकि कृते आस्था दिति रूपम् । इदानीं तु पृथगिति । [१०२–१०] इतःपरं टीकायां श्रूयमाणं " वृत्र्यपेक्षया बहुवचनमित्यभिप्रायेण कृष्णं रजइत्युक्तं" [१०२–१०–११] इति वाक्यं प्रक्षिप्तम् ' न टीकावाक्यम् । अवश्यं चैतदेवं विज्ञेयम् । रजोगुणव्यक्तीनां बहुत्वेन रजांसीति श्रौतबहुवचनस्य न्याय प्राप्तत्वेन वृत्रापेक्षया बहुवचनमित्युक्त्ययोगात् । कृष्णशब्दे एकवचनस्यापि संभवेन कृष्णं रजइत्युक्तमिति कृष्णशब्दग्रहणवैय्यर्थ्याच्च ॥४॥

विजनात् ॥ शितिपाद इति । [१०२–१३] अयं पाच्छब्दो बहुवचनान्तः । ॥५॥

तिस्रो द्यावः ॥ द्युत्यर्थस्येति । [१०२-१८] द्युत्यर्थस्य दीव्यतेर्धातो द्यौप्रत्यये द्याव इति रूपम् । अस्य पदस्येति । [१०२-२०] भाष्यस्थविश्वस्येति पदस्य अधीशेति पूर्व-

पदेनापि सबन्ध इत्यर्थः । यच्छतेरिति । [१०२-२०] यमेपचाद्यच् इत्यर्थः । द्युत्रयाश्रयत्वादिकमिति । [१०२-२०] यद्यपि ऋचि द्योशब्द एवास्ति । न तु द्युशब्दः । द्यावं इति श्रवणात् । अन्यथा दिव इति श्रवणं स्यात् । तथापि द्योशब्दपर्यायो द्युशब्द इत्याभिप्रायेण द्युत्रयाश्रयत्वादिकमित्युक्तमिति बोध्यम् । चिकेतदिति । [१०३-८] कित ज्ञान इत्यतः लेटि तस्य तिपि इतो लोपे शपः श्लौ द्विर्वचने चुत्वे लघूपधगुणे 'लेटोऽडाटौ' [३।४।९४] इत्य डागमे चिकेतदिति रूपम् ॥ ६ ॥ ६ ॥

विसुपर्णः ॥ व्यख्यदिति । [१०३-१३] विपूर्पात् चक्षिङ्धातोर्लुङि च्लिप्रत्यये ख्याआदेशे 'अस्यति वक्ति ख्यातिभ्योऽङ्' [३।१।५२] इति च्लेरङादेशे 'आतो लोप इटि च' [६।४।६४] इति अकारलोपे अडागमे च इकारलोपे व्यख्यदिति रूपम् । ननु सूर्यः कास्तीति कश्चिकेत न कोऽपीति विपर्यये पर्यवसानसभवादयमाक्षेपोऽस्तु । अस्य रश्मिः कतमां द्यामाततानेति कथमाक्षेपः स्यात् पूर्ववत् विपर्ययपर्यवसानप्रसंगादिति भावेन शङ्कते । नन्वयमाक्षेप इति । [१०३-१९] केदानीं सूर्य इति ॥ [१०३-१९] इतःपरं कापीति [१०३-१९-२०] प्रक्षिप्तम् इति कश्चिकेतनकोऽपीति वदित्युच्छिन्नम् । ततश्चैवं टीकावाक्यपाठः केदानीं सूर्य इति कश्चिकेत, नकोऽपीतिवत् कतमां द्यां रश्मिरस्याततान कतमामपीत्यापत्तेरित्यत आहेति । अवश्यं चैवमेव विज्ञेयम् । केदानीं सूर्य इति भागे काश्चिकेतेति पदद्वयसद्भावेन शङ्कानुत्थानात् माध्यकृता कतमां द्यां रश्मिरस्याततानेति

ग्रन्थस्यैव काश्चिकेतेति पदद्वयस्यावृत्त्यान्वयमभिप्रेत्य व्यक्तिमपेक्ष्य एकमेरित्याक्षेपत्वसमर्थनाच्च । ॥ ७ ॥

अष्टौ ठ्यरञ्यत् ॥ ननु भावे करणाधिकरणयोश्च ल्युटोऽनुशासनात् कथं व्याख्यायत इत्यत आह । **कृत्यल्युट इति** [१०३-२३-२४] **यद्वा पृथुत्वादिति** । [१०४-१] अत्र यद्वेति [१०४-१] प्रक्षिप्तम् । पूर्वं एकस्यापरार्थस्यानिरूपितत्वेन "यद्वा अपर" इत्युक्त्ययोगात् । **आगादिति** । [१०४-५] आङ्पूर्वा-दिणः ध्वत्ययेन लोडर्थे लुङि 'इणो गा लुङि' [२।४।४५] इति गादेशे 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' [२।४।७७] इति सिचो लोपे अडागमादौ **आगादिति** रूपम् । दाशुष इत्यनन्तरं अध्याहार्यमाह । **दातुमिति** । [१०४-६] ॥ ८ ॥

हिरण्यपाणिः ॥ कुगतिप्रादय इतीति [२।२।१८] [१०४-७] वेर्निरादित्वात्पञ्चम्यन्तेन समास इति भावः । अत एव वार्तिककृता इदं सूत्रं निरादयः क्रान्ताद्यर्थे पञ्चम्येति व्याख्यातम् । ॥ ५ ॥ ९ ॥

हिरण्य हस्तः ॥ तदुपक्रमेति । [१०४-१९] राज्युपक्रमराज्युपसंहाराद्युपलक्ष्येत्यर्थः । **भेदावश्यंभावादिति** । [१०४-२२] बाधकाभाव इति शेषः ॥ १० ॥

ये ते पन्थाः ॥ रजःशब्द इति । [१०५-३] रज इति शब्दो यस्येति रजःशब्दार्थं इत्यर्थः । एतेन — रजःशब्दस्या-न्वयप्रतियोगित्वाभावेन तत्तल्लक्षणाभिधानमयुक्तमिति — परास्तम् । रज शब्दार्थस्यैव लक्ष्यत्वाभिधानात् । को रजःशब्दार्थ इत्यत आह । **तस्य चेति** । [१०५-३] **तदाहितेति** । [१०५-३] मार्गस्य

पुरुषो विशेषणम् । पुरुषस्यारागत्वं रजोगुणशून्यत्वं विशेषणम् । एवं च विशेषणपरपरासबन्धविवक्षया विशेषणत्वेनोक्तमिति भावः ॥ ॥ ११ ॥ ७ ॥ ३ ॥ ७ ॥

भावे कृत्य इति [१०५-९] जप्यस्येत्यत्र जपेः पोरदुपधादिति [३।१।८६] भावे यत्प्रत्यय इत्यर्थः । प्रमाणं त्विति । [१०५-१२] अस्माभिर्यत् ऋष्यादिकमुच्यते तत् ऋक्-संहितादिग्रन्थानुसारेणोच्यत इत्युक्तार्थं प्रमाणं पूर्वमेवोक्तमिति भावः । प्रवः ॥ द्वितीयान्तस्य देवशब्दस्येति [१०५-१३] देव-शब्दस्य यतीशब्देन समास इत्यन्वयः । अनेन देवान्यन्तीति देवयत्य इति विग्रहः सूचितः । इणः शतरि 'इणोयण्' [६।५।८१] इति यणादेशे 'उगितश्च' [४।१।६] इति ङीपि यती तिरूप मिति ज्ञेयम् । ननु 'अभिपूर्वः' [६।१।१०७] इति सूत्रेण यद्नुमिति माव्यमित्यत आह । छन्दसीति । [१०५-१५] ॥ १ ॥

जनासः ॥ अन्तर्णीतेति । [१०५-२१] वृद्धेरिति शेषः । सहो वर्धयतीति सहोवृत् इतिविग्रहो बोध्यः । उभयत्रेति । [१०५-२१ [व्याख्यानद्वयेऽपि इगुपधलक्षणः कः तथा च सहोवृध शब्द आकारान्त इति भावः ॥ २ ॥

प्रत्वा ॥ महच्छब्दपर्यायो हकारान्तो महशब्द इति भावेनाह । महो महत इति । [१०५-२३] ॥ ३ ॥

देवासः ॥ ददाशेति । [१०५-२५] दाशतेर्लिटि द्वित्वादौ ददाशेति रूपम् ॥ ४ ॥

मन्द्रः ॥ ननु मन्द्रशब्दस्य महामस्त्र इति व्याख्यानं कृतम् । महत्त्वं केनोक्तमित्यत आह । अन्येनेति । [१०६-१] अलाक्षणि

केन नुगागमेनेत्यर्थः । मतुपपर्यायेण रप्रत्ययेन वा महच्चमुक्तमित्याशयेन वाह । भूमेति । [१०६-१] ॥ ५ ॥ ५ ॥

त्वे इत ॥ यजतेर्लटीति [१०६-४] यजेर्लटि शपोलुकि 'ग्रश्च ' [८।२।३६] इति षत्वे 'षढोः कःसि' [८।२।४१] इति कत्वे 'आदेशप्रत्यययोः' [८।३।५२] इति सिपःसकारस्य षत्वे यक्षीति रूपमिति भावः ॥ ६ ॥

तं घ । पूर्वं संसुतेस्तीर्णा हीत्युक्तम् । इदानीमर्थान्तरं किं वक्तव्यमिति भावेन पृच्छति । कोऽर्थ इति । [१०६-११] ॥७॥

ब्रन्तः ॥ पूर्वाभ्यस्तेति । [१०६-१७] पूर्वाभ्यस्तवेदान्तरात्यन्तसादृश्यवत्य इत्यर्थः । एतेन ' जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः । मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः' इतिप्रमाणेन प्राक्तनमेव वेदमधीमहे इत्यनुभवेन च पूर्वोत्तरवेदैक्यस्य सिद्धत्वादभ्यस्तवेदसादृश्याभिधानमयुक्तमिति परास्तम् । वेदलक्षणमिहास्तीति ज्ञापनाय वेदान्तरसादृश्यमेवेहोक्तत्वात् । गोशब्दस्य ज्ञानवाचित्वमङ्गीकृत्य गविष्टिष्विति पदं व्याख्याय शब्दवाचित्वमङ्गीकृत्य ततःकण्वाभिस्सरन्ति [भा.] इत्यनेन गविष्टिष्वित्यस्य तात्पर्यमाहेत्याह । यद्देति । [१०६-१८] अनेन गविष्टिष्वित्यस्य शब्दान्वेषणेष्विति व्याख्यानं सूचितमिति द्युम्नं द्युतिरिति [१०६-१८] द्युतेर्नक्प्रत्यये तकारस्य मकारे द्युम्नमिति रूपम् ॥ ८ ॥

संसीदस्व ॥ मियेध्येति । [१०६-१९] मेध्यशब्द मकारैकारयोर्मध्ये छान्दसे इयागमे कृते मियेध्येतिरूपम् । धूम शब्द व्युत्पत्तिं दर्शयति । धुनोतीति । [१०६-२२] रुशब्दं साधयति । घञर्थे इति । [१०६-२२] " घञर्थे कविधानम्

[वा ध्र ३।३।५८] इत्यनेन भावे क्यप्रत्यये रूषेति रूपं भवतीति भावः ॥ ९ ॥

यत्वा ॥ स इति पूर्वत्रेति । [१०७-१-२] स त्वं संसीद (स्ये) स्वेति क्यप्रत्यये रूषेति रूप भवतीति भावः ॥ ९ ॥

यमामिम् ॥ अभेदोपचारादिति । [१०७-२] कण्वो मेध्यातिथिरिति समानाधिकरण्यलब्धा भेदोपचारादित्यर्थ' । ननु ददातेः कर्मणि लिटि कथ दीदिग्युरिति रूपमित्यत आह । अलाक्षणिकमिति । [१०७-४] अभ्यासाकारस्यई (इ) कारः धात्वाकारस्येयादेश' परस्मैपदं च छान्दसमिति भाव वर्धयाम-मिति । [१०७-५] "इदं तोमसि" [७।१।४६] इति मस्प्रत्य-यस्येकारान्तत्वे वर्धयामसीति रूपम् ॥ ११ ॥

रायः ॥ पूर्धीति । [१०७-९] पृधातोर्विकरणस्य लोपे हेर्धित्वे 'उदोष्ठ्यपूर्वस्य' । [७।१।१०२] इति ऋकारस्योत्वे रपरत्वे 'हलि च' । [७।४।७७] इति दीर्घे पूर्धीति रूपम् । तथात्वे विजिति । [१०७-९] वर्धतेर्विधि तस्य सर्वस्य लोपे उपधागुणे रपरत्वे छान्दसत्वेन 'रात्सस्य' । [८।२।२४] इति नियममनाश्रित्य संयोगान्तलोपे रेफस्य विसर्गे स्वधावरिति रूपम् । ननु राजसीत्यस्य राजा भवसीति व्याख्यानं युक्तं राजा भवतीति व्याख्यानं कथमित्यत आह । अस्य तात्पर्यमिति [१०७-१०] ॥ १२ ॥

ऊर्ध्वः ॥ अन्नस्य सनितेति । [१०७-११] इतःपरं टीकायां श्रूयमाणं सनायितेति पदं प्रक्षिप्तम् । अवश्यं चैतदेवं विज्ञे-

---

टीप- १ पृधधातो

यम् । भाष्ये वाजस्य सनितेत्यस्याभदातेत्यर्थस्योक्तत्वेन सनयितेति-णिजन्तप्रतिपदोक्त्ययोगात् । न सवितेत्यत्र नशब्दार्थमाह [1]यथेति । [सविता देवो न सविता देवो यथा ।] नशब्द इवार्थ इति भावः । न सवितेति वाक्यार्थमाह । विष्णुवदिति । [१०७-१२] वाघद्भिरिति [१०७-१३] वदेः शतरि भिसि घात्वकारस्य दीर्घे दकारस्य धत्वे वाघद्भिरिति छान्दसं रूपम् । ॥ १३ ॥

उध्वोंनः ॥ अग्निणामिति औत्रं रूपं साधयति । अस्मादि-नीति । [१०७-१७] भाष्यगतमत्रय इति इकारान्तरूपं साधयति। इकारोप्येवमिति । [१०७-१७] अदेरिनिप्रत्ययवत् इकारोऽपि प्रत्ययो भवतीति भावः । चरथायेति । [१०७-१८] चरेः थप्रत्यये चतुर्थ्यैकवचने चरथायेति रूपम् । विदा इति । [१०७-२०] विदेर्लटि तस्य सिपि आडागमे तुदादित्वाच्छप्रत्यये गुणा-भावे आगमनशासनस्यानित्यत्वान्नुभावे विदा इति रूपम् । ॥ १४ ॥

पाहि ॥ अन्प्रत्यय इति । [१०७-२२] कनिन् प्रत्यय इत्यर्थः । तेनाकारलोपो नकारस्य लोपश्च सिध्यति । ॥ १५ ॥ १० ॥

घनेव ॥ शो तनूकरण इत्यस्येति । [१०८-४-५] अस्माल्लटि व्यत्ययेनात्मनेपदे व्यत्ययेन श्नपः श्लौ धात्वोकारस्य छान्दसे ईत्वे द्वित्वचनादौ शिशीत इति रूपम् । ईशतेति । [१०८-५] अस्माल्लङि(?)व्यत्ययेन ध्लेरङादेशे ईशतेति रूपम् । ॥ १६ ॥

अभिर्विन्ने ॥ अन्तर्णीतण्यर्थस्येति । [१०८-६] वनतेर्लिटि तदादेशतकारस्य एसि द्वित्वे छान्दसे उपधालोपे वन्ने इति

टीप- १ सविता देवो यथा (मंत्रार्थ मंजरी) इति टीका पाठो भवेत्

रूपम् । उपस्तुतं मुनिं चेति । [१०८ ८] इतःपरं टीकायां श्रूयमाणं सातेति पदं प्रक्षिप्तम् । ततश्चैवं टीकावाक्यपाठः । उपस्तुतिं मुनिं च सातौ लाभे विषये प्रावदिति [१०८-८] । अवश्यं चैतदेवं विज्ञेयम् । साता उपस्तुतमित्यत्र पदकाले सातावित्येव पदस्य पठ्यमानत्वात् । भाष्ये आचार्यैः सातावित्यनूद्य लाभ इति व्याख्यानस्य कृतत्वाच्च ॥ १७ ॥

आग्निना ॥ ननु यदुशब्दस्य यदस्ति तस उश्चत्वादितिविगृह्य कथं समासः विधायकाभावादित्यत आह। मयूरव्यंसकादित्वादिति [१०८-११] "अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः" इति काशिकोक्तेः "मयूरव्यंसकादयश्च" [२-१-७२] इति समास इति भावः । नयेतिद्विकर्मकत्वे दृष्टान्तमाह । अजां ग्राममिति । [१०८-१४] ॥ १८ ॥

नि त्वाम् ॥ ननु दीधीङः लटः थासि तस्य से इत्यादेशे शपो लुकि षत्वे दीधीषे इति भाष्यं कथं दीदेथेति इत्यत आह । व्यत्ययादिति । [१०८-१९] दीधीङः व्यत्ययेन परस्मैपदे मध्यमपुरुषबहुवचने धकारस्य दकारे गुणे दीदेथेति रूपमिति भावः ॥१९॥

त्वेषासः ॥ अमवन्त इति । [१०८-२१] माङ्मान इत्यतो भावे किपि माशब्दो ज्ञानवाची । ततोमतुपि नञ्समासे अमावन्त इति रूपम् । छान्दसे ह्रस्वत्वे अमवन्त इति रूपम् । ननु हिंसनाशब्दः नञ्युक्तः । ङीप् प्रसंगात् । किन्तु 'न्यासश्रन्थोयुच्' [३।३।१०७] इति सूत्रविहितयुजन्तः । ततश्च प्रयोजकव्यापारस्य हिंसनाशब्दवाच्यत्वं वक्तव्यं स्यादित्यत आह । स्वार्थे णिजितीति । [१०८-२४] ॥२०॥ ॥११॥ ॥४॥

क्रीळं वः ॥ ननु क्रीळमित्यस्य क्रीडाशीलमिति व्याख्यानमयुक्तम्। ताच्छील्ये अच्फयोरविधानादित्याशङ्क्ते। यद्यपीति। [१०९-५] परिहारमाह। तथापीति। [१०९-५] न प्रत्ययार्थत्वेन ताच्छील्यमुक्तम्। किं तु स्वरूपकथनाय आचार्येणैवमुक्तमिति भावः। ॥१॥

ये ॥ उत्तरत्र संबन्ध इति। [१०९-११] ये इत्यस्येतिशेषः। तथाचय एवमजायन्त ते यद्वदन्ति तदिहैव श्रूयत इति उत्तरऋचां संबन्ध इत्यर्थः। ॥२॥

इहेव ॥ लेट्याटीति। [१०९-१४] वेदे लेटि आडागमे इरन्तादेशे 'इतश्च लोपः परस्मैपदेषु' [३।४।९७] इति इकारलोपे संयोगान्तलोपे वदानीति रूपमिति भावः। शृण्व इति ॥ [१०९-१४] श्रुणोतेः श्रुप्रत्यये 'श्रुवः शृ च' [३।१।७४] इति शृभावे कर्मणि लटस्तादेशे एत्वे तकारलोपे यणादेशे शृण्व इति रूपम्। ऋञ्जन्त इति। [१०९-१७] कर्तृप्रयोगः छान्दस इति भावेनाह। ऋज्यत इति [१०९-१७] इदितः ऋञ्धातोः कर्मणि यकि नुसि ऋज्यत इति रूपम्। षष्ठन्तं प्रकृतमिति। [१०९-१९] एषामिति षष्ठयन्तं प्रकृतं अर्थवशादनेनेति तृतीयान्तमनुवर्तते। तस्यार्थः अस्मनेति भाष्यकारैरुक्त इति भावः। ॥३॥

प्रवः ॥ ननु 'वेरपृक्तस्य' [६।१।६७] इति वेर्लोपः स्यादित्यत आह। जागृविरिति यथेति। [१०९-२०] जागर्तेर्विहितस्य क्विनो विशब्दस्य 'उणादयो बहुलम्' [३।३।१] इत्युक्तत्वात् यथालोपो न भवति तथात्रापि वेर्लोपो न भवतीति भावः निर्वचनमिति। [११०-१] देवेषु ततमिति पूर्वोक्तमेव निर्वचनम्

इदंत्विति [११०-१] देवैरधीयमानत्वादित्येतत्तु देवेषु तत्तेरुपपादकमिति भावः । ॥४॥

प्रशास ॥ शर्धशब्दस्य नपुसकत्वात् विशेष्यं नपुसकशब्देनाह । यच्च वस्त्विति । [११०-२] अघन्यमिति । [११०-३] । हन्तेर्मोनेकप्रत्यये उपधालोपे हकारस्य कत्वे घ्नेति रूपम् । अहर्शिं यत्प्रत्यये नञ् समासे अघन्येति रूपम् । मारुतशब्दसिद्धिं स्मारयति रुशब्द इति । [११०-४] ।५॥ ।१२॥

क्रोवः ॥ व इति निर्भारणषष्ठीत्यभिप्रेत्याह । वो मध्य इति । [११०-६] ॥६॥ निंवः ॥ नीचैश्चत इति [११०-१५] नीचैरसुरैर्मरुता भवता प्रतियोगित्वेन भवन्मार्गस्य प्राप्त्यर्थं भवतां रोपज्ञननार्थं च कस्मिन् मानुष निदध्रे स्वीकृत इति भावः । ॥७॥

येषाम् ॥ जीर्यते क्रसौ रूपमिति [११०-१९] जुधातोर्लिटि तस्य क्रसौ 'बहुल छन्दसि' इति अकारस्य उत्वेद्वित्यादौ 'उगिदचाम्' [७।१।७०] इति नुमि जुजुर्वाणेति रूपम् । उत्तरत्र संबन्ध इति । [११०-२०] एषामिति पदस्य उत्तरऋचा सबन्ध इत्यर्थः । संबन्धप्रकारस्य एषामुक्तगुणाना वो(वः)जान स्थिरमिति वक्ष्यते । ॥८॥

स्थिरं हि ॥ हेतौ कर्मप्रवचनीय इति । [१११-१] 'अनुर्लक्षणे' [१।४।८४] इति अनुशब्दो हेतौ कर्मप्रवचनीय इत्यर्थः ॥९॥

उदुत्ये ॥ अततेर्लङीनि । [१११-४] अततेर्लङि व्यत्ययेन आविकरणे "भाभ्यस्तयोरातः" [६।४।११२] इति आकारलोपे आत्मनेपदश्नस्यादादेशे छान्दसे अडाभावे अत्नतेति रूपम् ।

अभिष्टु इतिरूपं साधयति। अभिपूर्वादिति। [१११-५] पूर्वत्रोक्त इति। [१११-७] पूर्वस्यां ऋचि प्रज्ञाबलमाहुबल-रूपो हेतुः व्याख्यानदिग्विजये उक्त इत्यर्थः। ॥१०॥ ॥१३॥

त्यंचित् ॥ भावे म इति। [१११-१०] ' अर्तिस्तुसु-धृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ' [उ. १३७] इति भावे मन्प्रत्यय इति भावः ॥११॥

मरुतः ॥ च्यवतेर्णयन्तादिति। [१११-१२] च्युङ् गतावित्यतो णिजन्तात् लुङ् मध्यमपुरुषबहुवचनस्य ' तस्थस्थ . ' [३।४।१०१] इति तादेशे तस्य तनादेशे च्लिप्रत्यये तस्य ' णिश्रि-द्रुस्रुभ्यः कर्तरिचङ् ' [३।१।४८] इति चङादेशे ' चङि ' [६।१।११] इति द्विर्वचने णिचप्रयुक्तचङौ आव् आदेशे " णौचङ्युपधायाः ह्रस्वः " [७।४।१] इति ह्रस्वे व्यत्ययेन चङ् ईकारे अडागमे अचुच्यु-वीतनेति रूपम् ॥१२॥

यद्ध। श्रुणोतीत्येकवचनं बहुवचनार्थ इति भावेनाह। श्रुणोति शृण्वन्ति हीति। [१११-१५-१६] ॥१३॥

प्रयात ॥ तत्र इति [१११-१७] यद्यपि तत्रो इत्येकं पदं तथापि तत्रेत्यस्य उइत्यनेन समासे गुणे तत्रो इति समस्तपदं जातमिति ज्ञापयितुं तत्र उ इत्युक्तम् ॥१४॥

अस्ति ॥ स्महीति [१११-१९] ' इदंतोमसि ' [७।१।४६] इति वचनात् स्मसीति रूपम् ॥१५॥ ॥१४॥ ॥५॥

कद्ध ॥ दधिध्व इति। [१११-२२] धाञो लटि ध्वमः ' टितआत्मनेपदानाम् ' [३।४।७९] इत्येत्वे शपः श्लौ " छन्द-स्युभयथा ' [६।४।११७] इति ध्वम आर्धधातुकत्वादिडागमे अतो-

लोपे दधिध्व इति छन्दसि रूपम्। भाषायांतु ध्वमः सार्वधातुकत्वात् इडागमाभावे 'भाभ्यस्तयोरातः [६।४।११२] इत्याकारलोपे 'दधस्तथोश्च' [८।२।३८] इति मधूभावे धवृध्व इति रूपम् सप्तम्यर्थे इति। [१११-२५] उक्तं बर्हिर्येषु इति विग्रह इति भावः ॥ १ ॥

क्व नूनम् ॥ रण्यन्ति रणन्तीति। [११२ ३] रणतेर्ण्यत्यये न्यनि रण्यन्तीति रूपम्। ण्यपि रणन्तीति रूपम् ॥२॥

क्व वः ॥ कस्मिन्नाचार्य इति। [११२-८] कस्मिन्नाचार्ये निमित्ते सति तच्चोपदेशके सतीति यावत्। परमात्मा ज्ञापकस्यादित्यर्थः। ॥३॥

यत्॥ पृच्छतिरीति। [११२-१२] "घृणिपृश्निपार्श्णिचूर्णिभूर्णि" [उ० ५२६] इति निपातनात् प्रच्छतेः निङ् इति भावः। ननु 'नद्यृतश्च' [५।४।१५३] इति सूत्रेण ऋकारान्तात् बहुव्रीहेः कप्रत्ययविधानात् पृश्निमातृका इति भाष्यमित्यत आह। समासान्ताभाव इति। [११२-१३] ननु 'अपृक्तनृतज्' इति संबुध्यतिरिक्तसर्वनामस्थाने दीर्घविधानात् पृश्निमातार इति दीर्घेण भाव्यमित्यत आह। उभयत्रेति। [११२-१३] तत्पुरुषे बहुव्रीहौ चेत्यर्थः। ॥४॥ मावः। यत्परानिन्देति॥ [११२-२२] अस्तोतुर्व्याघ्रादेर्निन्दा स्तोतुः प्रशंसात्रास्तीति भावः। ॥५॥ ॥१५॥

मो षु णः। पदीष्टेति। [११२-२४] पदेः आशीर्लिङि सीयुटि सकारस्य छान्दसे लोपे पदीष्टेति रूपम्। ॥६॥

सत्यम् तण्वामवन्त इति। [११२-२५] आकारस्य छान्दसे ह्रस्वत्वे अमवन्त इति रूपम्। अपत्ये घ इति। [११३-१] घस्येयादेशे रुद्रिया इति रूपम्। ॥७॥

वाश्रेव ॥ मिमातीति । [११३-५] माङोलटस्तिपि श्लौ द्विर्वचने 'सूत्रामित्' [७।४।७६] इति सूत्रे सूत्र माङ ओदाङ् इत्येतेषामभ्यासस्येत्वविधानादभ्यासस्येत्वे मिमातीति रूपम् ॥८॥

दिवाचित्॥ कृण्वन्तीति । [११३-९] कृवि हिंसाकरणयोश्चेत्यतः लटो शस्यान्तादेशे नुमागमे 'धिन्वकृण्व्योर च' [३।१।८०] इति उप्रत्यये वकारस्याकारे अतो लोपे अल्लोपस्य स्थानिवद्भावेन गुणाभावे यणादेशे कृण्वन्तीति रूपम् । ॥९॥

अध ॥ अरेजन्तेति । [११३-१०] रेजृ कम्पनइत्यस्मात् लङो शस्यान्तादेशे शप्रत्यये 'अतोगुणे' [६।१।९७] इत्यनेन पररूपेण अडागमे अरेजन्तेति रूपम् । ॥१०॥१६॥

मरुतः ॥ ननु द्वंद्वस्त्रीपैरिति समासोऽनुप्रपन्नः । केवलविशेषणयोः समासविधायकाभावादित्यत आह । बहुलवचनादिति । [११३-१५] विशेषणं "विशेष्येण बहुलम्" इति बहुलवचनादित्यर्थः । ऋचस्तात्पर्यमाह यद्रोधस्त्विति [११३-१७] यासां तीरेषु घर्मं तपः कुर्वन्तस्तिष्ठाम ता नदीः प्रतियातेत्यर्थः । ॥११॥

स्थिरावः ॥ इकारस्योकारोऽत्ययेनेति भावेनाह । सन्तुसन्तीति । [११३-१९] ॥१२॥

अच्छ ॥ तनेतिरूपसिद्धिमाह । तनोतेरिति । [११३-२१] अत्र "ततः स्त्रीलिङ्गात् तृतीयायाः याडाप इति नाश्रितं" [११३-२१] इति न टीकावाक्यम् । अपितुप्रक्षिप्तम् । अवश्यं चैतदेवं विज्ञेयम् । तृतीयैकवचनस्य द्विवचनत्वाभावेन अग्रसक्तस्य सूत्रस्याश्रयणप्रतिषेधायोगात् । न च तृतीयैकवचनस्य आडिति संज्ञायाः पूर्वाचार्यैः कृतत्वात् द्विवचनत्वमस्तीति वाच्यम् । पूर्वाचार्यसंज्ञया डित्संज्ञाया अभ्यर्थत्व-

लामेऽपि ङित्त्वचनत्वालाभात् ततः स्त्रीलिङ्गाततृतीयायाः डा इत्युच्छिन्नम्। तत्रैव टीकावाक्यपाठः। तनोतेः पचाद्यच्। ततः स्त्रीलिङ्गाततृतीयाया डा इति। अस्यायमर्थः। तनोतेः पचाद्यच् भवति 'धञजपाः पुंसि' [१] इति वचनस्यानित्यत्वात् 'अजाद्यतष्टाप्' [४।१।४] इति टापू भवति ततस्तृतीया तस्यां 'सुपां सुलुक्' [७।१।३९] इति डादेशोभवतीति। सुपां सुपो भवन्तीति। [११३-२२] सुपांसुपोभवन्तीत्यादेशविधानात् तृतीयादेशभूता चतुर्थी स्वान्यार्थे वर्तत इत्यर्थः। तृतीयेति। [११३-२३] स्थानिभूता तृतीया कस्मिन्वर्तत इत्यर्थः। माभूदिति। [११३-२३] तृतीयाविभक्त्यादेशरूपा चतुर्थी मा भूदित्यर्थः। इत्थंभूतलक्षणार्थेति। [११३-२४] फलदानसमर्थत्वरूपं कंचित् प्रकारं प्राप्ता फलदानसमर्था इत्थंभूता गीः तस्याः ज्ञापकं संस्तुतित्वं तद्वाचकशब्दे चतुर्थी भवतीति भावः। जरायै गिरा इत्यस्य कोऽर्थः संपश्च इत्यत आह। ततः कोऽर्थ इति। [११४-१] संस्तु (तीति) तित्वेति। [११४-१] फलदानसमर्थनार्थत्वज्ञापकसंस्तुतित्वोपेतयागिरेत्यर्थः संपश्च इति भावः। विष्णुशब्दविवक्षितभगवद्रूपविशेषमाह। ब्रह्मणस्पतीति। [११४-४] ॥ १२ ॥

मिमीहि ॥ गायेति। [११४-१०] गैधातोः लोटि सिपि शपि सेर्हित्वे हेर्ह्लुकिश्यादेशे गायेति रूपम्। ॥१४॥

वन्दस्व ॥ अस्मात कर्मणीति। [११४-१२] इनिप्रत्ययः ककारागमश्चेति भावः। (अर्किणः) असन्निति। [११४-१३] अस्तेर्लृङि तस्य सि इत्यादेशे इकारलोपे 'भसोरल्लोपः'

[६।४।१११] इत्यकारलोपे आडागमे तस्य छान्दसे ह्रस्वत्वे आसन्निति रूपम् । ॥१५॥

प्रयत् ॥ क्रत्वेति । [११४-१८] छान्दसत्वात् 'आङोनास्त्रियाम्' [७।३।१२०] इत्यस्याप्रवृत्तौ यणादेशे क्रत्वेति रूपम ॥१॥

स्थिरावः ॥ पनतेरिति । [११४-२४] पनतेरीयसुनि 'उगितश्च' [६।३।४५] इति ङीपि पनीयसीति रूपम् । ॥२॥

परा ॥ वियाथनेति । [११५-२] यातेर्लटः मध्यमपुरुषबहुवचनथादेशे तस्य थनादेशे शपो लुकि वियाथनेति रूपम् । ॥३॥

न हि वः ॥ कथमिति । [११५-७] तविषी किं देवतो व्याप्ता उतकालत इत्यर्थः । एतदुत्तररूपं भाष्यमनुवदति । नित्ययतेति । [११५-७] युजा योगेनेति । [११७-७] तत्तद्दैत्यनिबर्हणोपायेनेत्यर्थः । ॥४॥

प्रवेपयन्ति ॥ मत्ता इवेति । [११५-१०] दृष्टान्तः प्रकृतानुपयुक्त इत्यत आह । स्वप्रयोजनेति । [११५-१०] ॥ ५ ॥ ॥ १८ ॥

उपो रथेषु ॥ श्रित्र(उ)ओकारो गुण इति । [११५-१३] श्रित्र इकारस्यैकारे गुणे भवितव्ये ओकारो गुणः विकरणलोपः छान्दस इति भावः । (अश्रोत्) ननु वोयामसिति अयुक्तम् । 'अनुदात्तं सर्वमपादादौ' [८।१।१८] इत्यतः 'बहुवचनस्य वस्नसौ' [८।१।२१] इत्यत्र अपादादावित्यनुवृत्तेरित्यत आह नञानिर्दिष्टमिति । [११५-१३] ॥६॥

आवः ॥ ननु कण्वस्य गमनकर्मत्वात् द्वितीयया भाव्यमित्यत आह । गत्यर्थेति [११५-१६] गन्तेति । [११५-१७] गमे-

लोँटादेशस्य तादेशे 'बहुलं छन्दसि' [२।४।७३] इति श्नपो लुकि 'इषु गमियमां छः' [७।३।७७] इति छत्वाभावे थादेशस्य तबादेशे तपः पित्त्वेन ङित्त्वाभावात् अनुनासिकलोपाभावे गन्तेति रूपम् । ॥७॥

युष्मेषितः ॥ द्वितीयाबहुवचनान्ते(ने)ति।[११५-१९] 'ओः सुपीति' [६।४।८३] इति यणादेशे अभ्व इति रूपम् । ॥८॥

असामिहि ॥ ददेति । [११५-२२] दद दानइत्यतो व्यत्ययेन परस्मैपदे मध्यमपुरुषैकवचने च ददेति रूपम् । दत्तेति । [११५-२२] डुदाञ्दान इत्यस्येदं रूपम् । दाञो लोटः थकारस्य तादेशे श्नपः श्लौ द्वित्वे 'झाम्यस्तयोरातः' [६।४।११२] इति आकारलोपे 'खरि च' [८।४।५५] इति चर्त्वे अभ्यासह्रस्वत्वे च दत्तेति रूपं सिद्धं भवति । ॥९॥

असाम्योजः ॥ परिगतकोपायेति । [११५-२६] प्राप्तकोपायेत्यर्थः । ॥१०॥१९॥७॥

उत्तिष्ठ ॥ णिजिति । [११६-२] शतृप्रत्ययमेति शेषः । देवशब्दात् णिचि वकारस्याकारलोपे शतृप्रत्यये शपि गुणे अयादेशे 'अतो गुणे' [६।१।९७] इति शपोऽकारस्य पररूपत्वे असि 'उगिदचाम्' [७।१।७०] इति नुमि देवयन्त इति रूपम् । ॥१॥

त्वमित् ॥ आचक इति । [११६-८] आङ्पूर्वात् चकोर्लिटस्तकारस्य एसि छान्दसे द्वित्वाभावे आचक इति रूपम् ॥२॥

प्रेठ ॥ निपातनादिति ।[११६-१५] पञ्चम्यास्तसिप्रत्ययस्य निपातनादित्यर्थः ॥ ३ ॥

टीप --मुद्रित पुस्तके परिगतकोपायेति पदं नास्ति परंतु आवश्यकम् । प्राप्तकोपाय इत्यस्ति तत्रावश्यकम्

यो वाघते ॥ नन्वत्र रूपशब्दपर्यायेण पेशशब्देन कथं प्रत्यूर्ति-शब्दव्याख्यानमित्यत आह । प्रत्यूर्तिशब्द इति । [११६-२०] उभयोरपिशब्दयोः रूपशब्दपर्यायत्वाद्व्याख्यानमुपपन्नमिति भावः । प्रत्यूर्ति शब्दो वेगवाचीति प्रसिद्धम् । पेशशब्दोऽपि वेगवाचक इत्युपपन्नो व्याख्यानव्याख्येयभाव इत्याह । पेशो वेगोवेति । [११६-२०] ॥ ४ ॥

प्रनूनम् ॥ सुपि स्थ इति । [११६-२३] उत्पूर्वात् स्थाधातोः कप्रत्यये 'उदःस्थास्तंभोःपूर्वस्य' [८।४।६१] इति सकारस्य पूर्वसवर्णे उदो दकारस्य ककारे उक्थमिति रूपम् । ॥ ५ ॥ २० ॥

तमित् ॥ वोचेमेति [११६-२६] वचेराशीर्लिंङि 'लिङ्याशिष्यङ्' [३।१।८६] इति अङि 'वच उम्' [७-४-२०] इत्युमि यासुटि 'छन्दस्युभयथा' [६-४-११७] इति सार्वधातुकत्वात् 'लिङः सलोपोनन्त्यस्य' [७-२-७९] इति सकारलोपे इयादेशे मसः सकारस्य लोपे वोचेमेति रूपम् । अश्नवदिति [११७-२] अशूव्याप्तावित्यतः लेटि अडागमे लेटः व्यत्ययेन तिपि 'इतश्च लोपः परस्मैपदेषु' [३-४-९७] इति इकारलोपे श्नुविकरणे गुणे अवादेशे अश्नवदिति रूपम् । ॥६॥

को देवयन्तम् ॥ प्रास्थितेति । (११७-५) 'व्यवहिताश्च' (१।४।८२) इति वचनात् प्रप्रेत्युपसर्गयोर्व्यवधानम् । स्थाधातोः 'समवप्रविभ्यस्थ' (१।३।२२) इति आत्मनेपदे तादेशे 'स्थाध्वोरिच्च' [१-२-२७] इति इकारान्तादेशे 'ह्रस्वादङ्गात्' (८-२-२७) इति सिचो लुकि अडागमे अस्थितेति रूपम् । अन्तर्वावत् क्षयमिति । (११७-६) अत्र क्षयमिति प्रथिमम् । अनयोर्भिन्नपदत्वेन युगपद्ग्रहणवैय्यर्थ्यात् । उत्तरत्र क्षयमित्यनूद्य स्थानमिति व्याख्यानस्य क्रियमाणत्वाच्च । अन्तर्वावदिति वतिप्रत्यय

इत्यभिप्रेत्याह । **तत्सादृश्येनेति** । (११७-७) विशिष्टमिति शेषः। अत्रविष्णुसादृश्यमपेक्षितपुरुषार्थदातृत्वेन बोध्यम् । **तत्स्वामिकत्वेनेति** । (११७-७) युक्तमिति शेषः । इतःपरं असमर्थसमासोऽयमिति-वाक्यं द्रष्टव्यम् । ततः परं क्षयं स्थानमिति वाक्यम् । अन्तःशब्दस्य सर्वशब्दसापेक्षत्वात्कथं वाशब्देन समास इत्याशङ्कापरिहाराय असमर्थ-समासोऽयमिति वाक्यं प्रयुक्तम् । क्षयशब्दमनूद्यार्थं वक्तुं क्षयं स्थानमिति बोध्यम् । ॥ ७ ॥

उपक्षत्रम् ॥ पृञ्चीतेति । [११७-८] पृची संपर्के इत्यतः व्यत्ययेन लडर्थे लिङि तस्य तादेशे सीयुटि 'लिङः सलोपोऽनन्त्यस्य' [७-२-७९] इति सलोपे श्नमि 'श्नसोरल्लोपः' [६-४-१११] इत्यकारलोपे **पृञ्चीतेति** रूपम् । **तरुतेति** । [११७-१०] तृधातोः स्तृचि इडागमे गुणे 'तृतीयोऽतिशये' [महाव्या] इति इकारस्य उकारे **तरुतति** रूपम् । ॥८॥२१॥८॥

ग्रन्थं समाप्य तत्फलत्वेन भगवद्भक्तिं प्रार्थयते । **देवता इति** । [११७-१३] परवादिनः स्वकृतव्याख्यानं न सहन्ते अत आह । **ये भवान्तीति** ॥ [११७-१४] विस्तरेण सर्वेषां शब्दा-नामसाधने तत्प्रयोजनाकथने च निमित्तमाह । **शब्दानामिति** । [११७-१४] श्री श्री श्री ।

इति श्रीमत्सत्यनिधितीर्थ श्रीचरणचरणाराधक

श्रीमत्सत्यनाथयति विरचितः ऋग्भाष्यटीकाप्रकाशो रूपावतारः समाप्तः ॥ श्रीविष्णुः प्रीयताम् ॥ श्री मिलित्वा ॥४०-सूक्तानि.-अनुवाक८

सत्यप्रमोदतीर्थानामनजेन तदाज्ञया ।
बहुग्रन्थान् संविमर्श्य हयग्रीवेण शोधितम् ॥
सत्यप्रमोदगुरवे शुश्रूषान्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुता गुर्वाराध्यस्य पादयोः सेवा ॥

LIBRARY
ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571 431

